
# मीमांसा-शाबर-भाष्यम्

## आर्षमत-विमर्शिन्या हिन्दी-व्याख्यया सहितम्

(षष्ठो भागः)




युधिष्ठिरो मीमांसकः

आचार्य-शबरस्वामि-विरचितम्

# जैमिनीय-मीमांसा-भाष्यम्

## आर्षमत-विमर्शिन्या हिन्दी-व्याख्यया सहितम्

[षष्ठो भागः]



व्याख्याकारः—
युधिष्ठिरो मीमांसकः

प्रकाशक:—
रामलाल कपूर ट्रस्ट
बहालगढ़ (सोनीपत-हरयाणा)

प्राप्ति-स्थानम्—
रामलाल कपूर ट्रस्ट
बहालगढ़ (सोनीपत-हरयाणा)

प्रथम संस्करण—१०००
संवत् २०४७; सन् १९९०
मूल्य—३०·००

मुद्रक:—
रामकिशन सरोहा
प्रिंटिंग प्रेस, जी०टी० रोड, बहालगढ़
(सोनीपत-हरयाणा)

# भूमिका

मीमांसा-शाबर-भाष्य की 'आर्षमतविमर्शिनी' हिन्दी व्याख्या का पांचवां भाग सं० २०४३ के अन्त (मार्च १९८६) में पूरा हुआ था। इस भाग अर्थात् अ० ६ के दो तिहाई भाग की व्याख्या लिखने के अनन्तर दाहिने कन्धे और दाहिने बाजू में पीड़ा आरम्भ हुई और वह उत्तरोत्तर बढ़ती चली गई। इस कारण एक तिहाई भाग की व्याख्या को पूरा करने में बहुत समय लग गया। इसी काल में दाहिना कन्धा जाम हो गया और बाजू में अत्यधिक पीड़ा होने के कारण ५वें भाग (अ० ६)के अनन्तर मीमांसा-भाष्य व्याख्या का लेखन कार्य स्थगित हो गया।

**धर्मपत्नी का वियोग**—मैं अनेक क्षेत्रिय व्याधियों से तो चिरकाल से पीड़ित हूं। दाहिने कन्धे के जाम होने और बाजू में पीड़ा के कारण लेखन कार्य बन्द हो ही गया था। किसी प्रकार धर्मपत्नी देवी यशोदा के सान्निध्य से कालयापन कर रहा था, परन्तु दैव को यह भी स्वीकार नहीं था अतः ३-४ मास की अल्प बीमारी के पश्चात् पौष शुक्ला ११, सं० २०४३ (=१० जनवरी १९८७) को सहधर्मिणी देवी का भी निधन हो गया। हाथ से कार्य करने और पैरों से चलने में असमर्थ मैं एकाकी रह गया। लगभग डेढ़ वर्ष मन अशान्त सा रहा।

**आत्म-परिचय का लेखन**—सन् १९८८ में बोलकर कथंचित् आत्म-परिचय लिखवाया। मीमांसा-भाष्य के ७वें अध्याय के दो पादों की हिन्दी व्याख्या भी लिखाने का प्रयत्न किया, परन्तु सदा स्वयं लेखन के कारण बोलकर लिखाने का अभ्यास न होने से मीमांसा-भाष्य व्याख्या उचित रूप में लिखाई नहीं जा सकी। अतः मीमांसा-भाष्य व्याख्या का कार्य पूर्णतया बन्द करना पड़ा।

**महामहोपाध्याय मानद उपाधि**—सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी ने २८ जनवरी १९८९ के दीक्षान्त समारोह के अवसर पर मुझे **महामहोपाध्याय** मानद उपाधि से सम्मानित किया। यतः मैं उस अवसर पर रुग्ण होने के कारण उपस्थित नहीं हो सका अतः ३ जुलाई को श्री प्रो० वि० वेङ्कटाचलम् कुलपति (सं० सं० वि० वि० वाराणसी) ने कतिपय विद्वानों के साथ बहालगढ़ आकर समारोहपूर्वक मुझे उक्त मानद उपाधि प्रदान की।

**मीमांसा-भाष्य व्याख्या के लेखन का पुनरारम्भ**—मार्च सन् १९९० में कन्धे के पूर्ववत् जाम रहते हुए भी बाजू की पीड़ा में कुछ न्यूनता आई। जहां मेरे लिये एक साधारण पत्र लिखना कठिन था वहां २-३ पृष्ठ लिखना सम्भव प्रतीत

हुआ। अतः पूरे चार वर्ष के अन्तराल के पश्चात् अप्रेल (१९९०) में मीमांसा-भाष्य व्याख्या का लेखन कार्य पुनः आरम्भ किया। गति तो मन्द ही रही, परन्तु कार्य कथंचित् चलता रहा। जून के मध्य में ७वें अध्याय की व्याख्या पूरी हुई। ८वें अध्याय की व्याख्या सितम्बर के अन्त तक पूरी हो जानी थी। ५ दिन का कार्य शेष रहा था कि ज्वर से पीड़ित हो गया। तब से अब तक तीन बार ज्वर हो चुका है। निर्बलता बहुत बढ़ गई है। अतः ५ दिन का अवशिष्ट कार्य अब नवम्बर के अन्त में पूरा हुआ है।

इस षष्ठ भाग में सप्तम अष्टम अध्याय की व्याख्या है। ये दोनों अध्याय छोटे थे। आगे नवम अध्याय की व्याख्या आरम्भ करूंगा। यह अध्याय लगभग ७वें ८वें दो अध्यायों के बराबर है। आशा है स्वास्थ्य यदि ठीक रहा तो ७-८ मास में नवम अध्याय की व्याख्या पूर्ण हो जायेगी।

कागज छपाई और जिल्द बन्धाई का व्यय मंहगाई के कारण अत्यधिक बढ़ गया है। फिर भी रामलाल कपूर ट्रस्ट की मूल्य निर्धारण नीति के अनुसार न्यूनतम मूल्य ही रखा गया है।

मार्गशीर्ष सं० २०४७
नवम्बर सन् १९९०

विदुषां वशंवदः—
युधिष्ठिर मीमांसक

# मीमांसा-शाबरभाष्य-व्याख्या के सप्तम-अष्टम अध्यायों की अधिकरण-सूची

## सप्तमाध्याये प्रथमः पादः


| क्रम-संख्या | अधिकरण-नाम | पृष्ठ |
|---|---|---|
| १. | प्रयाजादिधर्माणामुपदेशेन प्रकृतिमात्रार्थताधिकरणम् | २०३३ |
| २. | इषौ श्येनीयवैशेषिकधर्मातिदेशाधिकरणम् | २०५३ |
| ३. | वारुणप्रघासिकपञ्चसञ्चरेषु वैश्वदेविकसार्थवादविधिकाण्डातिदेशाधिकरणम् | २०५८ |
| ४. | साकमेधीयैन्द्राग्नैककपालयोः सार्थवादविधिकाण्डातिदेशाधिकरणम् | २०६३ |
| ५. | साकमेधीयैककपाले वारुणप्रघासिकैककपालधर्मातिदेशाधिकरणम् | २०६५ |


## सप्तमाध्याये द्वितीयः पादः


| | | |
|---|---|---|
| १. | रथन्तरादिशब्दानां गीतिविशेषवाचित्वाधिकरणम् | २०६८ |


## सप्तमाध्याये तृतीयः पादः


| | | |
|---|---|---|
| १. | अग्निहोत्रादिनाम्नां धर्मप्रदेशकत्वाधिकरणम् | २०९१ |
| २. | प्रायणीयनाम्नो धर्मानतिदेशकत्वाधिकरणम् | २०९६ |
| ३. | विश्वजिति षाडहिकषट्पृष्ठातिदेशाधिकरणम् | २०९८ |
| ४. | अवभृथनाम्नः सौमिकावभृथधर्मातिदेशकत्वाधिकरणम् | २१०३ |
| ५. | वारुणप्रघासिकावभृथस्य तुषनिष्कासद्रव्यकत्वाधिकरणम् | २१०८ |
| ६. | वैष्णवशब्दस्य सौमिकातिथ्येष्टिधर्मानतिदेशकत्वाधिकरणम् | २११० |
| ७. | निर्मन्थ्यादिशब्दानां धर्मानतिदेशकत्वाधिकरणम् | २१११ |
| ८. | प्रणयनशब्दस्य सौमिकप्रणयनधर्मानतिदेशकत्वाधिकरणम् | २११३ |
| ९. | मध्यमयोरेव पर्वणोः प्रणयननियमाधिकरणम् | २११६ |
| १०. | स्वरसामादिशब्दानां धर्मातिदेशकत्वाधिकरणम् | २११९ |
| ११. | अनोवासःप्रभृतिशब्दानामाकृतिनिमित्तताधिकरणम् | २१२६ |
| १२. | गर्गत्रिरात्रे लौकिकाग्नेरुपनिधेयत्वाधिकरण | २१२८ |
| १३. | उपशये यूपशब्दस्य संस्कारानतिदेशकत्वाधिकरणम् | २१३१ |

| क्रम-संख्या | अधिकरण-नाम | पृष्ठ |
|---|---|---|
| १४. | पृष्ठशब्दस्य ऋङ्मन्त्रवाचित्वाधिकरणम् | २१३४ |

**सप्तमाध्याये चतुर्थः पादः**

| | | |
|---|---|---|
| १. | अविहितेतिकर्तव्यताकेषु सौर्यादिष्वितिकर्तव्यताया अतिदेशाधिकरणम् | २१३६ |
| २. | सौर्यचर्यादौ वैदिक्या एवेतिकर्तव्यताया अतिदेशाधिकरणम् | २१४२ |
| ३. | गावामयनिकज्योतिरादिष्वेकाहकाण्डपठितज्योतिरादिधर्मानुष्ठानाधिकरणम् | २१५६ |

**अष्टमाध्याये प्रथमः पादः**

| | | |
|---|---|---|
| १. | विशेषातिदेशप्रतिज्ञाधिकरणम् | २१७२ |
| २. | सादृश्यविशेषेण नियतप्रकृतितो धर्मातिदेशाधिकरणम् | २१७३ |
| ३. | सोमे ऐष्टिकधर्मानतिदेशाधिकरणम् | २१७६ |
| ४. | ऐन्द्राग्नादिषु दार्शपूर्णमासिकधर्मातिदेशाधिकरणम् | २१८३ |
| ५. | अग्नीषोमीये पशौ दार्शपूर्णमासिकधर्मातिदेशाधिकरणम् | २१८४ |
| ६. | सवनीयादिपशुष्वग्नीषोमीयधर्मातिदेशाधिकरणम् | २१८६ |
| ७. | ऐकादशिनेषु पशुषु सवनीयपशुधर्मातिदेशाधिकरणम् | २१८७ |
| ८. | पशुगणेष्वैकादशिनधर्मातिदेशाधिकरणम् | २१८६ |
| ६. | अव्यक्तयागेषूदभिदादिषु सौमिकधर्मातिदेशाधिकरणम् | २१६० |
| १०. | अहर्गणेषु द्वादशाहिकधर्मातिदेशाधिकरणम् | २१६२ |
| ११. | संवत्सरसत्रेषु गावामयनिकधर्मातिदेशाधिकरणम् | २१६३ |
| १२. | निकायिनामुत्तरेषु पूर्वनिकायिधर्मातिदेशाधिकरणम् | २१६४ |
| १३. | फलादीनामनतिदेशाधिकरणम् | २१६६ |
| १४. | काम्यगुणानां विकृतावनतिदेशाधिकरणम् | २२०० |
| १५. | सौर्ययागे विकल्पेनाग्नेयद्वयधर्मातिदेशाधिकरणम् | २२०३ |
| १६. | सौर्ये चरावाग्नेयधर्मातिदेशाधिकरणम् | २२०५ |
| १७. | देवताघटितसादृस्यापेक्षया द्रव्यघटितसादृश्यस्य बलीयस्त्वाधिकरणम् | २२०६ |
| १८. | कृष्णलचरावाग्नेयधर्मातिदेशाधिकरणम् | २२१३ |
| १६. | मधूदकयोरुपांशुयाजधर्मातिदेशाधिकरणम् | २२१७ |

**अष्टमाध्याये द्वितीयः पादः**

| | | |
|---|---|---|
| १. | वाजिनयागसुराग्रहयोरैष्टिकधर्मातिदेशाधिकरणम् | २२१६ |
| २. | अग्नीषोमीयपशोः सान्नाय्यविकारत्वाधिकरणम् | २२२५ |

| क्रम-संख्या | अधिकरण-नाम | पृष्ठ |
|---|---|---|
| ३. | अग्नीषोमीयस्य पशोः पयोविकारत्वाधिकरणम् | २२२८ |
| ४. | आमिक्षायागे पयोयागधर्मातिदेशाधिकरणम् | २२२९ |
| ५. | सत्राहीनयोः सत्राहीनोभयात्मकद्वादशाहधर्माणां व्यवस्थयाऽतिदेशाधिकरणम् | २२३३ |
| ६. | पञ्चदशरात्रकुण्डपायिनामयनयोः सत्रत्वात् सत्रात्मकद्वादशाहधर्मातिदेशाधिकरणम् | २२३९ |


## अष्टमाध्याये तृतीयः पादः


| | | |
|---|---|---|
| १. | आग्नावैष्णवादौ देवतासामान्यादग्नीषोमीयादिधर्मातिदेशाधिकरणम् | २२४४ |
| २. | जनकसप्तरात्रे द्वादशाहिकानां सप्तानामह्नां क्रमेण धर्मातिदेशाधिकरणम् | २२४७ |
| ३. | षट्त्रिंशद्रात्रे षडहधर्मातिदेशाधिकरणम् | २२५० |
| ४. | शतोक्थ्यादिसंस्थागणेषु द्वादशाहिकधर्मातिदेशाधिकरणम् | २२५४ |
| ५. | शतोक्थ्यादौ ज्यौतिष्टोमिकोक्थ्यादिस्तोत्रानुष्ठानाधिकरणम् | २२५७ |
| ६. | बृहस्पतिसवादौ दाशतयीभ्य उत्पन्नगायत्रीणां समानयनाधिकरणम् | २२५९ |


## अष्टमाध्याये चतुर्थः पादः


| | | |
|---|---|---|
| १. | दर्विहोमशब्दस्य कर्मनामधेयत्वाधिकरणम् | २२८० |
| २. | दर्विहोमशब्दस्य स्मार्तानां वैदिकानां च कर्मणां नामधेयताधिकरणम् | २२८१ |
| ३. | दर्विहोमशब्दस्य होमनामधेयत्वाधिकरणम् | २२८३ |
| ४. | दर्विहोमशब्दस्य गुणविधित्वनिराकरणाधिकरणम् | २२८४ |
| ५. | दर्विहोमानामपूर्वताधिकरणम् | २२८८ |

## लेखक की कतिपय अन्य महत्त्वपूर्ण कृतियां

**मीमांसा-शाबर-भाष्य**–आर्षमतविमर्शिनी हिन्दी व्याख्या सहित। प्रथम भाग के आरम्भ में **शास्त्रावतार, वेदश्रुति-आम्नाय-संज्ञामीमांसा** तथा **श्रौतयज्ञमीमांसा** नामक तीन निबन्ध। प्रथम भाग ६०-००; द्वितीय ४०-००; तृतीय ५०-००; चौथा ४०-००; पांचवां ५०-००।

**मीमांसा-दर्शनम्-शाबरभाष्य-सहितम्**। अन्तेऽनेकपरिशिष्टसमन्वितम्। विविधाभिः टिप्पणीभिः समलङ्कृतम्, शास्त्रावतार-वेदश्रुतिआम्नायसंज्ञामीमांसा-श्रौतयज्ञमीमांसासंज्ञकनिबन्धसहितम्। सम्पादकः—युधिष्ठिरो मीमांसकः।

प्रथम भाग ६०-००।

**संस्कृत व्याकरणशास्त्र का इतिहास**—इसमें पाणिनि से प्राचीन २३ वैयाकरणों, पाणिनि तथा पाणिनि से उत्तरवर्ती १८ वैयाकरणों, उन पर टीका टिप्पणी लिखने वाले १०० से अधिक व्याख्याताओं का इतिहास लिखा गया है। तत्पश्चात् सभी व्याकरणों के धातुपाठ, उणादिसूत्र, लिङ्गानुशासन, परिभाषा-पाठ आदि के प्रवक्ताओं, व्याख्याताओं, व्याकरण के दार्शनिक, तथा काव्यप्रणेता वैयाकरणों का इतिवृत्त दिया है। नया परिष्कृत परिवर्धित संस्करण। तीन भागों का मूल्य १२५-००।

**आत्म-परिचय**—(वंश-परिचय एवं पूर्वज परिचय सहित)। इसमें लेखक ने अपने पूर्वज, विशेष करके पिता गौरीलाल आचार्य के वैदिक धर्म के प्रचार-प्रसार में किये गये उन कार्यों का उल्लेख किया है जिनके कारण इन्दौर राज्य उन्हें परेशान करता रहा। अन्त में स्व-परिचय दिया है। नया परिवर्धित संस्करण

मूल्य १००-००

# मीमांसा-शाबर-भाष्यम्

(हिन्दी-व्याख्या-सहितम्)

## सप्तमाध्याये प्रथमः पादः

### [प्रयाजादिधर्माणामुपदेशेन प्रकृतिमात्रार्थताधिकरणम् ॥१॥]

पूर्वेणाध्यायषट्केन प्रत्यक्षविहितधर्माणां [1]कर्मणां दर्शपूर्णमासादीनामितिकर्तव्यता चिन्तिता। उत्तरेणेदानीमविहितेतिकर्तव्यताकेष्वैन्द्राग्नादिषु चिन्तयितुमिष्यते। तत्र यदि दर्शपूर्णमासादीनां प्रकरणे ये विहिता धर्मास्ते सर्वकर्मसु विहिता भवन्ति, ततस्तैरेव [2]धर्मैरैन्द्राग्नादयोऽपि धर्मवन्त उक्तास्तथा कर्तव्याश्चेति, नार्थ उत्तरेण षट्केन। अथ ये यस्य प्रकरण उच्यन्ते, ते तत्रैवोक्ता भवन्ति। ततोऽधर्माण्यैन्द्राग्नादीनीति तेषु चिन्ता भवति, किमेषां धर्माः सन्त्युत नेति। यदा च सन्ति, तदा के कियन्तो वा कथं चानुष्ठातव्या इति। तदर्थमुत्तरः[3] षट्कः प्रवर्तनीयः।

---

व्याख्या—पूर्व षट्क (=छः अध्यायों के समूह) से प्रत्यक्ष रूप से विहित धर्मोंवाले दर्शपूर्णमास आदि कर्मों की [प्रयाजादि रूप] इतिकर्तव्यता का विचार किया है। अब उत्तर [षट्क] से जिनकी इतिकर्तव्यता नहीं कही गई है ऐसे ऐन्द्राग्नादि [कर्म के विषय] में चिन्तन करना चाहते हैं। यदि तो दर्शपूर्णमासादि के प्रकरण में जो [प्रयाजादि] धर्म विहित हैं वे सब कर्मों में विहित होते हैं तब तो उन्हीं धर्मों से ऐन्द्राग्नादि [याग] भी धर्मवाले कहे गये और [उन्हें] उसी प्रकार करना चाहिये। उत्तर षट्क का कोई प्रयोजन नहीं है। और यदि जो [धर्म] जिसके प्रकरण में कहे गये हैं' वे वहीं (=उन्हीं कर्मों में) उक्त होते हैं, तब ऐन्द्राग्नादि अधर्मक (=धर्म से रहित) हैं, इससे उनमें विचार होता है—क्या इनके धर्म हैं अथवा नहीं हैं। जब हैं, तब कौनसे और कितने हैं और कैसे अनुष्ठान योग्य हैं। उसके लिये उत्तर षट्क का प्रवर्तन होना चाहिये।

---

१. टुप्टीकायामुद्धृते पाठे 'कर्मणां' पदं नास्ति।

२. 'सर्वेधर्मै०' पाठा०।

३. 'उत्तरषट्कः' पाठा०।

तत्र सप्तमेन तावत्सन्ति धर्मा इत्युच्यते। अष्टमेन चेमेऽस्येति। इत्थं प्रयोक्तव्या इति नवमेन। दशमैकादशद्वादशैरेतावन्तः प्रयोक्तव्या नातोऽधिका इति।

---

विवरण—प्रत्यक्षविहितधर्मणां····· चिन्तिता—भट्टकुमारिल ने टुप्टीका में इस भाष्य वचन तथा उत्तर किये गये विचार को अयुक्त माना है। उनका कहना है—कि सर्वपृष्ठा नाम की [अनेक कर्मवाली विकृति रूप] इष्टि में 'क्या स्विष्टकृत् के लिये उत्तरार्ध से एक बार अवदान करना चाहिये अथवा प्रतिकर्म भेद से अवदान करना चाहिये, यह [अ० ३, पा० ५, अधि० ४, सूत्र १६ में] विचार किया है। तथा—दृतिनवनीतमाज्यं भवति इत्यादि प्रत्यक्षविहित धर्मवाले कर्मों में भी [अ० ३, पा० ८, अधि० २०, सूत्र ३६-३८ में] चिन्तन किया है। इसलिये यहां इस प्रकार कहना चाहिये—'प्रकृति और विकृति में उपदिष्ट धर्मों का चिन्तन [पूर्व छः अध्यायों में] कर चुके हैं। सप्तदश प्राजापत्यान् इत्यादि में प्रत्यक्ष ही उपदेश है, सर्वपृष्ठादि में आनुमानिक वचन से उपदिष्ट धर्म के विषय में ही विचार किया है।

ऐन्द्राग्नादिषु—ऐन्द्राग्न आदि काम्य कर्मों का विधान तै० सं० काण्ड २, प्रपा० २-३-४-५ में विहित हैं। यथा—योऽलं प्रजायै सन् प्रजां न विन्दत ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः (तै० सं० २।२।१।१) इत्यादि।

व्याख्या—ऐसी स्थिति में सप्तम अध्याय से [ऐन्द्राग्नादि के] धर्म हैं, यह कहा जाता है और अष्टम अध्याय से ये धर्म इसके हैं, नवम अध्याय से इस प्रकार से प्रयोग करना, दशम एकादश और द्वादश अध्याय से इतने धर्म प्रयोगार्ह हैं, इससे अधिक नहीं [यह कहा जाता है]।

विवरण—तत्र सप्तमेन—इत्यादि उत्तर षट्क के विषय में भी भट्टकुमारिल ने अन्य प्रकार से लिखा है। यथा—

सप्तम अध्याय से विकृति यागों के अतिदेश (=प्रकृतिवद् विकृतिः कर्तव्या) से धर्म होते हैं, यह प्रतिपादन किया जाता है। अष्टमाध्याय से विशेष धर्मों का प्रतिपादन किया है। नवमाध्याय से विशेष अतिदेश प्रसङ्ग से आरम्भ किया है—क्या मन्त्र अग्नि के स्वरूप के प्रतिपादन के लिये उच्चारण किया जाता है, अथवा अग्नि का स्वरूप अविवक्षित है। इससे 'इस प्रकार प्रयोग करना चाहिये, यह अतिदेश प्रसङ्ग में ही विचार किया है। दशम अध्याय में [प्रकृति से प्राप्त धर्म का] बाध, [प्रकृति प्राप्त धर्म के साथ विकृत्युक्त धर्म का] अभ्युच्चय (=सहभाव[1]) अनुनिष्पादिनी[2] शेष इयत्ता का विचार किया है। इयत्ता के प्रसङ्ग से एकादश

---

१. इदमिह भवतीति विज्ञाते अपरमपि भवतीति विज्ञानम् [अभ्युच्चयः]। शाबरभाष्य १०।१।१॥ अभ्युच्चयो नाम न किञ्चिद् वस्तुस्वरूपं विद्यते, किन्तु उपहोमैः अनूयाजा न बाध्यन्ते इति बाधाभावमात्रम् अभ्युच्चय उच्यते। टुप्टीका ११।१।१।१। पृष्ठ २०९६ (शाबरभाष्य पूना सं०)।

२. अभ्युच्चय से प्राप्त प्रकृतिप्राप्त इयत्ता के पश्चात् निष्पादनीय शेष इयत्ता।

तत्रेदं विचार्यते, किं यजिप्रयुक्ता एते धर्माः—कथं यजिर्गुणवान्स्यादित्येवमर्थमाम्नायन्ते, आहोस्विदपूर्वप्रयुक्ताः—कथमपूर्वं स्यादिति। यदि यजिप्रयुक्तास्ततः सर्वार्थाः। अथापूर्वप्रयुक्तास्ततो यथाप्रकरणं व्यवतिष्ठन्ते। किं पुनरत्र युक्तम्। अपूर्वप्रयुक्ता इति। अपूर्वं हि फलवत्। अफलो यजिः। फलवति च प्रयासो विधीयमानोऽर्थवान् भवति। तस्मादपूर्वप्रयुक्ता धर्मा इति। अतः परमाचार्यस्य सूत्रोपन्यासः—

**[१] श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् ॥१॥(उ०)**

---

अध्याय प्रयोग की इयत्ता के विचारार्थ आरम्भ किया है। तन्त्र (=जो एक बार प्रयुक्त बहुतों का उपकार करे) और आवाप (=आवृत्ति से उपकार करे[1]) से इस प्रकार (=ऐसी) इयत्ता के प्राप्त होने पर उसके अपवाद रूप से द्वादश अध्याय आरम्भ किया जाता है।··· अथवा सौर्यादि याग अतिदेश से प्राकृत धर्मों से अधिकृत होते हैं अथवा नहीं, इस प्रसङ्ग से सप्तम अध्याय आरम्भ किया जाता है। उस अतिदेश के बल से विशेषातिदेश ऊह और बाध का आरम्भ होता है [८-९-१० अध्यायों में]। पर्यनुयोग (=प्रश्न) अविशेष=साधारण होने[2] से दशम के अनन्तर तन्त्र और आवाप के प्रसङ्ग प्रस्तुत होते हैं [११-१२-अध्यायों में]।

व्याख्या—उक्त विषय में यह विचारा जाता है—क्या ये धर्म यजि=याग से प्रयुक्त हैं—याग कैसे गुणों से युक्त होवे, इसलिये [उक्त धर्म] आम्नात हैं? अथवा अपूर्व से प्रयुक्त हैं—अपूर्व कैसे उत्पन्न होवे। यदि याग से प्रयुक्त हैं तो [उक्त धर्म] सर्वार्थ (=सब यागों के लिये) होवें और यदि अपूर्व प्रयुक्त होवें तो यथाप्रकरण व्यवस्थित रहते हैं। अर्थात् जो धर्म जिस याग के प्रकरण में कहे गये हैं उनके ही होते है। इनमें युक्त क्या है? अपूर्व से प्रयुक्त है [यही युक्त है]। अपूर्व ही फलवान् है, याग फलरहित है। फलवान् के प्रति विधीयमान प्रयत्न अर्थवान् होता है। इससे धर्म अपूर्व से प्रयुक्त हैं। इसी हेतु से परमाचार्य के सूत्र का उपन्यास है—

**[१] श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् ॥१॥**

सूत्रार्थः—(शेषाणाम्) प्रयाजादि शेष कर्मों के (श्रुतिप्रमाणत्वात्) श्रुति प्रमाण वाला होने से अर्थात् यह इसका शेष है इसके श्रुति से ही जानने योग्य होने से (मुख्यभेदे) मुख्य=अपूर्व के भेद होने पर शेष प्रयाजादि (यथाधिकारं) अधिकार के अनुसार=जो जिस अपूर्व के प्रसङ्ग में पठित है, वहीं (भावः) उनकी सत्ता (स्यात्) होवे।

---

१. यत्सकृत् कृतं बहूनामुपकरोति तत् तन्त्रमित्युच्यते। यस्त्वावृत्त्या उपकरोति स आवापः। शाबरभाष्य ११।१।१॥

२. पर्यनुयोगाविशेषात्—'यह बात यहां क्यों कही, वहां क्यों नहीं कही' रूप प्रश्न के साधारण होने से।

श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यादिति। मुख्यान्यपूर्वाणि। तानि हि फलवत्त्वात्प्रधानानि। प्रधाने च मुख्यशब्दः। तेषां भेद उक्तः शब्दान्तरादिभिर्हेतुभिः[1]। तस्मिन्मुख्यभेदे सति यथाधिकारं भावः स्याच्छेषाणाम्। ये यस्यापूर्वस्याधिकारे प्रकरणे शिष्यन्ते, ते तस्यैव भवेयुः। श्रुतिप्रमाणत्वात्। अयमस्यापूर्वस्य शेषोऽयमस्येत्यत्र श्रुतिरेव प्रमाणं क्रमते। न प्रत्यक्षादीनामन्यतमम्। श्रुत्या च ये यस्य प्रकरणे श्रूयन्ते ते तस्यैव भवितुमर्हन्ति। न चान्यस्योक्तोऽर्थोऽन्यस्य भवति। न हि यद्देवदत्तस्य [2]ग्रामाच्छादनादिकं, तद्यज्ञदत्तस्य भवति। तस्माद्यथाप्रकरणं व्यवस्था धर्माणाम् ॥१॥

**उत्पत्त्यर्थाविभागाद्वा सत्त्ववदैकधर्म्यं स्यात् ॥२॥ (सू०)**

---

व्याख्या—श्रुति प्रमाण वाला होने से शेषों के, मुख्य के भेद में यथाधिकार सत्ता होवे। अपूर्व मुख्य हैं। वे ही फलवान् होने से प्रधान हैं। मुख्य शब्द प्रधान अर्थ में है। उनका भेद 'शब्दान्तर' आदि हेतु से कह चुके हैं। उस मुख्य के भेद होने पर यथाधिकार शेषों का भाव (=सत्ता) होवे। जो [शेष] जिस अपूर्व (=प्रधान) के प्रकरण में कहे जाते हैं, वे उसी के होवें, श्रुति के प्रमाण होने से। यह इस अपूर्व का शेष है, यह इसका, इस विषय में श्रुति ही प्रमाण होती है। प्रत्यक्षादियों में अन्यतम प्रमाण नहीं होता है। श्रुति से जो जिस [अपूर्व के] प्रकरण में सुने जाते हैं, उसी [अपूर्व] के होने योग्य हैं। अन्य को कहा गया अर्थ (=द्रव्यादि) अन्य का नहीं होता है। देवदत्त का जो ग्राम वा आच्छादन (=वस्त्रादि) वह यज्ञदत्त का नहीं होता है। इस कारण यथाप्रकरण धर्मों की व्यवस्था जाननी चाहिये।

विवरण—भेद उक्तः शब्दान्तरादिभिः—द्वितीय अध्याय के द्वितीय पाद में शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् (सूत्र १) से पाद के अन्त तक अनेक हेतुओं से कर्मभेद का निरूपण किया गया है। ग्रामाच्छादनादिकम्—इसका पाठान्तर है—ग्रासाच्छादनमुक्तम्। अर्थात् देवदत्त का जो ग्रास (=भोजन) और आच्छादन (=वस्त्र) कहा गया है।

**उत्पत्त्यर्थाविभागाद् वा सत्त्ववदैकधर्म्यं स्यात् ॥२॥**

सूत्रार्थः—[वा] 'वा' शब्द पूर्व उक्त पक्ष की निवृत्ति के लिये है अर्थात् शेष धर्म अपूर्व प्रयुक्त नहीं हैं। (उत्पत्त्यर्थाविभागात्) उत्पत्ति=यजि का अर्थ=अपूर्व उसके विभाग न होने से (ऐकधर्म्यम्) एक=समान धर्म होवें अर्थात् शेष धर्म सबका समान (स्यात्) होवे। (सत्त्ववत्) सत्त्व=द्रव्य के धर्म के समान 'गौ का पैर से स्पर्श नहीं करना चाहिये' यह धर्म

---

१. मी० २।२। अधि० १। सूत्र १—'शब्दान्तरे कर्म भेदः कृतानुबन्धत्वात्' सूत्रादारभ्याऽऽपादान्तं कर्मभेदहेतवो विवृताः।

२. 'ग्रासाच्छादनमुक्तम्' इति पाठान्तरम्।

अथवा—नैतदेवं, यथाप्रकरणं धर्माणां व्यवस्थेति। कथं तर्हि? ऐकधर्म्यं स्यादिति। समानधर्मता। सर्वे धर्माः सर्वार्थाः। कुतः? उत्पत्त्यर्थाविभागात्। उत्पत्तिरिति यजिं ब्रूमः, अपूर्वस्योत्पादनात्। अर्थ इत्यपूर्वं ब्रूमः, यजिप्रयोजनत्वात्। तयोरविभागः। सर्वाण्यपूर्वाणि यजिमन्ति। यजिसंयोगेन धर्माः शिष्यन्ते। यजेतेत्युक्त्वोक्ताः। ते यजौ न संभवन्ति। तस्याफलत्वात्। तत्रासंभवन्तस्तत्संबद्धेष्वपूर्वेषु विज्ञायन्ते। स च यजिसम्बन्धः सर्वेषामपूर्वाणां तुल्यः। तस्मात्सर्वार्था भवन्ति। सत्त्वधर्मवत्। यथा सत्त्वधर्माः, **गौर्न पदा स्प्रष्टव्या**[1] इति गोत्वसंबन्धेन श्रूयमाणास्तत्रासंभवन्तस्तत्संबद्धेषु पिण्डेषु विज्ञायन्ते। तस्य च गोत्वसंबन्धस्याविशेषात्सर्वगवीषु शुक्लनीलकपिलकपोतिकासु भवन्ति। एवमिहापि।

उच्यते। विषम उपन्यासः। तत्र गोसामान्यसम्बन्धेन धर्मा विधीयन्ते। **गौर्न पदा स्प्रष्टव्या**[1] इति। इह पुनर्यजिविशेषसम्बन्धेन धर्मा विधीयन्ते—**दर्शपूर्ण-**

---

गोत्व से सम्बद्ध सब पिण्डों में जाना जाता है (किसी विशेष गाय में नहीं जाना जाता है) के समान शेष धर्म यजिमात्र को होवें।

व्याख्या—अथवा—ऐसा नहीं है, यथाप्रकरण धर्मों की व्यवस्था होवे। तो कैसे है? एकधर्मता होवे [अर्थात्] समानधर्मता होवे। सब धर्म सबके लिये हैं। किस हेतु से? उत्पत्ति के अर्थ का विभाग न होने से। 'उत्पत्ति' से यजि' (=याग[2]) को कहते हैं अपूर्व के उत्पादन करने से। 'अर्थ' से अपूर्व को कहते हैं, यजि का प्रयोजन होने से। उनका अविभाग है। सभी अपूर्व यजिमत् (=यजि से युक्त हैं) यजि के संयोग से धर्म कहे जाते हैं। 'यजेत' ऐसा कहकर कहे गये हैं। वे [धर्म] 'यजि' में सम्भव नहीं हैं। उस (=यजि) के फलरहित होने से। इससे वहां (=यजि में) सम्भव न होते हुए उस (=यजि) से सम्बद्ध अपूर्वों में जाने जाते हैं। और वह यजि का सम्बन्ध सब अपूर्वों के साथ समान है। इस हेतु से [धर्म] सबके लिये होते हैं। सत्त्वधर्म के समान। जैसे सत्त्व के धर्म—गौर्न पदा स्प्रष्टव्या (='गौ को पैर से नहीं छूना चाहिये' यह गोत्व के सम्बन्ध से श्रूयमाण वहां (=गोत्व में) असम्भव होते हुए पिण्डों (=गोशरीरों) में जाना जाता है। उस गोत्व सम्बन्ध के समान होने से शुक्ल नील कपिल और कपोतिक (=कबूतर के रङ्ग की) सब गौओं में [उक्त धर्म संबद्ध] होता है। इसी प्रकार यहां भी जानना चाहिये।

(आक्षेप) यह उपन्यास (=दृष्टान्त) विषम है। वहां (='गौर्न पदा स्प्रष्टव्या' में) गोसामान्य के सम्बन्ध से धर्म विधान किये जाते हैं—गौ को पैर से नहीं छूना चाहिये। यहां

---

१. अनुपलब्धमूलम्। 'स्प्रष्टव्य इति' पूनासंस्करणे पाठः।

२. सर्वत्र 'यजि' का अर्थ याग समझें।

**मासाभ्यां यजेत,'[1] ज्योतिष्टोमेन यजेत'[2]** इति । विशिष्टयजिसम्बद्ध एवापूर्वे भवितुमर्हन्ति, न सर्वत्रेति । तत्र[3] ब्रूमः । **दर्शपूर्णमासाभ्यां यजेत** इत्यत्र न शक्यन्ते यागविशेषे धर्मा विधातुम् । किं कारणम् ? यदा यजौ धर्मा विधीयन्ते, तदा यजिरनूद्यते—यजेतेत्थमिति । यदि यजिर्विधीयेत, न धर्मैः सम्बध्येत । न हि द्वयोर्विधीयमानयोः परस्परेण सम्बन्धो भवति । अनुवादश्च सन्नविशेषात् सर्वयागानुवादः । तस्मात् सर्वार्था धर्माः । ननु दर्शपूर्णमासशब्दो विशेषको भविष्यति ? न दर्शपूर्णमासशब्दः शक्नोति यागं विशेष्टुम् । अयं हि विधिर्वा स्यादनुवादो वा । यदाऽनुवादस्तदा धर्मसम्बन्धार्थः । स च धर्मसम्बन्धो यागानुवादेनैव तयोः सिद्धः ।

---

यजि-विशेष के सम्बन्ध से धर्मों का विधान किया जाता है—दर्शपूर्णमासाभ्यां यजेत (=दर्शपूर्णमासों से यजन करे), ज्योतिष्टोमेन यजेत (=ज्योतिष्टोम से यजन करे) । यहां विशिष्ट यजि से सम्बद्ध अपूर्व में ही [धर्म]होने योग्य हैं, सर्वत्र नहीं । (समाधान) इस विषय में कहते हैं—दर्शपूर्णमासाभ्यां यजेत यहां (=इस वाक्य में) याग विशेष में धर्मों का विधान नहीं किया जा सकता है । क्या कारण है ? जब यजि में धर्मों का विधान किया जाता है, तब यजि का अनुवाद होता है—यजन करे इस प्रकार । यदि यजि का विधान किया जाता है, [तो वह] धर्मों के साथ सम्बद्ध नहीं होता है । दो विधीयमान अर्थों का परस्पर सम्बन्ध नहीं होता है । और [यजि का] अनुवाद होता हुआ विशेष न होने से सब यागों का अनुवाद है । इस कारण धर्म सबके लिये हैं । (आक्षेप) दर्श-पूर्णमास शब्द [यजि का] विशेषक होगा । (समाधान) दर्शपूर्णमास शब्द याग को विशेषित नहीं कर सकता । यह (=दर्शपूर्णमासाभ्यां यजेत में 'यजेत' पद) विधि हो सकता है अथवा अनुवाद हो सकता है । जब अनुवाद होगा तब धर्म सबके लिये होंगे और वह धर्म का सम्बन्ध याग के अनुवाद से ही उन (=दर्शपूर्णमास यागों) का सिद्ध है ।

**विवरण**—**यजिविशेषसम्बन्धेन**—'दर्शपूर्णमासाभ्यां यजेत' 'ज्योतिष्टोमेन यजेत' में दर्शपूर्णमास से और ज्योतिष्टोम से सम्बद्ध जो यागविशेष है, उनके सम्बन्ध से धर्मों का विधान किया है । **यजेतेत्थम्**—इन धर्मों के साथ याग करे । **विधिर्वा स्यात्**—'यजेत' को विधि मानने पर धर्मों के साथ सम्बन्ध नहीं होगा, सम्बन्धविधायक वचन के न होने से । **यदानुवादः**—जब 'यजेत' अनुवाद होगा तब **यागमुद्दिश्य धर्मा विधीयन्ते** (=याग को उद्देश करके धर्मों का विधान किया जाता है) ऐसा स्वीकार करने पर 'यजि' मात्र का अनुवाद होने से धर्म सबके लिये होंगे ।

---

१. द्र०—दर्शपूर्णमासाभ्यां यजते । ऐ० ब्रा० १।१।।

२. द्र०—वसन्ते वसन्ते ज्योतिष्टोमेन यजेत । आप० श्रौत १०।२।५।।

३. 'अत्र वदामः'—पाठान्तरम् ।

ननु निवृत्तिकरो भविष्यति। दर्शपूर्णमासावेवेत्थं कुर्यान्नान्यानिति। नैवं शक्यम्। यत्करणं न तस्यान्यनिवृत्तिरर्थः। ननु परिसंख्यया करिष्यति। नात्र परिसंख्या युज्यते। यद्यन्येन वाक्येन यागमात्रे धर्मप्रसङ्गः कृतः स्यात् तत एतत् पुनर्वचनं[1] परिसंख्यां कुर्यात्। अथ पुनरसति प्रसंगेऽनेनैव प्रसङ्गोऽनैव 'निवृत्तिरिति, अतिभार एकस्यैव वाक्यस्य भवति।

एवं तर्हि, नात्र यजेतेति शब्दो धर्मविधिभिः संबध्यते, यजेत इत्थमिति। केन तर्हि? दर्शपूर्णमासशब्देन। प्रत्यक्षो हि तेनास्य संयोगः—**दर्शपूर्णमासाभ्यां यजेत** इति। परोक्षो धर्मविधिभिः। कस्तदा वाक्यार्थः? दर्शपूर्णमासौ कुर्यादिति।

---

व्याख्या—(आक्षेप) [दर्शपूर्णमास शब्द] निवृत्ति करने वाला होगा। दर्शपूर्णमास ही ऐसा करे, अन्यों को न करे। (समाधान) ऐसा नहीं हो सकता है। जो करण [कारक] है, उसका 'अन्य की निवृत्ति' अर्थ नहीं है। (आक्षेप) परिसंख्या [अन्य की निवृत्ति] कर देगी। (समाधान) यहां परिसंख्या युक्त नहीं होती है। यदि अन्य वाक्य से यागमात्र में धर्म का प्रसङ्ग (=प्राप्ति) होवे तो उससे यह पुनः [दर्शपूर्णमास आदि] वचन परिसंख्या करे। और [यागमात्र में] प्रसङ्ग (=प्राप्ति) के न होने से इसी (='दर्शपूर्णमासाभ्यां यजेत' वचन) से ही प्रसक्ति और निवृत्ति होवे, यह एक ही वाक्य का अतिभार होता है।

**विवरण—यत्करणं इत्यादि—'धनुषा विध्यति'** कहने पर वेधन क्रिया में धनुष करण है, साधक है। इतना ही अर्थ बोधित होता है। उसका असिना न विध्यति (=तलवार से वेधन नहीं करता) यह अर्थ नहीं होता है। **परिसंख्या करिष्यति**—अन्य से सामान्य रूप से प्राप्त को किसी नियत विषय में बांधना (=रोकना) परिसंख्या कहाती है अर्थात् जहां इष्ट है वहां तथा जहां इष्ट नहीं है वहां, उभयत्र प्राप्ति होने पर अनिष्ट के परित्याग का विधान करना परिसंख्याविधि कहाती है। यथा—ब्राह्मणों को दही दो कौण्डिन्य को तक्र (=मट्ठा) दो। यहां कौण्डिन्य के ब्राह्मण होने से पूर्व वाक्य से दही देना प्राप्त है उसकी कौण्डिन्य के तक्रदान से निवृत्ति होती है। परिसंख्या में स्वार्थहानि, परार्थकल्पना और प्राप्तबाधा ये तीन दोष होते हैं (द्र०—मी० १।३।३१ भाष्य तथा विवरण, भाग १, पृष्ठ १८५)।

व्याख्या—(आक्षेप) अच्छा तो यहां **'यजेत'** शब्द धर्मविधियों से सम्बद्ध नहीं होता है—इस प्रकार यजन करे। तो किसके साथ सम्बद्ध होता है? दर्शपूर्णमास शब्द के साथ। इस (=यजेत) का प्रत्यक्ष ही उस (=दर्शपूर्णमास) के साथ सम्बन्ध है—दर्शपूर्णमासाभ्यां यजेत। धर्मविधि के साथ [सम्बन्ध] परोक्ष है। तो उस अवस्था में क्या वाक्यार्थ होगा?

---

१. 'ततः पुनर्वचनं' पाठान्तरम्।

२. 'निवृत्तिर्विधीयेत। भिद्येत तर्ह्येवं वाक्यम्। भवत्वेवं तर्हि' पाठान्तरम्।

नैवं शक्यम्। एवं सति धर्मा असम्बद्धाः पारिप्लवा भवन्ति। कथं कृत्वा ? यैयमाख्यातिकी विभक्तिर्यजेतेति, सा दर्शपूर्णमासयोः कर्तव्यतां विदधाति। तत्र कथं यागमात्रेण यागविशेषेण वा धर्मसम्बन्धः स्यात् ? विधायिका विभक्तिर्नास्तीत्यसम्बद्धा धर्मा भवन्ति। नैष दोषः। न वयं वाक्येन धर्माणां सम्बन्धं करिष्यामः। केन तर्हि ? प्रकरणेन। कथम् ? कर्तव्यतायां चोदितायामितिकर्तव्यताकाङ्क्षा भवति, कथं कुर्यादिति। प्रकरणेन धर्माः सम्बध्यन्ते, इत्थं कुर्यादिति।

नैवं शक्यम्। यदा हि दर्शपूर्णमासौ कर्तव्यतया चोद्येते, तदेतिकर्तव्यताकाङ्क्षैव नास्ति। प्रज्ञातेतिकर्तव्यतात्वात्तयोः। असत्यां चेतिकर्तव्यताकाङ्क्षायां प्रकरणमेव नास्ति। एवं तर्ह्युक्तम्—**असंयुक्तं प्रकरणादितिकर्तव्यतार्थित्वाद्**[1] इति। एवं तर्हि, नैवात्र यागे धर्मा विधीयन्ते। नापि दर्शपूर्णमासयोः कर्तव्यतोच्यते। किं तर्हि ? **दर्शपूर्णमासाभ्यां यजेत** इति पदद्वयेन विशिष्टं यागमनूद्यात्र धर्मा विधीयन्ते, दर्शपूर्णमासाभ्यां यजेतेत्थमिति। एवमपि दर्शपूर्णमासाभ्यामित्य-

---

दर्शपूर्णमासों को करे। ऐसा नहीं हो सकता है। ऐसा होने पर धर्म असम्बद्ध हुए पारिप्लव (=अस्थिर) होते हैं। यह कैसे ? जो यह 'यजेत' आख्यातिकी विभक्ति है वह दर्शपूर्णमासों की कर्तव्यता का विधान करती है। उस अवस्था में यागमात्र के साथ अथवा याग विशेष के साथ धर्म का सम्बन्ध कैसे होगा ? [धर्म संबन्ध की] विधायिका विभक्ति न होने से धर्म असम्बद्ध होते हैं। यह दोष नहीं है। हम वाक्य के द्वारा धर्मों का सम्बन्ध नहीं करेंगे। तो किससे करोगे ? प्रकरण से। कैसे ? कर्तव्यता की चोदना (=विधि) होने पर इतिकर्तव्यता की आकाङ्क्षा होती है—कैसे करे। प्रकरण से धर्म सम्बद्ध होते हैं—इस प्रकार करें।

(समाधान) ऐसा नहीं कर सकते। जब दर्शपूर्णमास कर्तव्यरूप से कहे जाते हैं, तब (=उस समय) इतिकर्तव्यता की आकाङ्क्षा ही नहीं है। उनके विज्ञात इतिकर्तव्यता वाले होने से। इतिकर्तव्यता की आकाङ्क्षा न होने से (दर्शपूर्णमास का) प्रकरण ही नहीं है। इसी से ऐसा कहा है—असंयुक्तं प्रकरणाद् इतिकर्तव्यतार्थित्वात् (=[श्रुति लिङ्ग और वाक्य से] असम्बद्ध इतिकर्तव्यता की आकाङ्क्षा वाला होने से प्रकरण से सम्बद्ध होता है)। (आक्षेप) अच्छा तो, न याग में धर्मों का विधान किया जाता है और नाही दर्शपूर्णमास की कर्तव्यता कही जाती है। तो क्या कहा जाता है ? दर्शपूर्णमासाभ्यां यजेत इन दो पदों से विशिष्ट याग का अनुवाद करके धर्मों का विधान किया जाता है—'दर्शपूर्णमासों से यजन करे' इस प्रकार। (समाधान) इस प्रकार भी 'दर्शपूर्णमासाभ्याम्' यह अनुवाद युक्त नहीं

---

१. (अ० ३३। अ० ४ सू० ११)।

नुवादो न युज्यते। तृतीयार्थस्यासिद्धत्वात्। पूर्ववानुवादो भवति। अपूर्वश्च तृतीयार्थः। सोऽवश्यं विधातव्यः। तस्मिंश्च विधीयमानेऽन्यदेवासम्बद्धमापद्यते, दर्शपूर्णमासौ यजेः करणमिति। तस्मात्स एव प्रथमः पक्षोऽस्तु;यागानुवादेन धर्माणां विधिरिति।

ननु तत्रापि दर्शपूर्णमासाभ्यामित्येतन्न संबध्यते। ननु संभन्त्स्यते। कालवचनः सन् प्रायिको नित्यानुवादो भविष्यति। प्रायेण यागानां दर्शपूर्णमासकालत्वात्। तृतीया च कालस्यार्थकृतं गुणभावमालोच्योपपद्यते। तथा चेत्सर्वे धर्माः सर्वार्था भवन्ति ॥२॥

**चोदनाशेषभावाद्वा तद्भेदाद्व्यवतिष्ठेरन्नुत्पत्तेर्गुणभूतत्वात् ॥३॥ (उ०)**

कर्मचोदनायाः शेषभूतो धर्मसमाम्नायः, एकदेशभूत इत्यर्थः। दर्शपूर्णमासाभ्यां यजेत, अनयाऽन्यन्वाधानादिकयेतिकर्तव्यतयेति। तस्यां चोदनायां यजेर्गुण-

---

होता है। तृतीयार्थ के असिद्ध होने से। अनुवाद पूर्ववान् (=पूर्व कहे हुए) का होता है। और तृतीया का अर्थ अपूर्व है, वह अवश्य विधान करने योग्य है। उसके (=तृतीयार्थ के) विधीयमान होने पर अन्य ही असम्बद्ध [अर्थ] उपपन्न होता है—दर्शपूर्णमास यज् धातु का करण है, यह अर्थ। इसलिये वही प्रथम पक्ष होवे—याग के अनुवाद से धर्मों की विधि है।

(आक्षेप) इस पक्ष में भी 'दर्शपूर्णमासाभ्याम्' यह पद सम्बद्ध नहीं होता। (समाधान) सम्बद्ध हो जायेगा। ['दर्शपूर्णमासाभ्याम्' यह] काल को कहने वाला होकर प्रायिक नित्य अनुवाद हो जायेगा। प्रायः करके यागों के दर्श और पूर्णमास काल वाले होने से। और तृतीया काल के अर्थतः प्राप्त गुण भाव की दृष्टि से उपपन्न होती है, और ऐसा होवे तो [दर्शपौर्णमास प्रकरण में कहे गये] सब धर्म सबके लिये होते हैं।

चोदनादिशेषत्वाद् वा तद्भेदाद् व्यवतिष्ठेरन्नुत्पत्तेर्गुणभूतत्वात् ॥३॥

सूत्रार्थः—(वा) वा शब्द पूर्वपक्ष की निवृत्ति के लिये है। (चोदनाशेषभावात्) प्रयाज आदि धर्मों के दर्शपूर्णमास विधि के शेषभूत होने से (तद्भेदात्) भावना के भेद होने से (व्यवतिष्ठेरन्) प्रयाज आदि धर्म दर्शपूर्णमास के ही व्यवस्थित होंगे। (उत्पत्तेः) प्रयाज आदि धर्मों की विधि के (गुणभूतत्वात्) गुणभूत होने से अर्थात् दर्शपूर्णमास के लिये होने से।

व्याख्या—धर्मों का पाठ कर्म (=दर्शपूर्णमास) की विधि के शेषभूत होने से अर्थात् एकदेशभूत होने से दर्शपौर्णमासाभ्यां यजेत (=दर्शपूर्णमास से यजन करे) इस अन्यन्वाधान आदि इतिकर्तव्यता के द्वारा। उस (=दर्शपूर्णमास की) विधि में याग का गुण भाव

भावः श्रूयते, दर्शपूर्णमासाभ्यामिति । दर्शपूर्णमासशब्दो हि यजिवचनः । करणभावोऽत्र यजेः श्रूयते—दर्शपूर्णमासाख्येन यागसमुदायेनान्यत्कुर्यादिति । 'यत्ततोऽन्यत्, तत्कर्तव्यतया चोद्यते, न यजिः । अपूर्वं च तत् । ननु फलमत्र वाक्ये श्रूयते, स्वर्गकामो यजेतेति । तत्कर्तव्यं स्यात् । सत्यं श्रूयते, न तु तद्यजिना क्रियते । विनष्टे यजौ तद्भवति । अपूर्वं तु तेन क्रियते । तस्मात्तस्य कर्तव्यतोच्यते । यस्य कर्तव्यता तदितिकर्तव्यतया सम्बध्यते । तस्मादपूर्वार्था धर्माः । तेषां चापूर्वाणां भेद उक्तः । अतस्तद्भेदाद्यथाप्रकरणं व्यवतिष्ठन्ते धर्मा इति ।

अथैतस्मिन् पक्षे कथं दर्शपूर्णमासशब्देन यागो विशेष्यते । उच्यते । नैवात्र यागो विशेष्यते । किं तर्हि ? अपूर्वभावनैवोभयपदविशिष्टोच्यते । यथा—**अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति**[2] इति । विषम उपन्यासः । तत्र ह्यन्यद्द्रव्यमन्यो

---

सुना जाता है – दर्शपूर्णमासों से [यजन करे] । दर्शपूर्णमास शब्द निश्चय ही याग का वाचक है । यहां याग का करणत्व सुना जाता है—दर्शपूर्णमास संज्ञा वाले यागसमुदाय से अन्य करे । जो अन्य है, वह कर्तव्यतारूप से कहा गया है, न कि याग । और वह अपूर्व है । (आक्षेप) यहां वाक्य में फल सुना जाता है—स्वर्ग की कामनावाला यजन करे । [अतः] वह (=स्वर्ग) कर्तव्य होवे । (समाधान) सत्य ही [स्वर्ग] सुना जाता है, परन्तु वह याग से नहीं किया जाता । याग के नष्ट हो जाने पर वह (=स्वर्ग) उत्पन्न होता है । उस याग से तो अपूर्व पैदा होता है इससे उस (=अपूर्व) की कर्तव्यता कही है । जिसकी कर्तव्यता कही है वह इतिकर्तव्यतारूप से सम्बद्ध होता है । इसलिये [प्रयाजादि] धर्म अपूर्व के लिये और उन अपूर्वों का भेद कहा जा चुका है । इससे अपूर्व के भेद होने से यथाप्रकरण धर्म व्यवस्थित होंगे (=संबद्ध होंगे) ।

विवरण – अपूर्वाणां भेद उक्तः—अपूर्वों का भेद द्वितीय अध्याय से कहा गया है अर्थात् अपूर्व भेद ही द्वितीय अध्याय का प्रयोजन है ।

व्याख्या—(आक्षेप) इस पक्ष में भी दर्शपूर्णमास शब्द से याग कैसे विशेषित होगा? (समाधान) यहां [दर्शपूर्णमास शब्द से] याग विशेषित नहीं होता है । तो क्या होता है ? अपूर्व की भावना ही दोनों पदों से विशेषित कही जाती है । जैसे अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति में । (आक्षेप) यह दृष्टान्त विषम है । वहां (=अरुणया आदि

---

१. 'यत्तदन्यत्, तत् तत्कर्तव्यतया चोद्यते । तदितिकर्तव्यतया सम्बध्यते न यजिः'—पाठान्तरम् ।

२. अनुपलब्धमूलम् । द्र०—एकहायन्या क्रीणाति ·····अरुणया पिङ्गाक्ष्या क्रीणाति । तै० सं० ६।६।१।७।।

गुणः। तेन तत्रोभयविशेषणत्वं[1] युज्यते। इह पुनर्याग एव तौ दर्शपूर्णमासौ। तेनेहोभयपदविशेषणत्वं न युज्यते। उच्यते। इहापि यजेतेति सामान्यं, दर्शपूर्णमासाविति विशेषः। अन्यच्च सामान्यमन्यो विशेषः। एवमपि श्रुत्या [2]सामान्यस्य भावना, वाक्याद् विशेषस्य[3]। न चैतद् युगपद्भवतीति। एवं तर्हि, नैवात्र श्रुत्यर्थः परिगृह्यते। किं तर्हि? वाक्यार्थः। किं कारणम्? श्रुत्यर्थे परिगृह्यमाणे दर्शपूर्णमासशब्दोऽनर्थको भवति। यजतिश्चानुवादः। यजत्यात्मकत्वाद्दर्शपूर्णमासयोः। यजतिसामानाधिकरण्याच्च दर्शपूर्णमासशब्दस्य ॥३॥

**सत्त्वे लक्षणसंयोगात्सार्वत्रिकं प्रतीयेत ॥४॥ (उ०)**

---

वाक्य में) तो द्रव्य अन्य है और गुण अन्य है। इससे उभयपद विशेषणत्व युक्त है। यहां तो याग ही वे दर्शपूर्णमास हैं। इससे उभयपद विशेषणत्व युक्त नहीं होता है। (समाधान) यहां भी 'यजेत' यह सामान्य है। 'दर्शपूर्णमासौ' यह विशेष है। सामान्य अन्य है और विशेष अन्य है। (आक्षेप) इस प्रकार भी श्रुति से सामान्य (=यजेत) का कथन है और वाक्य से विशेष (=दर्शपूर्णपूर्णमासौ) का। ये दोनों युगपत [सम्बद्ध] नहीं हो सकते। (समाधान) अच्छा तो यहां श्रुति का अर्थ परिगृहीत नहीं होता। तो क्या [परिगृहीत होता] है? वाक्यार्थ। क्या कारण है? श्रुत्यर्थ के परिगृहीत होने पर दर्शपूर्णमास शब्द अनर्थक होता है और यज् धातु अनुवाद होता है। दर्शपूर्णमास के यजति रूप होने से। और दर्शपूर्णमास शब्द का यजति के साथ सामानाधिकरण्य होने से।

विवरण—अरुणया पिङ्गाक्ष्या ··—यहां अरुण आदि गुण और गौ दोनों से विशिष्ट क्रयरूप भावना कही जाती है। एवमपि श्रुत्या ·· युगपद् भवति—भट्टकुमारिल ने इस भाष्य का खण्डन किया है। उसे उसकी इसी सूत्र की टुप्टीका में देखें ॥३॥

**सत्त्वे लक्षणसंयोगात् सावत्रिकं प्रतीयेत ॥४॥**

सूत्रार्थः—(सत्त्वे) गौ आदि व्यक्तियों में (लक्षणसंयोगात्) लक्षणा वृत्ति के सम्बन्ध से (सार्वत्रिकम्) सर्व व्यक्तियों में 'पैर से नहीं छूना चाहिये' आदि धर्म (प्रतीयेत) जाना जाये। अर्थात् आकृति के पदार्थ होने से गौ के विषय में कहे गये धर्म उसमें सम्भव नहीं हैं, इसलिये लक्षणा वृत्ति से तत्सहचरित व्यक्ति में ये धर्म जाने जाते हैं।

विशेष सत्त्व धर्मों के लिये इसी प्रकरण का दूसरा सूत्र और उसका भाष्य देखें।

---

१. तेन उभयपदविशेषणत्वं' पाठान्तरम्।
२. 'सामान्येन' पाठान्तरम्। ३. 'विशेषेण' पाठान्तरम्।

यत्तु सत्त्ववदिति । अत्र गवाकृतौ धर्मः श्रूयते, आकृतेः पदार्थत्वात् । न च तत्र सम्भवति । अतोऽसावाकृतिः सहचारिपिण्डलक्षणार्था विज्ञायते । यथा गङ्गायां घोष इति । तच्च साहचर्यं सर्वपिण्डानामविशिष्टमिति सर्वपिण्डेषु विहितं भवति । तस्मात्तत्सार्वत्रिकं प्रतीयेत । इह तु यजेर्गुणभावेन श्रवणान्नैव यजौ धर्माः श्रूयन्ते । क्व[1] तर्हि ? अपूर्व इति । एवमपदिष्टो हेतुः । तस्मादनुपन्यासः सत्त्ववदिति ॥४॥

## अविभागात्तु नैवं स्यात् ॥५॥ (पू०)

अथ तुशब्दः पक्षव्यावृत्तौ । नैतदेवम् , अपूर्वप्रयुक्ता धर्मा इति । यजिप्रयुक्ता एव । कुतः ? अविभागात् । यजिनाऽविभागो धर्माणाम् । प्रत्यक्षं केचिद् द्रव्ये श्रूयन्ते, केचिद्देवतायां, केचिन्मन्त्रेषु । एष च यजिः—यद् द्रव्यं देवतामुद्दिश्य मन्त्रेण त्यज्यते । स एष प्रत्यक्षो यजिना सम्बन्धो धर्माणाम् । अपूर्वेण त्वानुमानिकः ।

---

व्याख्या—जो सत्त्ववत् ऐसा कहा (इस विषय में कहते हैं)—यहां गौ रूप आकृति (=जाति) में 'पदा न स्प्रष्टव्या' आदि धर्म सुना जाता है आकृति के पदार्थ होने से । उसमें (=आकृति में) धर्म सम्भव नहीं होता । इसलिये यह आकृति सहचारी पिण्डरूप लक्षणा से जाना जाता है । जैसे– गङ्गायां घोषः (=गङ्गा में गोपालों की बस्ती) । [यहां सामीप्य-रूप लक्षणा से गङ्गातीर अर्थ जाना जाता है ।] और वह साहचर्य सब पिण्डों में सामान्य है इसलिये [उक्त धर्म] सब पिण्डों में विहित होता है । इससे उसे सार्वत्रिक जानें । यहां तो याग के गुणभाव से श्रवण होने से [प्रयाजादि धर्म] याग में नहीं सुने जाते । तो कहां सुने जाते हैं ? अपूर्व में । इस प्रकार [सत्त्ववत् हेतु] ठीक नहीं है । इससे सत्त्ववत् दृष्टान्त का कथन युक्त नहीं है । ४॥

### अविभागात् तु नैवं स्यात् ॥५॥

सूत्रार्थः— (तु) तु शब्द पूर्व उक्त पक्ष की निवृत्ति के लिये है । (अविभागात्) याग के साथ धर्मों के विभक्त न होने से । अर्थात् याग के साथ धर्मों का श्रवण होने से । (एवम्) इस प्रकार अर्थात् अपूर्व में धर्म का श्रवण है, यह (न) नहीं (स्यात्) हो सकता ।

व्याख्या—तु शब्द पक्ष की निवृत्ति के लिये है । 'अपूर्व से प्रयुक्त धर्म हैं' यह ऐसा नहीं है । याग से प्रयुक्त ही [धर्म हैं], किस हेतु से ? विभाग न होने से । धर्मों का याग से विभाग नहीं है । प्रत्यक्ष ही कुछ [धर्म] द्रव्य में सुने जाते हैं, कुछ देवता में और कुछ मन्त्रों में । यही याग [का स्वरूप] है, जो 'देवता को उद्देश करके मन्त्र से द्रव्य छोड़ा जाता है ।' यह धर्मों का याग के साथ प्रत्यक्ष सम्बन्ध है, अपूर्व के साथ तो आनुमानिक है । फल के प्रति

---

१. 'किं तर्हि' पाठान्तरम् ।

फलेऽपि यजेः प्रत्यक्षश्रुतो गुणभावः—स्वर्गकामो यजेत[1] इति । आनुमानिकोऽपूर्वेण । अनुमानाच्च प्रत्यक्षं बलीयः । तस्माद्यज्यर्था धर्माः ।

ननु यजिर्भङ्गित्वात् कालान्तरे फलं दातुमसमर्थः । तत्र कृता धर्मा अनर्थका[2] एव भवन्तीत्युक्तम् ।

अत्र स्थितस्य न्यायस्याऽऽक्षेपेण प्रत्यवस्थानं क्रियते । तैलपानवदेतद्भविष्यति । यथा तैलपानं घृतपानं वा भङ्गित्वेऽपि सति कालान्तरे 'मेधास्मृतिबलपुष्ट्यादीनि फलानि करोति । एवं यजिरपि करिष्यति, किं नोऽदृष्टाश्रुतेनापूर्वेण कल्पितेनेति ॥५॥

## द्वयर्थत्वं च विप्रतिषिद्धम् ॥६॥ (पू०)

एवं च सति सर्वे धर्माः सर्वार्था भवन्ति । तथा चैन्द्राग्नादिषु प्रयाजादयः सन्ति । तत्र सौर्ये कर्मणि प्रयाजानां दर्शनमुपपद्यते—**प्रयाजे प्रयाजे कृष्णलं जुहोति**[3]

---

भी याग का प्रत्यक्षश्रुत गुणभाव है स्वर्गकामो यजेत में । अपूर्व के साथ [याग का] आनुमानिक [सम्बन्ध] है । अनुमान से प्रत्यक्ष बलवान् है, इसलिये याग के लिये ही धर्म है ।

(आक्षेप) याग के नाशवान् होने से वह कालान्तर में फल देने में असमर्थ है । [इस कारण] उसमें (=याग में) किये गये धर्म अनर्थक ही होते हैं, यह कह चुके हैं ।

यहां स्थित (=निर्धारित) न्याय की आक्षेप द्वारा पुनः उपस्थिति की जाती है—तैलपान के समान यह हो जायेगा । जैसे तैल का पीना, घृत का पीना [यहां पान क्रिया के] नाशवान् होने पर भी [वह] कालान्तर में बुद्धि स्मृति बल पुष्टि आदि फल देता है । इसी प्रकार याग भी [कालान्तर में फल] देगा । अदृष्ट अश्रुत कल्पित अपूर्व से हमारा क्या प्रयोजन ? अर्थात् बिना अदृष्ट की कल्पना के भी याग कालान्तर में फल देने में समर्थ है ।

विवरण—अनर्थका एव भवन्तीत्युक्तम्—द्र०—मी० २।१।५ सूत्र का भाष्य । स्थितस्य न्यायस्य—यहां मी० २।१।५ के अपूर्वास्तित्वाधिकरण में विचारित न्याय से तात्पर्य है ॥५॥

### द्वयर्थत्वं च विप्रतिषिद्धम् ॥६॥

सूत्रार्थः—(च) और (द्वयर्थत्वम्) दो अर्थ के लिये होना (विप्रतिषिद्धम्) विरुद्ध है ।

व्याख्या—और ऐसा होने पर सब धर्म सबके लिये होते हैं । और ऐन्द्राग्नि आदि [विकृति यागों] में प्रयाजादि श्रुत हैं । वहां (=सबका धर्म होने पर) सौर्य (=सूर्य देवता के) कर्म में प्रयाजों का दर्शन उपपन्न होता है - प्रयाजे प्रयाजे कृष्णलं जुहोति (=प्रति प्रयाज कृष्णल का होम करता है) । अन्यथा (=धर्मों को सबके लिये न मानने पर) [सौर्य-

---

१. अनुपलब्धमूलम् । द्र०—दाक्षायणयज्ञेन सुवर्गकामो यजेत । तै० सं० २।५।४।४॥

२. 'असमर्थाः' पाठान्तरम् । ३. 'मेधाधृति०' पाठान्तरम् । ४. तै० सं० २।३।२।३॥

इति । इतरथा प्रयाजाश्च विधातव्याः, प्रयाजेषु च कृष्णलहोमः । तथा च द्वयर्थं तत्स्यात् । द्वयर्थत्वं च विप्रतिषिद्धम् । तस्माद्यजिप्रयुक्ता धर्मा इति ॥६॥

**उत्पत्तौ विध्यभावाद् वा चोदनायां प्रवृत्तिः स्यात् ततश्च कर्मभेदः स्यात् ॥७॥ (सू०)**

नैतदेवं, यजिप्रयुक्ता धर्मा इति । चोदनायां प्रवृत्तिः स्यात् । चोदनेत्यपूर्वं ब्रूमः । चोदनार्थत्वात् अपूर्वार्थत्वादपूर्वप्रयुक्ता धर्माः । फलवत्त्वादित्युक्तो हेतुः । यत्तु प्रत्यक्षो यजिसम्बन्धो धर्माणामिति । अत्र ब्रूमः—उत्पत्तौ विध्यभावात् ।

---

याग में] प्रयाजों का विधान करना होगा, और प्रयाजों के विषय में कृष्णल होम का । और ऐसा मानने पर [उक्त वाक्य] दो प्रयोजन वाला होगा । द्वयर्थता विप्रतिषिद्ध है, इससे धर्म याग से प्रयुक्त हैं ।

विवरण—ऐन्द्राग्नादिषु—द्र० पूर्व ७।१।१; पृष्ठ २०३४ विवरण । कृष्णलं जुहोति—गुञ्जा (=रत्ती) के परिमाण का सुवर्णमय गोल द्रव्य (विशेष द्र०—मी० २।२।४ व्याख्या, पृष्ठ ४५४) । द्वयर्थं तत् स्यात्—दर्शपूर्णमास में विहित प्रयाजादि धर्म सब यागों के नहीं माने जायेंगे तो सौर्य याग में प्रयाजे प्रयाजे कृष्णलं जुहोति वाक्य के द्वारा प्रयाज का भी विधान करना होगा, और प्रयाज को उद्देश्य करके कृष्णल होम का भी । दो अर्थों के विधान में वाक्य-भेद मानना पड़ेगा । अतः द्वयर्थता को अनुचित माना गया है ॥६॥

**उत्पत्तौ विध्यभावाद् वा चोदनायां प्रवृत्तिः स्यात् ततश्च कर्मभेदः स्यात् ॥७॥**

सूत्रार्थः—(वा) वा शब्द पूर्व उक्त पक्ष की निवृत्ति के लिये है । (उत्पत्तौ) याग में धर्मों की (विध्यभावाद्) विधि के न होने से (चोदनायाम्) अपूर्व अर्थ में धर्मों की (प्रवृत्तिः) प्रवृत्ति (स्यात्) होवे । (ततश्च) और उससे=अपूर्व के भेद होने से (कर्मभेदः) कर्म का भेद (स्यात्) होवे ।

विशेष—चोदना शब्द से अपूर्व कहा जाता है । यह पूर्व अ० २, पा० १, सूत्र ५ के भाष्य में कहा और यहां भी यही अर्थ दर्शाया है । अपूर्व के भेद से कर्मों में भेद होता है, यह द्वितीय अध्याय में विस्तार से दर्शाया है ।

व्याख्या—ऐसा नहीं है कि धर्म यागप्रयुक्त है ।[धर्मों की] चोदना में प्रवृत्ति होवे । चोदना से अपूर्व को कहते हैं । चोदनार्थ होने से=अपूर्वार्थ होने से धर्म अपूर्व से प्रयुक्त है । [अपूर्व के] फलवान् होने से, यह हेतु कह चुके । और जो कहा—धर्मों का याग के साथ प्रत्यक्ष सम्बन्ध है, इस विषय में कहते हैं—उत्पत्ति में विधि का अभाव होने से । उत्पत्ति से

उत्पत्तिरिति यजि ब्रूमः। उत्पत्तौ यजौ नास्ति विधिः। यज्यर्था धर्मा इति। केवलं यजौ श्रूयन्ते, क्रियन्ते च। नैतावता तदर्था भवन्ति। यथा, वाससि रागः श्रूयते—वासो रञ्जयतीति, वाससि च क्रियते। न चासौ तदर्थः। स्त्र्यर्थः पुरुषार्थो वा भवति। एवमिहापि यजौ श्रूयमाणाः क्रियमाणाश्चापूर्वार्था भवेयुरर्थवत्त्वाय। ततश्च कर्मभेदः स्यात्। यतोऽपूर्वार्था इति।

यश्च यजेः प्रत्यक्षः फले गुणभाव इति, स नाकृत्वाऽपूर्वं भवतीति प्राणालिको विज्ञायते। प्रणाड्याऽपि च येन क्रियते तत्कारणं भवति। यथा, गोमयैः पचति, तुषपक्वा भवन्तीति। यत्तु तैलपानवद् यजितः फलं 'भविष्यतीति। अत्र ब्रूमः। तैलपानस्यापि न कालान्तरे फलं भवति। धातुसाम्यं तस्य फलम्। तच्च तत्कालमेव। यच्च फलं बलपुष्ट्यादि, तत्सम्यगाहारपरिणामाद्भवति। तस्माद् विषम उपन्यासः ॥७॥

---

याग को कहते हैं। उत्पत्ति=याग में [धर्मों की] विधि नहीं है—याग के लिये धर्म है। केवल याग में सुने जाते हैं और किये जाते हैं। इतने मात्र से उसके लिये नहीं होते हैं। जैसे वस्त्र में रङ्ग सुना जाता है—'वस्त्र को रङ्गता है' से वस्त्र में रङ्ग करता है। वह (=रङ्ग) वस्त्र के लिये नहीं। स्त्री के लिये अथवा पुरुष के लिये होता है। इसी प्रकार यहां भी याग में सुने गये और किये गये [धर्म] अपूर्व के लिये होवें अर्थवान् होने के लिये। इसलिये कर्मभेद होवे। क्योंकि [ये धर्म] अपूर्व के लिये हैं।

विवरण—फलवत्त्वादित्युक्तो हेतुः—यह मी० २।१।५ के भाष्य में कहा है। कर्मभेदः स्यात्—प्रति कर्म धर्म होवें।

व्याख्या और जो कहा फल के प्रति याग का प्रत्यक्ष गुणभाव है, वह [फल] अपूर्व को विना उत्पन्न किये नहीं होता है। इसलिये प्राणालिक (=परम्परा से होने वाला) [फल के प्रति याग का गुणभाव] जाना जाता है। परम्परा से भी जो किया जाता है वह कारण होता है। जैसे—उपलों से [चावल] पकाता है, तुषों से पके हुए [चावल] होते हैं। और जो तैलपान के समान याग से फल होगा, कहा, इस विषय में कहते हैं—तैलपान का भी कालान्तर में फल नहीं होता। उसका फल धातुसाम्य है और वह [धातुसाम्य] तत्काल ही होता है। और जो बल पुष्टि आदि फल है वह सम्यक् आहार के परिणाम (=पाचन) से होता है। इससे यह दृष्टान्त विषम है।

विवरण गोमयैः पचति—पाक क्रिया प्रत्यक्ष उपलों से नहीं होती है, अपितु उपलों की जो अग्नि है उससे पाक क्रिया होती है। इसी प्रकार तुष पक्व में भी साक्षात् तुषों से ओदन

---

१. 'भवति'—पाठान्तरम्।

## यदि वाऽप्यभिधानवत्सामान्यात्सर्वधर्मः स्यात् ॥८॥ (पू०)

यद्यप्यपूर्वं प्रयोजकं धर्माणां, तथाऽपि सर्वधर्मः स्यात्, स स पदार्थः। अभिधानवत्सामान्यात्। अभिधानं तावदेतेषां समानम् अपूर्वमिति। अभिधानवद्धर्मेणाप्यस्य समानेन भवितव्यम्। वाहीकवत्। यथा[1], वाहीकोऽतिथिरागतः, यवान्नमस्मै प्रक्रियतामित्युक्ते यो यो वाहीकस्तस्य तस्य यवान्नं क्रियते। यथा वा, अक्ष्यामये मुद्गौदनो भोक्तव्यः, उदरामये पयः पातव्यमिति। सर्वत्र च हि, अक्ष्यामये मुद्गौदनो भुज्यते, उदरामयेऽपि पयः पीयते। एवमिहाप्येकस्यापूर्वस्य ये धर्माः श्रुतास्ते सर्वापूर्वाणां भवितुमर्हन्ति।

---

आदि का पाक नहीं होता, अपितु तुषों की अग्नि से होता है। धातुसाम्यं तस्य फलम् वात पित्त कफ आदि जो धातुएं हैं, उनकी विषमता से रोग होता है। वातजनित रोग की निवृत्ति के लिये तैलादि का पान कहा गया है। उससे कुपित हुआ वात साम्यावस्था को प्राप्त होता है। यह इसका तात्पर्य है। सम्यगाहारपरिणामात्—यहां सम्यक् आहार से पथ्य रूप में लिया गया आहार अभिप्रेत है। उस आहार के सम्यक् परिपाक से बलादि प्राप्त होता है, यह तात्पर्य है ॥७॥

## यदि वाऽप्यभिधानवत् सामान्यात् सर्वधर्मः स्यात् ॥८॥

सूत्रार्थः—(वा) वा शब्द पूर्व उक्त पक्ष की निवृत्ति के लिये है। (यद्यपि) यद्यपि प्रयाजादि धर्म अपूर्व प्रयोजक होवें, तथापि (अभिधानवत्) संज्ञा के समान (सामान्यात्) अपूर्व के सामान्य होने से प्रयाजादि (सर्वधर्मः) सब यागों के धर्म (स्यात्) होवें।

व्याख्या—यद्यपि धर्मों का प्रयोजक अपूर्व है, फिर भी वे सबके धर्म होवें [अर्थात्] वह-वह पदार्थ। अभिधान के समान सामान्य होने से। 'अपूर्व' यह अभिधान इन सबका समान है। अभिधान के समान इसके (=अपूर्व के) धर्म को भी समान होना चाहिये, वाहीक के समान। जैसे 'वाहीक अतिथि आया है, इसके लिये यवान्न तैयार करो' ऐसा कहने पर जो-जो वाहीक होगा उस-उस के लिये यवान्न किया जाता है। अथवा जैसे आंख के रोग में मुद्गौदन (=खिचड़ी) खानी चाहिये, उदर रोग में दूध पीना चाहिये [ऐसा कहने पर] सर्वत्र ही आंख के रोग में खिचड़ी खाई जाती है और उदर रोग में दूध पिया जाता है। इसी प्रकार यहां पर भी एक अपूर्व के जो धर्म सुने गये हैं, वे सब अपूर्वों के होने चाहिये।

विवरण—वाहीकोऽतिथिरागतः—यद्यपि वाहीक देश का वाचक है तथापि यहां तद्देश-विशिष्ट व्यक्ति कहा जाता है। महाभारत कर्ण पर्व ४४।७ में वाहीक देश का इस प्रकार वर्णन किया है—

---

१. 'तद्यथा'—पाठान्तरम्।

अपि च, अरुणपराशरा नाम शाखिनः। तेषां परिचरेषु स्मृतिरूपं ब्राह्मणं भवति—ये दर्शपूर्णमासयोर्धर्मास्ते सर्वेष्टीनामग्नीषोमीयस्य च, इत्यारभ्य, यावत्-सर्वाः प्रकृतिविकृतयोऽनुक्रान्ता इति। तच्चानुक्रमणमेतमेव न्यायं सूचयति। तस्मादपूर्वप्रयुक्तत्वेऽपि सर्वे धर्माः सर्वार्था इति ॥८॥

**अर्थस्य त्वविभक्तत्वात्तथा स्यादभिधानेषु पूर्ववत्त्वात्प्रयोगस्य कर्मणः शब्दभावनत्वाद्विभागाच्छेषाणामप्रवृत्तिः स्यात् ॥९॥**

---

पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तरा स्थिताः। वाहीका नाम ते देशाः।

अर्थात्—सिन्ध सहित सतलज, व्यास, रावी, चिनाव और झेलम नदियों के मध्य जो देश हैं वे वाहीक कहाते हैं। दूसरे शब्दों में स्वतन्त्रता प्राप्ति के पूर्व का पूरा पञ्जाब।

व्याख्या—और भी अरुणपराशर नाम के शाखा वाले हैं। उनके परिचर (= समुदाय) में स्मृतिरूप ब्राह्मण होता है—ये दर्शपूर्णमासयोर्धर्मास्ते सर्वेष्टीनाम् अग्नीषोमीयस्य च (=जो दर्शपूर्णमास के धर्म हैं वे सब इष्टियों के और अग्नीषोमीय के हैं) यहां से लेकर यावत् सर्वाः प्रकृतिविकृतयोऽनुक्रान्ताः (= जितनी सभी प्रकृति और विकृतियां कही गयी हैं उन सबका) तक। यह अनुक्रमण (= कथन) इसी न्याय को सूचित करता है। इसलिये [धर्मों के] अपूर्व प्रयुक्त होने पर भी सब धर्म सबके लिये हैं।

विवरण—महाभाष्य तथा चरणव्यूह आदि में जो वेदों की ११३१ शाखायें कही गई हैं वे सब प्रायः भगवान् कृष्ण द्वैपायन व्यास और उनके शिष्य प्रशिष्यों के द्वारा प्रोक्त हैं। कृष्ण द्वैपायन व्यास से पूर्व भी अनेक बार शाखाओं का प्रवचन हुआ था। अतः ऐतरेय के समान अरुणपराशर शाखा उनमें सम्मिलित नहीं है। यह प्राचीन शाखा है। भट्टकुमारिल ने तन्त्रवार्तिक १।३।११ में अरुणपराशर शाखा के ब्राह्मण के विषय में लिखा है—अरुणपराशर-शाखा ब्राह्मणस्य कल्परूपत्वात् (पूना सं० पृष्ठ २३१) अर्थात् अरुणपराशर शाखा का ब्राह्मण कल्परूप है। सम्भव है भट्टकुमारिल के इस मत का आधार शबरस्वामी का 'तेषां परिचरेषु स्मृतिरूपं ब्राह्मणं भवति' वचन हो। महाभाष्य ४।२।६० में पाराशरकल्पिकः प्रयोग मिलता है ॥८॥

अर्थस्य त्वविभक्तत्वात् ····· स्यात् ॥९॥

सूत्रार्थः—(तु) तु शब्द पूर्वपक्ष की निवृत्ति के लिये है। (अर्थस्य) वाहीकदेशसम्बद्ध अर्थ के (अविभक्तत्वात्) एक होने से (अभिधानेषु) वाहीक पुरुषों में (तथा स्यात्) वैसा होवे। (प्रयोगस्य) 'वाहीक को यवान्न दो' वचन के (पूर्ववत्त्वात्) पूर्ववान् होने से अर्थात् इसका पूर्व भी अनेक बार प्रयोग होने से सामान्य देशसम्बन्ध जाना जाता है। (कर्मणः) प्रयाजादि

उपवर्णनापरिहारस्तावदुच्यते । यदुक्तं वाहीकवदिति । अत्र ब्रूमः । अर्थस्य त्वविभक्तत्वात्तथा स्यादभिधानेषु । अर्थो वाहीकत्वं तद्देशसम्बन्धः, सोऽविभक्तः । सर्ववाहीकेष्वनुगत इत्यर्थः । तन्निमित्तश्च प्रीतिविशेषो न पुरुषनिमित्तः । कथं ज्ञायते ? पूर्ववत्त्वात्प्रयोगस्य । पूर्ववानत्र प्रयोगः । बहुशो वाहीकाश्चावाहीकश्च भोजिताः । तत्रान्वयव्यतिरेकाभ्यां ज्ञातमेतत्, देशनिमित्तेयं यवान्नप्रियता, न पुरुषनिमित्ता । तस्मात्तथा स्यात्, वाहीकादिष्वभिधानेषु । अथेह कर्मणः शब्दभाव्यत्वान्नान्यतः शक्यमेतज्ज्ञातुं, के कस्यापूर्वस्य धर्मा इति । शब्देन च व्यवस्थिता[1] विज्ञाता धर्माः । अपूर्वाणां च विभागः, अतः शेषाणामन्यत्र विहितानामन्यत्राप्रवृत्तिः स्यात् ॥९॥

## स्मृतिरिति चेत् ॥१०॥ (आ०)

अथ यदुक्तं स्मृतिरिति । तस्य कः परिहारः । ॥१०॥

---

कर्म के (शब्दभाव्यत्वात्) शब्द द्वारा ही गम्यमान होने से (विभागात्) कर्मजन्य अपूर्व के भेद होने से (शेषाणाम्) प्रयाजादि धर्मों की (अप्रवृत्तिः स्यात्) सर्वत्र प्रवृत्ति न होवे ।

व्याख्या—पहले समीप में वर्णित का परिहार कहते हैं । जो कहा 'वाहीकवत्' इसमें हम कहते हैं—अर्थ के अविभक्त होने से वाहीक वाच्य पुरुषों में वैसा होवे । वाहीकत्व जो अर्थ है वह देश सम्बन्धवाला है । वह (=देश) अविभक्त है । अर्थात् सब वाहीकों में अनुगत है । और प्रीतिविशेष उसमें निमित्त है पुरुषनिमित्त नहीं । अर्थात् यवान्नप्रियता वाहीक देशनिमित्तक है न कि अभ्यागत अतिथिविशेषनिमित्तक । कैसे जाना जाता है ? प्रयोग के पूर्ववान् होने से । यह [वाहीकाय यवान्नम्] प्रयोग पूर्ववान् है, अर्थात् पहले भी बहुधा प्रयुक्त है । बहुत बार वाहीक और अवाहीक पुरुषों को भोजन कराया, उस समय अन्वय व्यतिरेक से यह जाना कि यवान्नप्रियता देशनिमित्तक है, न कि पुरुषनिमित्तक । उससे वैसा होवे । वाहीकादि के कथन में [सामान्यार्थत्व होवे] । और यहां कर्म के शब्दभावी होने से अन्य प्रकार से नहीं जाना जा सकता कि कौन किस अपूर्व के धर्म हैं । शब्द से व्यवस्थित हुए धर्म जाने जाते हैं । और अपूर्वों का विभाग जाना जाता है । इसलिये अन्यत्र विहित [प्रयाजादि] शेष धर्मों की अन्यत्र प्रवृत्ति न होवे ॥९॥

### स्मृतिरिति चेत् ॥१०॥

सूत्रार्थः—(स्मृतिः) स्मृति प्रमाण होवे (इति चेत्) ऐसा कहो तो ।

व्याख्या—और जो कहा स्मृति है, उसका क्या परिहार है ॥१०॥

---

१. 'व्यवस्थया विहिता धर्माः'—पाठान्तरम् ।

## न पूर्ववत्त्वात् ॥११॥ (आ० नि०)

पूर्ववती हीयं स्मृतिः। चोदकं धर्मग्राहकं वक्ष्यति। **विध्यन्तो वा प्रकृतिवद्**[1] इति। तेन प्राप्तिानां धर्माणामयमनुवादः। एतन्न्यायपूर्विका, नाप्राप्तानां विधायिका। यत्कारणं व्यवस्था धर्माणामेतेन न्यायेन भवति ॥११॥

## अर्थस्य शब्दभाव्यत्वात्प्रकरणनिबन्धनाच्छब्दादेवान्यत्र भावः स्यात् ॥१२॥

इदं निगमनसूत्रम्। निगमनं च प्रतिज्ञाया हेतोश्च पुनर्वचनम्। तदिदमुच्यते—

यस्मादेवं, तस्मादर्थस्य अग्न्यन्वाधानादेः, शब्दभाव्यत्वात्, प्रतिप्रकरणं च निबन्धनाच्छब्दादेवान्यत्र भावः स्यात्। यथा—**गन्धर्वाप्सरसो वा एतमुन्मादयन्ति य उन्माद्यत्येता वै गन्धर्वाप्सरसो यद् राष्ट्रभृतम्। तस्मै स्वाहा ताभ्यः**

---

### न पूर्ववत्त्वात् ॥११॥

**सूत्रार्थः**—(न) यह स्मृति प्रमाण नहीं है (पूर्ववत्त्वात्) पूर्ववती होने से। अर्थात् प्रकृतिवद् विकृतिः कर्त्तव्या वचन से प्राप्त हुए धर्मों का स्मृति अनुवाद करती है।

**व्याख्या**—यह स्मृति पूर्ववती है। धर्म को ग्रहण करानेवाले चोदक वचन को कहेंगे—विध्यन्तो वा प्रकृतिवत् (मी० ७।४।१०)। अर्थात् प्रकृति के समान विकृति में विधि होती है। उससे प्राप्त कराये गये धर्मों का यह अनुवाद है। यह स्मृति न्यायपूर्विका है, अप्राप्तों की विधायिका नहीं है। जिस कारण से धर्मों की व्यवस्था होती है वह इस न्याय से होती है ॥११॥

### अर्थस्य शब्दभाव्यत्वात् ···· ···स्यात् ॥१२॥

**सूत्रार्थः**—(अर्थस्य) अग्न्यन्वाधानादि अर्थ के (शब्दभाव्यत्वात्) शब्दभावी होने से और (प्रकरणनिबन्धनात्) प्रतिप्रकरण [उनका] निबन्धन होने से (शब्दात्) शब्द से (एव) ही (अन्यत्र भावः) अन्यत्र होना (स्यात्) होवे अर्थात् अन्यत्र प्राप्ति होवे।

क्वचिच्छ्रूयते—**वासो ददाति**[2], **अनो ददाति**[3] इति। तत्र विचार्यते—किं वाससोऽनसश्च क्रिया प्राप्यत उत नेति ? तत्राऽऽह। एवं तावन्नः परीक्ष्यम्। किं कर्मनिमित्तावेतौ शब्दावुताऽऽकृतिनिमित्ताविति ? यदि कर्मनिमित्तौ, ततः प्राप्यते। अथाऽऽकृतिनिमित्तौ, ततो नेति। किं तावत् प्राप्तम् ? कर्मनिमित्ताविति। कुतः ? कर्माममे तद्दर्शनात्। यदा तस्मिन् द्रव्ये, दारुणि सूत्रे वा दारुकारेण तन्तुवायेन वा कर्म कृतं भवति, तदैतौ शब्दौ प्रवर्तेते न प्राक्। अतो विज्ञायते कर्मनिमित्ताविति। यदा कर्मनिमित्तौ, तदेतदारभ्यते—

---

व्याख्या—अथवा स्वरसामत्व के सामान्य होने से, एककपालत्व के सामान्य होने से तथा आमिक्षा के सामान्य होने यस्य लिङ्गमर्थसंयोगात् (मी० ८।१।२) (=जिस कर्म का लिङ्ग अर्थ के संयोग से देखा जाता है उसके सामान्य होने से वे धर्मों के ग्राहक होते हैं) से प्राप्ति होती है। [विशेष आगे यथास्थान देखें] ॥२७॥

---

व्याख्या—कहीं सुना जाता है—वासो ददाति (=वस्त्र देता है), अनो ददाति (=शकट=गाड़ी देता है)। वहां विचार किया जाता है कि क्या वस्त्र की और शकट की क्रिया प्राप्त होती है अथवा नहीं ? इस प्रकार हमारे लिये पहले परीक्षा के योग्य है—क्या [ये वासः और अनः] कर्मनिमित्त वाले ये शब्द हैं अथवा आकृति निमित्त वाले ? यदि कर्म निमित्त वाले हैं तो क्रिया प्राप्त होती है। यदि आकृति निमित्त वाले हैं तो क्रिया प्राप्त नहीं होती। क्या प्राप्त होता है ? [वासः और अनः] कर्मनिमित्तक हैं। किस हेतु से? कर्म के होने पर उन [शब्दों] का दर्शन होने से। जब जिस द्रव्य में—काष्ठ वा सूत में बढ़ई द्वारा अथवा जुलाहे द्वारा कर्म किया हुआ होता है तब ये शब्द प्रवृत्त होते हैं पहले प्रयुक्त नहीं होते। इससे जाना जाता है कि ये कर्मनिमित्तक हैं। जब कर्मनिमित्तक हैं, तब यह सूत्र आरम्भ किया जाता है—

---

१. मी० अ० ८, पा० १, सूत्र २।
२. तै० ब्रा० १।१।६।११॥ मै० सं० ४।८।३॥
३. अनुपलब्धमूलम्। द्र०—यदनो वा रथं वा [ददाति] मै० सं० ४।८।३॥

## कर्मजे कर्म यूपवत् ॥२८॥ (पू०)

कर्मजे कर्म यूपवत्। कर्मजे-एतस्मिन्वास आदौ द्रव्ये श्रूयमाणे, कर्म प्राप्यते। कथम्? यूपवत्। यथा यूपशब्दो जोषणादिक्रियानिमित्तः स यत्र श्रूयते, तत्र जोषणाद्याः क्रियाः प्राप्यन्ते, एवमिहापीति ॥२८॥

अत्रोच्यते—

## रूपं वाऽशेषभूतत्वात् ॥२९॥ (उ०)

नैतौ कर्मनिमित्तौ। किं कारणम्? ये नैमित्तिकाः शब्दास्ते निमित्तमुपलभ्य प्रयुज्यन्ते। यथा, दण्डी छत्रीति। इमौ त्वनुपलभ्य क्रियामाकृतिमात्रे प्रयुज्येते। तस्मान्नैतौ क्रियानिमित्तावितिं। अथोच्येत[1], आकृत्या क्रियामनुमाय ततः शब्दं

---

कर्मजे कर्म यूपवत् ॥२८॥

सूत्रार्थः—(कर्मजे) कर्म=क्रियानिमित्तक वासः और अनः के होने पर (कर्म) क्रिया प्राप्त होती है (यूपवत्) यूप के समान। जैसे यूप शब्द का प्रयोग वहीं होता है, जहां काष्ठ तक्षण आदि से विशिष्ट आकृति वाला बनाया जाता है।

व्याख्या—कर्मज में कर्म प्राप्त होता है यूप के समान। कर्मज में—इस वासः आदि द्रव्य के श्रूयमाण होने पर कर्म प्राप्त होता है। कैसे? यूप के समान। जैसे यूप शब्द लक्षण आदि क्रियानिमित्तक है। अतः वह [यूप शब्द] जहां सुना जाता है वहां तक्षणादि क्रियाएं प्राप्त होती हैं। इसी प्रकार यहां भी।

इस विषय में कहते हैं—

रूपं वाऽशेषभूतत्वात् ॥२९॥

सूत्रार्थः—(वा) वा शब्द क्रियानिमित्तक होने से क्रिया प्राप्त होती है इस पक्ष की निवृत्ति के लिये है। (रूपम्) रूप=आकृति ही निमित्त है। (अशेषभूतत्वात्) क्रिया के शेषभूत न होने से अर्थात् प्रकृत कर्मकाल में तन्तुवाय तथा दारुक की क्रियाओं के अङ्गरूप से विहित न होने से। यूप आदि में तो यूपं तक्षति आदि क्रियाओं का प्रत्यक्ष विधान है।

व्याख्या—ये (वासः अनः) क्रियानिमित्तक नहीं हैं। क्या कारण है? जो नैमित्तिक शब्द होते हैं वे निमित्त को पाकर प्रयुक्त होते हैं। जैसे दण्डी छत्री [छत्र और दण्ड निमित्त होने पर ही इन का प्रयोग होता है]। ये दोनों तो क्रिया को उपलब्ध न करके आकृतिमात्र में प्रयुक्त होते हैं। इसलिये ये क्रियानिमित्तक नहीं हैं। यदि कहो कि आकृति से क्रिया का अनु-

---

१. 'अत्रोच्यते'—पाठान्तरम्।

प्रयुङ्क्त इति। अत्र ब्रूमः—प्रत्यक्षामाकृतिनिमित्ततां गम्यमानामुत्सृज्य, अदृष्टायां क्रियायां निमित्तत्वकल्पनायां हेतुर्नास्तीति। यत्तूक्तं, क्रियोत्तरकालं प्रवृत्तिदर्शनादिति। अत्र ब्रूमः—प्राक् क्रियाया आकृतिरनभिव्यक्ता। सा क्रिययाऽभिव्यज्यते। यतः क्रियोत्तरकालं शब्दप्रयोगः। तस्माद् आकृतिनिमित्तौ। यदैवं तदा सिद्धं रूपं देयम्। कुतः? अशेषभूतत्वात्। नात्र क्रिया शेषभूता। क्रियावाचिनः शब्दस्याभावात्। यूपे तु प्रत्यक्षविहिता जोषणाद्याः क्रियाः। तस्माद् यूपवदिति, अतुल्योपन्यासः ॥२९॥

---

## [गर्गत्रिरात्रे लौकिकाग्नेरुपनिधेयत्वाधिकरणम् ॥१२॥]

गर्गत्रिरात्र आज्यदोहानि सामानि प्रकृत्य श्रूयते—अग्निमुपनिधाय स्तुवते[1]

---

मान करके शब्द का प्रयोग करता है। इस विषय में कहते हैं—प्रत्यक्ष गम्यमान आकृतिनिमित्तता को छोड़कर अदृष्ट क्रियानिमित्तत्व कल्पना में हेतु नहीं है। और जो कहा कि [वयन और तक्षण] क्रिया के उत्तर काल में [वासः अनः] की प्रवृत्ति के दर्शन से [ये क्रियानिमित्तक हैं]। इस विषय में कहते हैं—क्रिया के पहले आकृति अनभिव्यक्त है। वह आकृति क्रिया से अभिव्यक्त होती है। जिस कारण क्रिया के उत्तर काल में शब्द का प्रयोग होता है। इसलिये ये आकृतिनिमित्तक हैं। जब ऐसा है तो सिद्ध(=निष्पन्न) रूप देय है। किस हेतु से? शेषभूत न होने से। यहां (=वासः अनः में) क्रिया शेषभूत नहीं है, क्रियावाची शब्द के अभाव से। यूप में तो प्रत्यक्ष विहित हैं जोषण आदि क्रियाएं। इसलिये यूपवत् यह उपन्यास (=दृष्टान्त) [उभयत्र] समान नहीं है ॥२९॥

विवरण—अनुपलभ्य क्रियाम्—कर्मकाल में विहित किसी क्रिया को उपलब्ध न करके, अर्थात् कर्मकाल में वासः की वयन तथा अनः की तक्षण आदि क्रियाओं के करने का विधान नहीं है। अदृष्टायां क्रियायाम्—इसके दो तात्पर्य हो सकते हैं। (१) वासः अनः के निर्माण की क्रिया अदृष्ट है, वासः अनः की उपलब्धि प्रत्यक्ष है। (२) जैसे यूप में कर्म शेषभूत अङ्गभूत क्रिया प्रत्यक्ष विहित है उसी प्रकार वासः और अनः की वयन तथा तक्षण आदि क्रिया प्रत्यक्ष कर्म के अङ्गरूप से विहित नहीं है। उनके निर्माण की क्रिया कर्मकाल से बहिर्भूत होने से अदृष्ट है ॥२९॥

---

व्याख्या—गर्गत्रिरात्र में आज्यदोह [संज्ञक साम] को अधिकृत करके सुना जाता है—अग्निमुपनिधाय स्तुवते (=अग्नि का उपनिधान=स्थापन करके स्तुति करता है;

---

१. तां० ब्रा० २१।२।६॥

इति। अत्र विशयः। किं लौकिकोऽग्निरुपनिधेय उत वैदिक इति। किं प्राप्तम्? वैदिक इति। कुतः? सर्वकर्मार्थं उत्पन्नोऽसौ। यान्यहं कर्माणि करिष्ये यैश्चास्म्यधिकृत इति। अतो वैदिक उपनिधेय इति। एवं प्राप्त उच्यते—

**विशये लौकिकः स्यात् सर्वार्थत्वात् ॥३०॥ (उ०)**

विशये लौकिकः स्यात्सर्वार्थित्वात्। एतस्मिन् विशये—लौकिकं वैदिकमिति, लौकिकः स्यात्। कुतः? सर्वार्थित्वात्। लौकिकः सर्वार्थः। न तस्य कार्यं किंचिन्निर्दिष्टम्। अतो यद्यदग्निना कर्तव्यं दृष्टमदृष्टं वा तत्तदुपादीयमानमविरुद्धम्। तस्माल्लौकिकः स्यात् ॥३०॥

अथ यदुक्तम्—वैदिकं सर्वकर्मार्थमुत्पन्नम्। तस्मात्तदुपनिधेयमिति। अत्र ब्रूमः—

**न वैदिकमर्थनिर्देशात् ॥३१॥ (उ०)**

---

सामगान करता है)। यहां सन्देह होता है क्या लौकिक अग्निका उपनिधान करना चाहिये अथवा वैदिक का। क्या प्राप्त होता है? वैदिक का। किस हेतु से? वह(=वैदिक अग्नि)सब कर्मों के लिये उत्पन्न हुआ है। मैं जिन कर्मों को करूंगा और जिन कर्मों के लिये मैं अधिकृत हूं। इस से वैदिक अग्नि उपनिधेय है। इस प्रकार प्राप्त होने पर कहते हैं—

**विशये लौकिकः स्यात् सर्वार्थत्वात् ॥३०॥**

सूत्रार्थः—(विशये) संशय होने पर (लौकिकः) लौकिक अग्नि उपनिधेय (स्यात्) होवे। उसके (सर्वार्थित्वात्) सब प्रयोजनों के लिये होने से।

व्याख्या—संशय में लौकिक अग्नि होवे सर्वार्थ होने से। इस संशय में—लौकिक होवे वा वैदिक? लौकिक होवे। किस हेतु से? सब प्रयोजनों के लिये होने से। लौकिक अग्नि सब प्रयोजनों के लिये है। उसका कोई कार्य निर्दिष्ट नहीं है। इस से जो-जो अग्नि से कर्तव्य है दृष्ट अथवा अदृष्ट [प्रयोजन वाला कर्म] उसे उस-उस का उपादान अविरुद्ध है। इससे लौकिक अग्नि होवे ॥३०॥

व्याख्या—जो यह कहा है—वैदिक अग्नि सब कर्मों के लिये उत्पन्न हुआ है। इससे वह उपनिधेय है। इस विषय में कहते हैं—

**न वैदिकमर्थनिर्देशात् ॥३१॥**

सूत्रार्थः—(वैदिकम्) वैदिक अग्नि सर्वार्थ (न) नहीं है। (अर्थनिर्देशात्) उस अग्नि के प्रयोजन विशेषों का उल्लेख होने से।

न वैदिकमग्निद्रव्यं शास्त्रेणोत्पादितम्, तस्य शास्त्रेणैव कार्यं निर्दिष्टं, **यदाहवनीये जुहोति**[1] इत्यारभ्य। तस्मिन् सर्वार्थे कल्प्यमाने निर्देशोऽनर्थकः स्यात्। तस्माल्लौकिकोऽग्निरुपनिधेयः। सर्वार्थत्वं चैषां स्वे स्वे कार्ये वर्त्तमानानां भविष्यति। एवमुभयमविरुद्धं, सर्वार्थत्वं निर्देशश्चेति ॥३१॥

अथ धिष्ण्या अग्नयः कस्मान्नोपनिधीयन्ते। अत्रोच्यते—

**तथोत्पत्तिरितरेषां समत्वात् ॥३२॥ (अति०)**

इतरेषामप्यग्नीनां धिष्ण्यानां तथोत्पत्तिः, न सर्वार्थ इत्यर्थः। कुतः? समत्वात्। एतेऽपीतरेरग्निभिः समाः। एतेषामपि निर्दिष्टं कार्यम्—**प्रागासीनो**

---

व्याख्या—[वैदिक अग्नि सर्वार्थ] नहीं है। वैदिक अग्नि द्रव्य शास्त्र से उत्पादित है। उस का शास्त्र से ही कार्य निर्दिष्ट है—यदाहवनीये जुहोति (=जो आहवनीय में होम करता है) इत्यादि। उस [वैदिक अग्नि] के सर्वकार्यार्थ कल्पना करने पर निर्देश अनर्थक होवे। इसलिये लौकिक अग्नि का स्थापन करना चाहिये। [वैदिक अग्नियों का] सर्वार्थत्व स्व-स्व कार्य में वर्तमान अग्नियों का होगा। इस प्रकार सर्वार्थत्व और निर्देश दोनों ही अविरुद्ध हैं।

विवरण—इत्यारभ्य—से तात्पर्य है जैसे आहवनीयाग्नि के कार्य की विधायिका श्रुति दर्शाई है तद्वत् गार्हपत्य और दक्षिणाग्नि में होने वाले कार्यों की श्रुतियां भी जाननी चाहियें। निर्देशोऽनर्थकः स्यात् का तात्पर्य है कि वैदिक अग्नि के सर्वार्थत्व होने पर यदाहवनीये जुहोति इत्यादि निर्देश भी अनर्थक होगें। सर्वार्थत्वं चैषां स्वे स्वे कार्ये—इसके लिये सर्वत्वमाधिकारिकम् (मी० १।२।१६) सूत्र और उसका भाष्य अनुसन्धेय है ॥३१॥

व्याख्या—(आक्षेप) धिष्ण्या स्थान की अग्नियों का उपनिधान क्यों नहीं करते? इस विषय में कहते हैं—

**तथोत्पत्तिरितरेषां समत्वात् ॥३२॥**

सूत्रार्थः—(इतरेषाम्) धिष्ण्या स्थानीय अग्नियों की (उत्पत्तिः) प्रादुर्भाव भी (तथा) वैसा ही है अर्थात् सर्वार्थ नहीं है (समत्वात्) इन का भी कार्य अन्य अग्नियों के समान होने से। [धैष्ण्य अग्नियों का कार्यबोधक वचन भाष्य में देखें।]

व्याख्या—अन्य धिष्ण्य स्थानीय अग्नियों की उत्पत्ति भी उसी प्रकार है अर्थात् सर्वार्थ नहीं। किस हेतु से? सम होने से। वे अग्नियां भी इतर (=आहवनीय आदि) अग्नियों के समान हैं। इन का कार्य भी निर्दिष्ट है—प्रागासीनो धिष्ण्यानाधारयति (=पूर्व में बैठा

---

१. तै० सं० १।१।१०।१॥

धिष्ण्यानाधारयति[1] इति। अतस्ते नोपनिधेया इति ॥३२॥

---

[उपशये यूपशब्दस्य संस्कारानतिदेशकत्वाधिकरणम् ॥१३॥]

एकादशिन्यां श्रूयते—**उपशयो यूपो भवति**[2] इति। तत्र सन्देहः—किमेतदुपशयद्रव्यं[3] संस्कृतं, जोषणादयः संस्कारा अत्र कर्तव्या उत नेति ? किं युक्तम् ?

---

हुआ धिष्ण्य अग्नियों का आधारण करता है अर्थात् उनमें आज्य की आहुतियां देता है)। इसलिये उनका (=धिष्ण्यस्थानीय अग्नियों का) उपनिधान नहीं करना चाहिये ॥३२॥

विवरण—प्रागासीनः—पूर्व में बैठने पर आहुति देनेवाले का मुख पश्चिम दिशा की ओर होगा। तै० सं० १।३।१।४ में प्रत्यङासीनः धिष्णियान् व्याधारयति वचन है तदनुसार पश्चिम में बैठने पर मुख पूर्व की ओर होगा। भट्टभास्कर ने 'प्राङ्मुखः' अर्थ ही किया है। भाष्यकार द्वारा उद्धृत पाठ में और वैत्तिरीय संहिता के पाठ में जो भेद (प्रागासीनः, प्रत्यङासीनः) है वह सम्भव है शाखान्तरकृत् हो। धिष्ण्यास्थ अग्नियों के व्याधारण प्रकार के लिये आप० श्रौत १३।१४।५ तथा कात्या० श्रौत १०।६।१४ देखें ॥३२॥

---

व्याख्या—एकादशिनी में सुना जाता है—उपशयो यूपो भवति (=उपशय नाम का यूप होता है)। उसमें सन्देह है—क्या यह उपशयसंज्ञक द्रव्य संस्कृत है ? इस में लक्षण आदि संस्कार करने चाहिये अथवा नहीं ? क्या युक्त है ?

विवरण—एकादशिन्याम्—अर्थात् ११ यूपों का समूह। जिस याग में ११ पशु होते हैं उसमें उन्हें बांधने के लिये ११ यूप गाड़े जाते हैं। ये यूप महावेदि के पूर्व में स्थापित होते हैं। इन यूपों की ऊंचाई भी विषम होती है। इन के गाड़ने का क्रम और प्रति यूप ऊंचाई इस प्रकार जाननी चाहिये—

वर्षिष्ठो दक्षिणोऽनुपूर्वा इतरे (कात्या० श्रौत ८।८।१६) अर्थात् यूपों में दक्षिण यूप वर्षिष्ठ=सब से ऊंचा २६ अरत्नि परिमाणवाला होवे। उस के पश्चात् क्रमशः न्यून ऊंचाई के। अर्थात् शेष १० यूप २५, २४, २३, २२, २१, २०, १९, १८, १७, १६ अरत्निपरिमाण वाले होते हैं। इन के निखनन के कई पक्ष हैं। उन्हें श्रौतसूत्रों से जानना चाहिये। उपशयो यूपो भवति—१२ वां यूप उपशय संज्ञक होता है। इस का परिमाण ५ अरत्नि परिमाण का

---

१. अनुपलब्धमूलम्। द्र०—प्रत्यङासीनो धिष्णियान् व्याधारयति। तै० सं० १।३।१।४॥ प्रत्यङासीनः—प्राङ्मुख इति भट्टभास्करः।

२. अनुपलब्धमूलम्। द्र०—द्वादश उपशयो भवति। शत० ३।७।२।१॥

३. 'उपशयवाच्यं, संस्कृतम्' पाठान्तरम्।

## संस्कृतं स्यात्तच्छब्दत्वात् ॥३३॥ (पू०)

संस्कृतं स्यात्। कर्तव्या अत्र जोषणादयः संस्काराः। कुतः ? तच्छब्दत्वात्। अयं यूपशब्दः संस्कारनिमित्तः। स एषोऽसत्सु संस्कारेषु नोपपद्यते। तस्मात्ते कार्या इति ॥३३॥

## भक्त्या वाऽयज्ञशेषत्वाद् गुणानामभिधानत्वात् ॥३४॥ (उ०)

न वा कर्तव्याः। कुतः ? अयज्ञशेषत्वात्। एते संस्कारा अस्मिन् काष्ठे क्रियन्ते। एतेन द्वारेण यजतिना सम्भत्स्यन्ते। इत्थं संस्कृते काष्ठे नियुक्तेन पशुना यजिः क्रियमाणोऽपूर्वं निर्वर्तयतीति। अस्मिंश्चोपशये न पशुर्नियुज्यते, तत्र कृताः

---

होता है। यह १२ वां वषिष्ठाद् दक्षिणं वितष्टद्वादशं निदधाति (कात्या० ८।८।२२)। उपशय यूप वितष्ट=विगत तष्ट अर्थात् अतष्ट विना तक्षण किये वषिष्ठ=सब से ऊंचे यूप के दक्षिण में रखे इसे गाड़ा नहीं जाता, भूमिपर लिटाया हुआ रखते हैं। उप=समीपे, वषिष्ठस्य यूपस्य समीपे शेत इत्युपशयः।

### संस्कृतं स्यात् तच्छब्दत्वात् ॥३३॥

**सूत्रार्थः**—उपशय संज्ञक द्रव्य (संस्कृतम्) संस्कृत अर्थात् जोषणादि संस्कारों से युक्त (स्यात्) होवे (तच्छब्दत्वात्) उस शब्द वाला अर्थात् यूप शब्दवाला होने से।

व्याख्या—[उपशय] संस्कृत होवे। यहां जोषणादि संस्कार करने चाहिये। किस हेतु से ? उस शब्द वाला होने से। यह यूप शब्द संस्कारनिमित्तक है। वह यूप शब्द संस्कार न होने पर उपपन्न नहीं होता। इस से उन्हें करना चाहिये ॥३३॥

### भक्त्या वाऽयज्ञशेषत्वाद् गुणानामभिधानत्वात् ॥३४॥

**सूत्रार्थः**—(वा) वा शब्द पूर्व उक्त पक्ष की निवृत्ति के लिये है। उपशय में संस्कार नहीं करने चाहियें। (अयज्ञशेषत्वात्) यज्ञ शेष के न होने से। अर्थात् उपशय का यजति के साथ सम्बन्ध नहीं है क्योंकि उसमें किसी पशु का नियोजन नहीं होता,जिस कारण संस्कार किये जायें। (गुणानाम्) उपशय में कतिपय तूष्णीं छेदनादि यूप गुणों के (अभिधानत्वात्) कथन होने से उपशय में यूप शब्द (भक्त्या) भक्ति=गौणीवृत्ति से प्रयुक्त होता है। यथा यजमानो यूपः में। [यूप के यजमानत्व के कथन के लिये (मी० १।४।२५ सूत्र का भाष्य देखें)]।

व्याख्या—[उपशय में यूपसंस्कार] नहीं करने चाहियें। किस हेतु से ? अयज्ञशेषत्वात्। ये तक्षणादि संस्कार इस काष्ठ में किये जाते हैं। उस [काष्ठ] के द्वारा [वे संस्कार] यजति के साथ सम्बद्ध होंगे। इस प्रकार संस्कृत काष्ठ में नियुक्त पशु से याग किया हुआ अपूर्व को उत्पन्न करता है। इस उपशय में कोई पशु नियुक्त नहीं होता है। इससे उसमें किये गये संस्कार

संस्कारा अनर्थकाः स्युः। ननु वचनसामर्थ्याददृष्टार्था भविष्यन्ति। उच्यते। नात्र वचनं यूपः कर्तव्य इति। वर्तमानापदेशोऽयम्। ननु वर्तमानापदेशोऽपि न घटते संस्काराणामभावे। उच्यते भक्त्या भविष्यति। यथा—**यजमानो वै यूपः**[1] इति। आह। तत्र सादृश्यात्। इह पुनः कथमिति? उच्यते। गुणानामभिधानत्वात्। यूपगुणानां यूपसंस्काराणामभिधानत्वात्। यूपसंस्कारास्तत्र केचिदर्थप्राप्ताश्छेदनादयस्तूष्णीं कृताः सन्ति। तैरयमभिधीयते यूप इत्ययूपः सन्। यथा—स्नाता कन्याऽनलंकृता, मालागुणेनाप्यलंकृतेति। एवमेकदेशेनापि संस्काराणां संस्कृत इति स्तुत्याऽभिधीयते ॥३४॥

———

अनर्थक होंगे। (आक्षेप) वचन सामर्थ्य से [संस्कार] अदृष्टार्थ होंगे। (समाधान) यहां वचन नहीं है कि [उपशय] यूप करना चाहिये। [उपशयो यूपो भवति] यह वर्तमान का कथन करने वाला है। (आक्षेप) संस्कारों के अभाव में [उपशय यूप होता है यह] वर्तमान का कथन भी उपपन्न नहीं होता अर्थात् संस्कारों के अभाव के कारण उपशय को यूप नहीं कह सकते। (समाधान) भक्ति=गौणी वृत्ति से [कथन उपपन्न] हो जायेगा। जैसे—यजमानो वै यूपः में। (आक्षेप) उस [यजमानो वै यूपः] में सादृश्य से कथन होता है। यहां फिर कैसे होगा? (समाधान) गुणों के अभिधान=कथन से। यूप गुण=यूप के संस्कारों के कथन से। कतिपय यूप संस्कार उसमें अर्थात् प्राप्त हैं छेदन आदि तूष्णीं किये हुए विद्यमान हैं। उन के कारण यूप न होते हुए भी यह 'यूप' है ऐसा कहा जाता है। जैसे—स्नान की हुई कन्या अलङ्कार धारण न की हुई भी माला के गुण मात्र से 'अलंकृता' कही जाती है। इस प्रकार संस्कारों के एकदेश से भी संस्कृत हुआ स्तुति से [यूप] कहा जाता है ॥३४॥

विवरण – अस्मिंश्चोपशये न कश्चित् पशुर्नियुज्यते—तात्त्विक कथन यही है कि उसमें कोई पशु नियुक्त (बांधा) नहीं किया जाता। आप० श्रौत १४।७।१ में आरण्यं पशुमालभेतोपशये निर्दिशेत् से आरण्य पशु गवय आदि अथवा चूहे को [पशु मानकर] निर्देश करे। तथा अगले सूत्र में असौ ते पशुरिति द्वेष्यं मनसा ध्यायन् ऐसा निर्देश करे। यहां केवल निर्देश मात्र का उल्लेख है पशु के नियोजन का विधान नहीं है।

कर्काचार्य ने मीमांसादर्शन के उक्त पक्ष को उद्धृत करके मीमांसकों के मत का खण्डन किया है। उसका संक्षिप्त आशय इस प्रकार है—यूप धर्म प्रोक्षण आदि का भी यूप के कार्य-रूप पशुनियोजन प्रयुक्तत्व नहीं है। किन्तु यूपस्वरूपनिष्पादकत्व ही है। इसलिये उपशय में भी

---

१. तै० ब्रा० १।३।७।३॥

[पृष्ठशब्दस्य ऋङ्मन्त्रवाचित्वाधिकरणम् ॥१४॥]

अग्नौ श्रूयते—**पृष्ठैरुपतिष्ठते**[1] इति। तत्र चिन्त्यते—किं पृष्ठधर्माः कर्तव्या उत नेति? के पुनस्ते? सामान्यधर्माः—हिंकारादयः, विशेषधर्माः—**रथन्तरे प्रस्तूयमाने पृथिवीं मनसा ध्यायेत्, बृहति समुद्रम्**[2] इत्येवमादयः। किं तावत् प्राप्तम्? तत आह—एतत्तावन्नः परीक्ष्यम्। किमयं पृष्ठशब्दः कर्मणो वाचक उत द्रव्यस्येति। ननु सिद्धमेतत् कर्मनामधेयं पृष्ठशब्द इति, **यस्मिन् गुणोपदेशः प्रधानतोऽभिसम्बन्धः**[3] इत्यत्र। तास्वेव चोदनास्वेतदुक्तम्—**सप्तदशानि पृष्ठानि**[4] **वैरूपं पृष्ठं**[5], **वैराजं पृष्ठम्** इति। इहेदानीं **पृष्ठैरुपतिष्ठते** इत्यस्यां चिन्त्यते। किं पुनरत्र युक्तम्? तत आह—

---

उनकी निष्पत्यर्थ उनका अनुष्ठान युक्त ही है। और जो कहा भवति यह वर्तमान काल का कथन है, यह भी ठीक नहीं। वर्तमानापदेश का भी पञ्चम लकार (लेट् लकार) की परिकल्पना से विधायकत्व होता है। जैसे आग्नेयोऽष्टाकपालः पुरोडाशो भवति, ऐन्द्रमेकादशकपालं भवति इत्यादि में। इसलिये उपशय में भी धर्मों की प्रवृत्ति युक्त ही है (द्र० कात्या० श्रौत कर्कभाष्य ८।८।२३)॥३४॥

---

व्याख्या—अग्नि में सुना जाता है—पृष्ठैरुपतिष्ठते (=पृष्ठों से उपस्थान करता है)। इस विषय में विचार किया जाता है—क्या पृष्ठों के धर्म करने चाहिये या नहीं? वे[पृष्ठों के धर्म] कौन से हैं? सामान्य धर्म हिंकार आदि हैं। विशेष धर्म—रथन्तर का उच्चारण करते हुए पृथिवी का मन से ध्यान करे, बृहत् के उच्चारण करते हुए समुद्र का ध्यान करे इत्यादि। क्या प्राप्त होता है? उसके अनन्तर कहते हैं—पहले हमारे द्वारा यह परीक्ष्य (=परीक्षा करने योग्य) है। क्या यह पृष्ठ शब्द कर्म का वाचक है अथवा द्रव्य का? (आक्षेप) सिद्ध है कि यह पृष्ठ शब्द कर्म का नाम है—यस्मिन् गुणोपदेशः प्रधानतोऽभिसंबन्धः (=जिस में गुणों का उपदेश है उस का प्रधान के साथ=धात्वर्थ के साथ सम्बन्ध जानना चाहिये अर्थात् वह कर्म नामधेय है) इस सूत्र में। उन्हीं चोदनाओं में यह कहा है—सप्तदशानि पृष्ठानि (=सत्रह पृष्ठ हैं) वैरूपं पृष्ठम्, वैराजं पृष्ठम् (=वैरूपनाम का पृष्ठ है, वैराज नाम का पृष्ठ है)। अब पृष्ठैरुपतिष्ठते इस में विचार करते हैं। यहां क्या युक्त है? इस में कहते हैं—

---

१. तै० सं० ५।५।८।१॥
२. अनुपलब्धमूले। द्र०—तां० ब्रा० ७।७।१५; ७।७।६॥
३. मी० १।४।३॥ ४. तां ब्रा० २०।१।१; २१।६।१॥ ५. अनुपलब्धमूलम्।

**कर्मणः पृष्ठशब्दः स्यात् तथाभूतोपदेशात् ॥३५॥ (पू०)**

कर्मणः पृष्ठशब्दः स्यात् तथाभूतोपदेशात्। कर्मणो वाचकः पृष्ठशब्दः स्यात्। कुतः ? तथाभूतोपदेशात्। यथाभूतः स उपदेशः, यत्रायं[1] पृष्ठशब्दः कर्मनामाधिगतस्तथाभूतोऽयमपि। किमस्य तथात्वम् ? पृष्ठशब्दसामान्यम्। पृष्ठशब्दस्तत्र कर्मवचनोऽधिगतः। स एवायम्। तस्मादिहापि तद्वचन एवावगन्तव्यः,[2] विशेषाभावात्। यद्यत्रान्यार्थः[3] कल्प्येत, एकः शब्दोऽनेकार्थः स्यात्। तत्र को दोषः ? शब्द उच्चरिते संशयः स्यान्नार्थप्रत्ययः। तत्र व्यवहारो न सिध्येत्। व्यवहारार्थश्च शब्दप्रयोगः। कारणान्तरं वा प्रकरणाद्यपेक्ष्यम्। एकार्थत्वे तु निरपेक्षोऽर्थप्रत्ययः। तस्मादनेकार्थत्वमन्याय्यम्। तस्मात् कर्मनाम पृष्ठशब्दः। यदा कर्मनाम, तदा यदि तावत् तानि कर्माणीहोपदिश्यन्ते, तत्रोत्पत्तिरेषामनर्थिका। अथ मा भूदेष दोष इत्येतदुपस्थानं तत्र विज्ञायते। तत इदं प्रकरणं बाध्येत। तस्मात् सादृश्यविधिरयम्। **पृष्ठैरुपतिष्ठते**—पृष्ठसदृशैः कर्मभिरुपतिष्ठत इति। तत् सादृश्यं च धर्मभवति। तस्मात् कर्तव्या धर्मा इति ॥३५॥

---

**कर्मणः पृष्ठशब्दः स्यात् तथाभूतोपदेशात् ॥३५॥**

**सूत्रार्थः**—(पृष्ठशब्दः) पृष्ठशब्द (कर्मणः) कर्म का नाम (स्यात्) होवे, जैसे पृष्ठ शब्द कर्म का नाम है (तथाभूतोपदेशात्) उसी प्रकार पृष्ठैरुपतिष्ठते का कथन होने से।

**व्याख्या**–पृष्ठ शब्द कर्म का नाम होवे उसी प्रकार का कथन होने से। कर्म का वाचक पृष्ठ शब्द होवे। किस हेतु से ? तथाभूत उपदेश होने से। जिस प्रकार का वह उपदेश है जैसे यह पृष्ठ शब्द कर्म नाम जाना गया है, उसी प्रकार का यह (पृष्ठैः स्तुवते) भी है। इस (पृष्ठैः स्तुवते)का तथात्व (=उस जैसा होना) क्या है ? पृष्ठ शब्द सामान्य। पृष्ठ शब्द वहां कर्मवचन जाना गया है। वही यह [पृष्ठ शब्द] है। इसलिये यहां भी उस (=कर्म) को कहने वाला ही जानना चाहिये,विशेष न होने से। यदि यहां('पृष्ठैः स्तुवते' में पृष्ठ शब्द)अन्य अर्थवाला कल्पित होवे तो एक शब्द अनेकार्थक होवे। उसमें क्या दोष है ? पृष्ठ शब्द के उच्चरित होने पर संशय होवे, अर्थज्ञान न होवे। उस अवस्था में व्यवहार सिद्ध न होवे। व्यवहार के लिये ही शब्द प्रयोग होता है। अथवा प्रकरणादि अन्य कारण की अपेक्षा होवे। एकार्थक होने पर तो अर्थ का परिज्ञान निरपेक्ष होगा। इस लिये अनेकार्थत्व अन्याय्य है। इससे पृष्ठ शब्द कर्मनाम है। जब कर्मनाम है तब यदि वे कर्म यहां उपदिष्ट हैं, उस अवस्था में उनकी उत्पत्ति अनर्थक होवे। अथवा यह दोष न होवे इस से उपस्थान वहां जाना जाता है। उससे यह प्रकरण बाधित होता है। इससे तत्सदृश(उस पृष्ठ के सदृश)यह विधि है पृष्ठैः स्तुवते पृष्ठ सदृशों से=कर्मों से उपस्थान करता है और वह सादृश्य धर्मों से होता है। इससे[पृष्ठ कर्मों के]धर्म करने चाहियें।३५।

---

१. 'तथाभूतः स उपदेशः, यथाऽयं पृ'—पाठान्तरम्।
२. 'अवगन्तुं न्याय्यः'—पाठान्तरम्। ३. 'यद्यन्यार्थः'—पाठान्तरम्।

**अभिधानोपदेशाद्वा विप्रतिषेधाद् द्रव्येषु पृष्ठशब्दः स्यात् ॥३६॥ (उ०)**

न चैतदेवं, कर्मणः पृष्ठशब्द इति। किं तर्हि ? द्रव्येषु पृष्ठशब्दः स्यात्, ऋग्द्रव्येषु। **अभि त्वा शूर नोनुमः**[1] इत्येवमादीनामृचां वाचकः। कुतः ? अभिधानोपदेशात्। अभिधानोपदेशोऽयम्—पृष्ठैरुपतिष्ठते इति। पृष्ठैरभिदधातीत्यर्थः। कथं पुनरयमुपस्थानवचनोऽभिधानार्थः शक्यो विज्ञातुम्? उच्यते। उपग्रहविशेषात्। मन्त्रकरण उपतिष्ठतेरात्मनेपदं भवति।[2] मन्त्रस्त्वभिधानस्य करणं नोपस्थानस्य।

---

विवरण—यथायं पृष्ठशब्दः कर्मनामाधिगतः— यस्मिन् गुणोपदेशः स्यात् इत्यादि (मी० १।४।३) सूत्र और उसका भाष्य देखें। व्यवहारार्थश्च शब्दप्रयोगः। यही बात पातञ्जल महाभाष्य (१।१।४४) में भी कही है—अर्थगत्यर्थः शब्दप्रयोगः। अर्थं प्रत्याययिष्यामीति शब्दः प्रयुज्यते। अर्थात् अर्थ की प्रतीति के लिये शब्द का प्रयोग होता है। अर्थ का ज्ञान कराऊंगा इस विचार से शब्द का प्रयोग किया जाता है। अनेकार्थत्वमन्याय्यम्—अन्यत्र भाष्यकार शबरस्वामी ने अन्याय्यश्चानेकार्थत्वम् (मी० भा० १।३।३२;२।१।१२; ३।२।१; ५।४।१४; ६।१।२२) इस प्रकार पढ़ा है। न्यायसुधाकार ने कहा है—अन्याय्यश्चानेकशब्दत्वम् (मी० १।३।२६) इस सूत्र को भाष्यकार ने अन्याय्यश्चानेकार्थत्व के रूप में ऊहित करके पढ़ा है (न्यायसुधा १।३।३२) ॥३५॥

**अभिधानोपदेशाद् वा विप्रतिषेधाद् द्रव्येषु पृष्ठशब्दः स्यात् ॥३६॥**

सूत्रार्थः—(वा) पूर्वपक्ष को निवर्तित करता है—पृष्ठशब्द कर्म का नाम नहीं है। (द्रव्येषु) ऋक्रूपी द्रव्यों में (पृष्ठशब्दः) पृष्ठशब्द (स्यात्) होवे। (अभिधानोपदेशात्) आत्मनेपद अभिधान के उपदेश से (विप्रतिषेधात्) आत्मनेपदोपदेश के साथ विरोध होने से। उपान्मन्त्रकरणे (अष्टा० १।३।२५) से उपपूर्वक तिष्ठति से मन्त्र के करण होने पर आत्मनेपद होता है। इस आत्मनेपद विधान से मन्त्र के करण होने पर ही पृष्ठैः स्तुवते में आत्मनेपद होने से पृष्ठ पद वाच्य मन्त्र ही यहां अभिप्रेत है।

व्याख्या—यह ऐसा नहीं है कि कर्म का वाचक पृष्ठ शब्द है। तो क्या है ? द्रव्यों में पृष्ठ शब्द होवे ऋग् द्रव्यों में। अभि त्वा शूर नोनुमः इत्यादि ऋचाओं का वाचक है। किस हेतु से ? अभिधान के उपदेश से। अभिधान का उपदेश है यह—पृष्ठैरुपतिष्ठते। पृष्ठों से [क्रियमाण उपस्थान क्रिया का] कथन करता है। (आक्षेप) यह उपस्थान का वाचक [उपतिष्ठते] अभिधान अर्थ वाला कैसे जाना जा सकता है ? (समाधान) उपग्रह=आत्मनेपद की विशेषता से। मन्त्र करण होने पर उपपूर्वक तिष्ठति से आमनेपद होता है। मन्त्र तो अभिधान

---

१. साम सं० उ० प्र० १, अर्धप्र० १, मं० १। संहत्य सकलमन्त्रसंख्या ६८०।
२. उपान्मन्त्रकरणे (अ० १।३।२५) इत्यनेन।

उपस्थानं शरीरेण क्रियते, मनसा वा। तस्मादभिधानार्थः। स एष विप्रतिषेधः। यदि पृष्ठशब्दः कर्मसु कल्प्यते, आत्मनेपदं बाध्यते। न हि तदा मन्त्रः करणं भवति। अथाऽऽत्मनेपदमनुरुध्यते, उपस्थानविप्रतिषेधः। तदाऽभिधानार्थताऽऽपतति। तत्राऽऽत्मनेपदानुरोधो न्याय्यः। पृष्ठशब्दो हि लक्षणया पृष्ठसाधनं मन्त्रं ब्रुवन्नर्थवान्। आत्मनेपदं तु मन्त्रकरणेनैवोपपद्यते। अतः पृष्ठसाधनेषु मन्त्रेषु पृष्ठशब्दः।

आह नैतद्युक्तम्। उपस्थानार्थता हि श्रुत्योपतिष्ठतेः। आत्मनेपदाल्लिङ्गादभिधानार्थता। न च लिङ्गेन श्रुतिर्बाधितव्या। उच्यते—नैवात्र श्रुतिर्बाध्यते। स्वार्थमेवोपतिष्ठतिराह समीपस्थानम्। तत्त्वभिधानाय। अभिधानं निर्वर्तयितुम् अग्निसमीपे तिष्ठेदिति[1] तिष्ठतिराह, आत्मनेपदात्। ततोऽविरोधः। आह एवमप्यभिधानस्य मन्त्रः करणं, नोपतिष्ठतेः। तत्रासम्बन्ध एवोपस्थानस्य मन्त्रेण। तथा,

---

का करण है उपस्थान का करण नहीं है। उपस्थान शरीर से किया जाता है अथवा मन से। इसलिये पृष्ठ शब्द अभिधान अर्थवाला है। वह यह विप्रतिषेध( =विरोध) [भी होता है]—यदि पृष्ठ शब्द कर्म में कल्पित होवे तो आत्मनेपद बाधित होवे। उस समय (=पृष्ठ शब्द को कर्म वाचक मानने पर)मन्त्र करण नहीं होता। और यदि आत्मनेपद का अनुरोध होवे तो उपस्थान का विप्रतिषेध होवे। तब अभिधान अर्थ प्राप्त होता है। इस में आत्मनेपद का अनुरोध न्याय्य है। पृष्ठ शब्द लक्षणा से पृष्ठ साधन मन्त्र को कहता हुआ अर्थवान् है। आत्मनेपद तो मन्त्र के करण होने से ही उपपन्न होता है। अतः पृष्ठ साधन मन्त्रों में पृष्ठ शब्द है।

विवरण—अभिधानोपदेशात्—मन्त्र क्रियमाण कर्म को कहता है।(द्र० मी० २।१।३१)। तच्चोदकेषु मन्त्राख्या (मी० २।१।३२) अभिधान का कथन करने वाले की मन्त्र संज्ञा कही है। अभिधानस्योपदेशोऽयं पृष्ठैरुपतिष्ठते—किये जा रहे उपस्थान को मन्त्र कहने वाला होता है। की जा रही उपस्थान क्रिया को पृष्ठमन्त्रों से कहता है। आत्मनेपदं बाध्येत—पृष्ठ शब्द यदि कर्म का वाचक होवे तो मन्त्र के करण न होने पर उपामन्त्रकरणे से आत्मनेपद न होवे। इससे पृष्ठ की अभिधानार्थता प्राप्त होती है।

व्याख्या—(आक्षेप) यह युक्त नहीं है। 'उपतिष्ठते' की उपस्थानार्थता श्रुति से जानी जाती है और अभिधानार्थता आत्मनेपद लिङ्ग से। लिङ्ग से श्रुति बाधित करने योग्य नहीं है। (समाधान)यहां श्रुति बाधित नहीं होती है। उपतिष्ठति स्वार्थ समीपस्थान को ही कहता है। वह अभिधान के लिये अर्थात् अभिधान को उपपन्न करने के लिये अग्निसमीप स्थित होवे यह 'तिष्ठति' कहता है, आत्मनेपद श्रवण से। इस से विरोध नहीं है। (आक्षेप) इस प्रकार भी अभिधान का मन्त्र करण होता है, 'उपतिष्ठति(उपपूर्वक स्था धातु)का [मन्त्र करण] नहीं होता। उस अवस्था में उपस्थान का मन्त्र के साथ संबन्ध नहीं होगा। ऐसा होने पर पृष्ठैरुप-

---

१. 'तिष्ठेदित्यात्मनेपदाविरोधः। आह'—पाठान्तरम्।

**पृष्ठैरुपतिष्ठते** इति समुच्चारणमनर्थकं स्यात् । उच्यते—अभिधानमभिनिर्वर्तयन्मन्त्र उपस्थानस्य करणं भवति । यतोऽस्य प्रयोजनं निर्वर्तयति । न हि निष्प्रयोजनमनुष्ठीयते । तस्मान् मन्त्रेष्वेव पृष्ठशब्दः । मन्त्रेषु चेत्, नास्ति धर्माणां प्राप्तिः । न हि मन्त्राणां धर्माः, अधर्मकास्त इति ॥३६॥

**इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये सप्तमस्याध्यायस्य तृतीयः पादः ॥**



---

तिष्ठते यह समुच्चारण अनर्थक होवे । (समाधान) [क्रियमाण अर्थ के] अभिधान को उपपन्न करता हुआ उपस्थान का करण होता है । इससे मन्त्रों में ही पृष्ठ शब्द है । मन्त्रों में होवे तो धर्मों की प्राप्ति नहीं होती । मन्त्रों के धर्म नहीं हैं, वे धर्म रहित हैं ॥३६॥

विवरण—इस अधिकरण का तात्पर्य यह है कि पृष्ठ मुख्य वृत्ति से साम का वाचक है । पृष्ठैरुपतिष्ठते में पृष्ठ शब्द से पृष्ठ संज्ञक साम की आधारभूत ऋचाओं का ग्रहण अभिप्रेत है । यह गान का आधारभूत मन्त्रों का पृष्ठ शब्द से कैसे ग्रहण हो सकता है, इस की ही मीमांसा की है । इस अधिरण का एक प्रयोजन यह है कि यदि पृष्ठ शब्द स्तोत्रवाचक होवे तो उपस्थान उद्गातृगण में से किसी के द्वारा होगा । ऋग्वाचक होने पर होतृगण में से किसी के द्वारा किया जायेगा ॥३६॥



# सप्तमाध्याये चतुर्थः पादः

[अविहितेतिकर्तव्यताकेषु सौर्यादिष्वितिकर्तव्यताया अतिदेशाधिकरणम् ॥१॥]

## इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वम् ॥१॥ (उ०)

अनारभ्य किंचिच्छ्रूयते—**सौर्यं चरुं निर्वपेद् ब्रह्मवर्चस्कामः**[1] इति। तत्रैषोऽर्थः समधिगतो यागोऽयं चोद्यत इति—**यजतिस्तु द्रव्यफलभोक्तृसंयोगादेतेषां कर्मसम्बन्धाद्**[2] इति। तथेदमप्युक्तम्—कर्मफलयोः सम्बन्धे कर्म गुणतः, फलं प्रधानतः इति—**प्रत्यर्थं चाभिसंयोगात् कर्मतो ह्यभिसंबन्धस्तस्मात् कर्मोपदेशः स्याद्**[3] इति। इदमपि चोक्तम्—यजिरपूर्वं साधयति। ततश्चापूर्वात् कालान्तरे फलं

---

**इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वम् ॥१॥**

सूत्रार्थः—सौर्यादि याग में (इतिकर्तव्यताविधेः) इतिकर्तव्यता का विधान न होने से (यजतेः) सौर्यादियाग का (पूर्ववत्त्वम्) पूर्ववत्व दर्शपूर्णमास के समान जानना चाहिये।

विशेष—पूर्व 'नाम' के द्वारा धर्मों का अतिदेश कहा है। यहां आनुमानिक वचन से अतिदेश कहा जाता है।

व्याख्या—विना विशेष कर्म आरम्भ किये सुना जाता है—सौर्यं चरुं निर्वपेद् ब्रह्मवर्चस्कामः (=सूर्यदेवताक चरु का निर्वाप करे ब्रह्मवर्चः की कामना वाला)। इस विषय में यह अर्थ जाना गया कि यह याग की चोदना है—यजतिस्तु द्रव्यफलभोक्तृसंयोगाद् एतेषां कर्मसम्बन्धात् (=यजति=याग का विधान किया जाता है, द्रव्य फल भोक्ता के परस्पर संयोग से और कर्म संबन्ध के श्रवण से)। तथा यह भी कहा जा चुका है—कर्म और फल के सम्बन्ध होने पर कर्म गुणरूप से और फल प्रधानरूप से कहा गया है—प्रत्यर्थं चाभिसंयोगात् कर्मतो ह्यभिसंबन्धस्तस्मात् कर्मोपदेशः स्यात् (=प्रत्येक अभिलषित स्वर्गादि अर्थ के साथ ही कर्म का संबन्ध=अन्वय होने से स्वर्गादि का कार्य से भावरूप से ही सम्बन्ध होता है अर्थात् स्वर्गादि कर्म से भाव्य है, साधन नहीं है। इस से कर्म का उपदेश=विधि होवे) सूत्र से। यह भी कहा जा चुका है कि याग 'अपूर्व' को सिद्ध करता है अर्थात् उत्पन्न करता है उस

---

१. अनुपलब्धमूलम्। द्र०—सौर्यं चरुं निरवपत ..... ब्रह्मवर्चस्कामः। तै० सं० २।३।२।२-३॥ २. मी० २।३।१४॥ ३. मी० ६।१।३॥

भवतीति **चोदना पुनरारम्भः**[1] इत्यत्र। एवमेतस्मिन् सति, **सौर्यं चरुं निर्वपेद् ब्रह्मवर्चस्कामः** इत्यत्र सौर्ययागेनापूर्वं कृत्वा ब्रह्मवर्चसं साधयेद् ब्रह्मवर्चस्काम इत्येवं विज्ञायते।

आह। यत्र तृतीयायुक्तो यजिस्तत्र युक्तो गुणभावाभ्युपगमः। यथा—**ज्योतिष्टोमेन स्वर्गकामो यजेत**[2] इति। इह त्वसत्यां तृतीयायां कथं तृतीयार्थो गम्यत इति। उच्यते। किमत्र तृतीयानिर्दिष्टेन यजिना कार्यं, यदा स्वभावसिद्धः[3] कर्मणां फलं प्रति गुणभावः। यत्राप्यसौ श्रुतस्तत्राप्यकिंचित्कर एव, गतार्थत्वात्। तथा, यत्रापि द्वितीयाश्रुतिः। यथा—**अग्निहोत्रं जुहुयाद्**[4] इति। तत्रापि विभक्तिव्यत्ययो वा, ईप्सिततमत्वस्य[5] वाऽविवक्षा, कामं वाऽऽनर्थक्यं स्यान्न तु कथंचिदपि कर्मणः प्रति गुणभावः शक्योऽपह्नोतुम्। तस्माद् यागेनापूर्वसाधनमत्रोच्यते। तत्र[6] यागो विज्ञायते। लौकिकोऽसौ पदार्थः। तेन तु कथमपूर्वं साध्यत इत्येतन्न विज्ञायते। इह तु यागेनापूर्वं साधयेदित्येतावदेवोक्तम्। कथं साधयेदितीतिकर्तव्यता नोक्ता।

---

**से कालान्तर में फल होता है—चोदना पुनरारम्भः {=अपूर्व है जिस कारण स्वर्गादि फल के यागरूप साधन का उपदेश=विधान किया है) इस सूत्र में। इस प्रकार इस सब के होने पर सौर्यं चरुं निर्वपेद् ब्रह्मवर्चस्कामः में 'सौर्ययाग से अपूर्व को उत्पन्न करके ब्रह्मवर्चः रूपी फल को सिद्ध करे ब्रह्मवर्चस् की कामनावाला' ऐसा अभिप्राय जाना जाता है।**

**(आक्षेप) जहां याग तृतीया विभक्ति से युक्त है वहां [याग का] गुणभाव स्वीकार करना युक्त है। जैसे—ज्योतिष्टोमेन स्वर्गकामो यजेत (= ज्योतिष्टोम से स्वर्ग की कामनावाला यजन करे)। यहां तृतीया के न होने पर कैसे तृतीया का अर्थ जाना जाता है। (समाधान) यहां तृतीयानिर्दिष्ट यजि (याग) से क्या कार्य है? जब कि कर्मों का फल के प्रति गुणभाव स्वभावसिद्ध है अर्थात् स्वाभाविक है। जहां पर भी यह तृतीया श्रुत है वहां भी तृतीया अकिञ्चित्कर है (अर्थात् उस से कुछ विशेष नहीं जाना जाता है) अर्थ के ज्ञात होने से। तथा जहां भी द्वितीयाश्रुति है, जैसे—अग्निहोत्रं जुहुयात् वहां भी विभक्ति का व्यत्यय जानना चाहिये। अथवा ईप्सिततमत्व की अविवक्षा, अथवा [द्वितीया] चाहे अनर्थक होवे, परन्तु किसी भी तरह कर्म के प्रति गुणभाव नहीं छोड़ा जा सकता है। इससे याग से अपूर्व का साधन यहां कहा जाता है। वहां याग जाना जाता है। लौकिक यह पदार्थ है। उस से कैसे अपूर्व सिद्ध किया जाता है, यह नहीं जाना जाता है। यहां (= सौर्ययाग में) तो याग से अपूर्व सिद्ध करे, इतना ही कहा है।**

---

१. मी० २।१।५।।

२. द्र०—स्वर्गकामो ज्योतिष्टोमेन यजेत। आप० श्रौत १०।२।१।।

३. स्वाभाविकः' पाठान्तरम्।

४. द्र०—अग्निहोत्रं जुहुयात् स्वर्गकामः। मै० आर० ६।३।।

५. 'ईप्सितत्वस्य' इति पाठान्तरम्। ६. 'ननु' इति पाठान्तरम्।

येषां चार्थानां ज्ञायत एवेतिकर्तव्यता, तेषां कर्तव्यत्वमात्रमुपदिश्यते। यथा—ओदनं पचेदिति। येषां तु न ज्ञायते ते सहेतिकर्तव्यतयैवोपदिश्यन्ते। यथा—दर्शपूर्णमासौ। एवं चेन्नूनं ज्ञायते यागेनापूर्वनिर्वृत्ताविति कर्तव्यता 'यस्मान्नोक्ता तस्मान्नूनमसावस्तीति। आह। यद्यस्ति लोके ततो ज्ञायेतैव। अथ नास्त्येव, कथं शक्या ज्ञातुमिति? उच्यते। बाढमस्ति, लौकिकी वैदिकी च। लौकिकी तावत् पार्वणस्थालीपाकादिषु, वैदिकी दर्शपूर्णमासादिषु। यदि तत्पूर्वा एताश्चोदनास्तदपेक्षाः, सौर्ययागेनापूर्वं साधयेत्, यथाज्ञातयेतिकर्तव्यतयेति, ततो युक्त इतिकर्तव्यताया अविधिः। न च विधीयते। अत इतिकर्तव्यताया अविधेर्यजतेः पूर्ववत्त्वं, विहितेतिकर्तव्यताकत्वमिति।

---

कैसे सिद्ध करे यह इतिकर्तव्यता (=इस इस प्रकार करके) नहीं कही है। जिन अर्थों की इतिकर्तव्यता ज्ञात ही होती है उन की कर्तव्यता मात्र कही जाती है। जैसे—ओदनं पचेत् (=ओदन पकावे)। और जिन की [इतिकर्तव्यता] नहीं जानी जाती है वे इतिकर्तव्यता के साथ उपदिष्ट होते हैं। जैसे—दर्शपूर्णमास। यदि ऐसा है तो निश्चय ही जाना जाता है 'याग से अपूर्व की सिद्धि में इतिकर्तव्यता जिस कारण नहीं कही इस से निश्चय ही वह है। (आक्षेप) यदि लोक में [इतिकर्तव्यता] होवे तो अवश्य जानी जाये। यदि नहीं है तो उसे कैसे जाना जा सकता है? (समाधान) अवश्य है [इतिकर्तव्यता] लौकिकी और वैदिकी। लौकिकी पार्वणस्थालीपाकादि में है और वैदिकी दर्शपूर्णमास आदि में। यदि तत्पूर्वा ये चोदनाएं हैं तो उनकी अपेक्षा होती हैं। सौर्ययाग से अपूर्व को सिद्ध करे यथाज्ञात वैदिक इतिकर्तव्यता से। ऐसा होने पर इतिकर्तव्यता की विधि न होना युक्त है। इससे इतिकर्तव्यता की विधि न होने से यजि का पूर्ववत्व है अर्थात् विहित इतिकर्तव्यतात्व।

विवरण—विभक्तिव्यत्ययो वा—तृतीया च होश्छन्दसि (अष्टा० २।३।३) से पाणिनि ने द्वितीया तृतीया दोनों विभक्तियों का विधान किया है। इस सूत्र का महाभाष्य भी द्रष्टव्य है। उसके अनुसार अग्निहोत्रं जुहोति में अग्निहोत्र शब्द तदीय हवि में प्रयुक्त है और 'जुहोति' प्रक्षेपण में—हवि को अग्नि में डालता है। यवाग्वा अग्निहोत्रं जुहोति में अग्निहोत्र शब्द अग्नि में वर्तमान है और जुहोति प्रीणन=तृप्ति अर्थ में—यवागू से अग्निहोत्र को तृप्त करता है। येषां चार्थानां ज्ञायते एवेतिकर्तव्यता—लोक में ओदनं पचति कहते हैं। पाक क्रिया की इतिकर्तव्यता लोक में विदित होने से वहां इतिकर्तव्यता का कथन नहीं किया जाता है। यथा दर्शपूर्णमासौ—दर्शपूर्णमास यागों की इतिकर्तव्यता लोक से विदित न होने से वेद में इनकी पूरी इतिकर्तव्यता कही है। पार्वणस्थालीपाकादिषु—गृह्यसूत्रों में आवसथ्य अग्नि (=गृह्याग्नि) में क्रियमाण दर्शपूर्णमास में स्थालीपाक के श्रपण का निर्देश है। यथा—पक्षादिषु स्थालीपाकं श्रपयित्वा दर्शपूर्ण-

---

१. 'यस्मादुक्ता' इति काशीमुद्रिते पाठः।

अथ य आहुः, यजेत—यागं कुर्यादिति। जुहुयात्—होमं कुर्यादिति। तेषां किं नैव धर्माकाङ्क्षा भवति। भवतीति ब्रूमः। यद्यपि प्रज्ञातेतिकर्तव्यताको यजिर्द्रव्यं देवतां प्रत्युत्सृज्यत इति। तथाऽपि यदा फलार्थः क्रियते तदा धर्मानाकाङ्क्षति। न ह्यधर्मकात् फलं भवति। कथं ज्ञायते? यो ह्यमेध्यं द्रव्यमुच्छिष्टः, शयानो वा, प्रौढपादो, वामेन हस्तेन वा, पादेन वा यथाकथंचिद् देवताया उत्सृजति, तस्य फलं न भवतीति शिष्टाः स्मरन्ति। यस्तु मेध्यं द्रव्यं, शुचौ देशे, प्रयतः, प्राङ्मुखो, दक्षिणेन हस्तेन, समाहितमनाः, मन्त्रवन्नियमवच्च देवताया उत्सृजति, तस्य फलं भवतीति स्मरन्ति। तस्माद् यावान्यजतिः फलायाऽऽम्नायते स सर्वो धर्मानाकाङ्क्षति। अतस्तेषामप्यस्ति धर्माकाङ्क्षा, सत्यामाकाङ्क्षायां संनिहितैर्धर्मैरविप्रतिषिद्धः सम्बन्धः प्रकृतौ। विकृतौ त्वानुमानिकैः ॥१॥

---

## [सौर्यचर्यादौ वैदिक्या एवेतिकर्तव्यताया अतिदेशाधिकरणम् ॥२॥]

अधुनैवं चिन्त्यते। किमनियमो लौकिकी वैदिकी वेतिकर्तव्यता, उत

---

मासदेवताभ्यो हुत्वा ··· (पारस्कर, कात्यायन गृह्य १।१२॥)। यह पाक लौकिक है अर्थात् इसमें लौकिक पाक की इतिकर्तव्यता होती है। श्रौतकर्मों की अपेक्षा से गृह्य कर्म स्मार्त कर्म कहाते हैं। ये आवसथ्य अग्नि में किये जाते हैं।

व्याख्या—(आक्षेप) जो यह कहते हैं—यजेत—याग करे, जुहुयात्—होम करे। उनको धर्मों की आकाङ्क्षा नहीं होती। (समाधान) होती है ऐसा हम कहते हैं। यद्यपि ज्ञात हैं इतिकर्तव्यता जिसकी ऐसी यजि द्रव्य को देवता के प्रति छोड़ता है। तथापि जब फल के लिये [याग] किया जाता है तब धर्मों की आकाङ्क्षा करता है। धर्मरहित से फल नहीं होता। कैसे जाना जाता है? जो अमेध्य (=अपवित्र) द्रव्य, उच्छिष्ट अथवा सोते हुए प्रौढ़ पाद अथवा बायें हाथ से अथवा पैर से जैसे तैसे देवता के लिये त्याग करता है, उस का फल नहीं होता है, ऐसा शिष्ट लोग स्मरण करते हैं। और जो मेध्य (=शुद्ध) द्रव्य, शुद्ध स्थान में, प्रयत, प्राङ्मुख होकर, दाहिने हाथ से, समाहित मन से, मन्त्र से युक्त और नियम के अनुकूल देवता के लिये त्याग करता है, उसका फल होता है, ऐसा [शिष्ट जन] स्मरण करते हैं। इसलिये जितनी 'यजति' फल के लिये पढ़ी गई हैं वे सब धर्मों की आकाङ्क्षा करती हैं। इस लिये उनकी भी धर्म के प्रति आकाङ्क्षा है और आकाङ्क्षा होने पर समीपस्थ धर्मों से अविरुद्ध संबन्ध प्रकृति में होता है। विकृतियों में आनुमानिक धर्मों के साथ [संबन्ध होता है] ॥१॥

---

व्याख्या—अब इस प्रकार विचार करते हैं—क्या अनियम है लौकिकी अथवा वैदिकी

लौकिक्येव, आहोस्विद् वैदिक्येवेति । अत्र विशेषाभावादनियमे प्राप्ते उच्यते—

**स लौकिकः स्याद् दृष्टप्रवृत्तित्वात् ॥२॥ (पू०)**

स लौकिकः स्यात् । स खलु कर्तव्यतोपायो लौकिकः स्यात् । कुतः ? दृष्टप्रवृत्तित्वात् । दृष्टा ह्यस्य तत्र तत्र प्रवृत्तिः । यथा—पार्वणस्थालीपाके[1], अष्टकाचरौ[2], आग्रहायणे[3] कर्मणि, इत्येवं यत्र यत्र यागेनापूर्वं साध्यते, तत्र तत्रास्य प्रवृत्तिर्दृष्टा । अतोऽन्वयाद् विज्ञायते यागस्यापूर्वं साधयतोऽयमभ्युपाय[4] इति । अयं चापि यागः । तस्मादस्यापि स एवाभ्युपायः ॥२॥

आह—किमेष एवोत्सर्गः, सर्वत्र लौकिकीतिकर्तव्यतेति । एवं खलु

---

इतिकर्तव्यता होवे अथवा लौकिकी ही, आहोस्वित् वैदिकी ही । इस में विशेष के अभाव से अनियम प्राप्त होने पर कहते हैं —

**स लौकिकः स्याद् दृष्टप्रवृत्तित्वात् ॥३॥**

सूत्रार्थः—(सः) वह इतिकर्तव्यता रूप उपाय (लौकिकः) लौकिक=लोक में विज्ञात (स्यात्) होवे (दृष्टप्रवृत्तित्वात्) उसके दृष्ट प्रवृत्ति वाला होने से । अर्थात् लौकिक उपाय की प्रवृत्ति दृष्ट है, विज्ञात है ।

व्याख्या—वह लौकिक होवे । वह इतिकर्तव्यता रूप उपाय लौकिक होवे । किस हेतु से ? दृष्ट प्रवृत्तिवाला होने से । इस [लौकिक उपाय की] प्रवृत्ति बहुत्र देखी हुई है । जैसे—पार्वण स्थालीपाक में, अष्टकाविषयक चरु में, आग्रहायण कर्म में । इस प्रकार जहां-जहां याग से अपूर्व सिद्ध किया जाता है, वहां-वहां इस की (=लौकिकी इतिकर्तव्यता की) प्रवृत्ति देखी गई है । इस से अन्वय से जाना जाता है कि याग से अपूर्व की सिद्धि करते हुए यह उपाय है । यह (=सौर्य) भी याग है । इससे इसका भी वही उपाय है ॥२॥

विवरण—पार्वणस्थालीपाके—गृह्यसूत्रों के अनुसार प्रतिपर्व पूर्णिमा और अमावास्या को स्थालीपाक पका कर आहुति देनी है । स्थाली बटलोई या पतीले में पकाया गया ओदन स्थालीपाक कहाता है । अष्टकाचरौ—अष्टका कर्म में साक्षात् 'चरु' शब्द का प्रयोग हमें नहीं मिला । गृह्यसूत्रों में दूध में स्थालीपाक का विधान है। आग्रहायण कर्म में भी स्थालीपाक का ही निर्देश मिलता है ॥२॥

व्याख्या—(आक्षेप) क्या वही उत्सर्ग है कि सर्वत्र लौकिक इतिकर्तव्यता होवे ।

---

१. पार० गृह्य १।१२॥

२. आग्रहायणकर्मणि पयसि स्थालीपाक उक्तः । मानवगृह्य २।८।१॥

३. 'आग्रयणीये' पाठान्तरम् । आग्रहायणी कर्म, पार० गृह्य ३।२॥

४. 'अयमुपायः' इति पाठान्तरम् ।

प्राप्तम्। एवं प्राप्ते ब्रूमः—

**वचनात् तु ततोऽन्यत्वम् ॥३॥**

वचनात् तु ततोऽन्यत्वमिति। यत्र प्रत्यक्षं वचनं वैदिक्यास्तत्र न लौकिकी स्यात्। वचनसामर्थ्याद् वैदिक्येव स्यात्। यथा—उपसत्सु, गृहमेधीये च ॥३॥

**लिङ्गेन वा नियम्येत लिङ्गस्य तद्गुणत्वात् ॥४॥ (सि०)**

लिङ्गेन वा इतिकर्तव्यता नियम्येत। कतरा? यस्या लिङ्गम्। वैदिक्याश्च लिङ्गम्। तस्माद् वैदिकी। किं पुनर्लिङ्गम्? सौर्ये तावच्चरौ श्रूयते- **प्रयाजे प्रयाजे कृष्णलं जुहोति**[1] इति। तथा ऐन्द्राबार्हस्पत्ये—**अर्धं बर्हिषो लुनाति, अर्धं**

---

(समाधान) ऐसा ही प्राप्त है। ऐसा प्राप्त होने पर कहते हैं—

**वचनात् तु ततोऽन्यत्वम् ॥३॥**

सूत्रार्थः—(वचनात्) वचन सामर्थ्य से (तु) तो (ततः) लौकिकी इतिकर्तव्यता से (अन्यत्वम्) अन्यत्व होवे अर्थात् वैदिकी इतिकर्तव्यता होवे। [वचन भाष्यव्याख्या में देखें।]

व्याख्या—वचन सामर्थ्य से तो उस से अन्यत्व होवे। जहां प्रत्यक्ष वचन है वहां वैदिकी इतिकर्तव्यता होवे लौकिकी न होवे। वचनसामर्थ्य से वैदिकी ही होवे। जैसे—उपसदों में, गृहमेधीय में ॥३॥

विवरण—उपसदों में जहां वैदिकी इतिकर्तव्यता प्रत्यक्ष विहित है। यथा—त्रिस्तनं प्रथमायां दोहयति, एकापचयेनोत्तरयोः (कात्या० श्रौत ८।३।१-२) अर्थात् प्रथम उपसद् में गौ के तीन स्तन दोहे, द्वितीय और तृतीय में क्रमशः दो स्तन और एक स्तन। गृहमेधीया इष्टि में आज्यभागौ यजति (मै० सं० १।१।१५) इस निर्देश से वैदिक इतिकर्तव्यतारूप आज्यभाग होते हैं ॥३॥

**लिङ्गेन वा नियम्येत लिङ्गस्य तद्गुणत्वात् ॥४॥**

सूत्रार्थः—(वा) वा शब्द पूर्व उक्त पक्षों की निवृत्ति के लिये है। (लिङ्गेन) लिङ्ग से इतिकर्तव्यता नियमित होवे। (लिङ्गस्य) लिङ्ग के (तद्गुणत्वात्) उस इतिकर्तव्यता के पूर्ववत्व के प्रति गुणत्व अङ्गत्व होने से। [लिङ्गवचन भाष्यव्याख्या में देखें।]

व्याख्या—अथवा लिङ्ग से इतिकर्तव्यता नियमित होवे। कौनसी इतिकर्तव्यता? जिस का लिङ्ग है। लिंग वैदिकी इतिकर्तव्यता का है। इस से वैदिकी [इतिकर्तव्यता नियमित होवे]। लिङ्ग पुनः क्या है? सौर्य चरु में श्रुत है—प्रयाजे प्रयाजे कृष्णलं जुहोति (=प्रति प्रयाज कृष्णल का होम करता है)। तथा ऐन्द्राबार्हस्पत्य कर्म में अर्धं बर्हिषो लुनाति, अर्ध

---

१. तै० सं० २।३।२।३॥

न, स्वयं दितमर्धं वेद्याः[1] करोत्यर्धं न[2] इति। तथा पितृयज्ञे—न होतारं वृणीते, नार्ष्टर्षेयम्[3] इति। एतैर्लिङ्गैर्ज्ञायते वैदिकीतिकर्तव्यतेति। कथम्? लिङ्गस्य तद्-गुणत्वात्। एते हि प्रयाजादयो वैदिकस्यापूर्वस्य गुणाः। यदि च तदीयेतिकर्तव्यता प्रवर्तिता, तत एतेषु कर्मस्वेते सन्ति। तत्रैतानि वचनान्युपपद्यन्ते, प्रयाजे प्रयाजे कृष्णलं जुहोतीत्येवमादीनि। तस्माद् वैदिकीतिकर्तव्यता नियम्येत ॥४॥

अपि वाऽन्यायपूर्वत्वाद् यत्र नित्यानुवादवचनानि स्युः ॥५॥(पू०)

---

न, स्वयं दितमर्धं वेद्याः करोति, अर्धं न (=बर्हि का आधा काटता है, आधा नहीं कटता, जो आधी स्वयं कटी हुई है, आधी वेदि बनाता है आधी नहीं बनाता)। तथा पिण्डपितृयज्ञ में —न होतारं वृणीते, नार्षेयम् (=होता का वरण नहीं करता न आर्षेय का)। इन लिङ्गों से ज्ञात होता है कि वैदिकी इतिकर्तव्यता है। कैसे? लिङ्ग के उस गुणवाला होने से। ये प्रयाजादि वैदिक अपूर्व के गुण (=अङ्ग) हैं और यदि उन की इतिकर्तव्यता प्रवर्तित होवे तो इन कर्मों में ये [प्रयाजादि] होते हैं। उस अवस्था में ये वचन उपपन्न होते हैं—प्रयाजे प्रयाजे कृष्णलं जुहोति इत्यादि। इस से वैदिक इतिकर्तव्यता नियमित होवे।

विवरण-सौर्ये तावच्चरौ-ब्रह्मवर्चस्कामवाले के लिये सौर्य चरु का विधान है(द्र०—तै० सं० २।३।२।३)। इसी में प्रयाजे प्रयाजे कृष्णलं जुहोति वचन है। कृष्णल गुञ्जा(रत्ती)का वाचक है। उस परिमाण के सुवर्ण से बने गुञ्जा का होम इष्ट है(विशेष द्र०—मी० २।२।३ भाग २, पृष्ठ ४५४)। ऐन्द्राबार्हस्पत्ये—यह कर्म और आगे उद्वृत अर्धं बर्हिषो लुनाति हमें उपलब्ध नहीं हुआ। राजसूयप्रकरण में मानव श्रौत ६।१।२।५ में मैत्रा बार्हस्पत्य हवि का विधान है। आप० श्रौत १८।११।८ में भी मैत्रा बार्हस्पत्या दीक्षणीया का निर्देश है। इसी प्रकार काठक सं० १५।५ तथा मै० सं० २।६।६ में मैत्रावार्हस्पत्य हवि का ही विधान है। इन सब में यहीं आगे पीछे भाष्य में उद्वृत वाक्य से मिलता जुलता पाठ उपलब्ध होता है। अर्धं वेद्याः करोति—यहां मुद्रित में वेद्यां अपपाठ है, यह आपस्तम्बादि श्रौत के निर्दिष्ट तुलनात्मक पाठों से स्पष्ट है ॥४॥

अपि वाऽन्यायपूर्वत्वाद् यत्र नित्यानुवादवचनानि स्युः ॥५॥

---

१. 'वेद्याम्' इति मुद्रितः पाठो भ्रष्टः।

२. अनुपलब्धमूलम्। द्र०—अर्धं वेद्याः कुर्वन्त्यर्धं स्वयंकृतमर्धं बर्हिषो दान्त्यर्धं स्वयं-दितमर्धमिध्मस्य कुर्वन्त्यर्धं स्वयंकृतम्। काठक सं० १५।५॥ अथैकेषाम्— अर्धं वेद्याः कुर्वन्ति। अर्धं स्वयंकृतम्। अर्धं बर्हिर्दाति। अर्धं स्वयंदितमुपसंनह्यति। आप० श्रौत १८।११।१०॥ अर्धं बर्हिषो लुनात्यर्धं स्वयंलूनमर्धमिध्मस्य करोत्यर्धं स्वयंकृतमर्धं वेद्याः करोत्यर्धं स्वयंकृतम्। मानव श्रौत ६।१।२।६॥

३. द्र०—नार्षेयं वृणीते न होतारम्। तै० ब्रा० १।६।६।१॥

अपि वा नैवं स्यात्, वैदिकीतिकर्तव्यतेति । यत्कारणम् । एतैर्लिङ्गैर्न शक्यते वैदिकी नियन्तुम् । कुतः ? अन्यायपूर्वत्वात् । न्यायपूर्वकं हि वचनं तत् साधकं भवति । न चैतानि न्यायपूर्वाणि । न हि वैदिक्याः प्रवृत्तिर्युक्ता । निबद्धा हि सा प्रकरणादिभिः कारणैर्दर्शपूर्णमासादिषु । कथं तर्ह्येतानि लिङ्गानि ? उच्यते। यत्र नित्यानुवादवचनानि स्युः । इह तावत्, अर्धं बर्हिषो लुनाति, अर्धं नेति, यत्र बर्हिस्तत्रैव भविष्यति । यत्कारणम् । सतो बर्हिष एतद् उच्यते । न चेहास्ति बर्हिः। न होतारं वृणीते, नार्ष्टर्षेयमिति नित्यानुवादो भविष्यति । ननु नित्यानुवादः सन्ननर्थको भवति । किं क्रियतां, यस्यार्थो नास्ति । प्रयाजे प्रयाजे कृष्णलं जुहोतीति वचनं प्रयाजानां भविष्यति । कथं पुनरत्र प्रयाजाश्च कृष्णलहोमश्च[1] युगपच्छक्या वक्तुम् ? भिद्यते हि तथा वाक्यम् । एवं तर्हि न प्रयाजान् वक्ष्यति, प्रयाजे कृष्णलहोमं विधास्यति । न चासत्सु प्रयाजेषु कृष्णलहोमः शक्यते कर्तुमित्यर्थात् प्रायाजान् करिष्यति । तस्मान्न लिंगेन वैदिक्या नियमः । यथोक्तेन न्यायेन लौकिक्येवेतिकर्तव्यतेति ॥५॥

---

सूत्रार्थः—(अपि वा) 'अपि वा' शब्द पूर्व उक्त वैदिकी इतिकर्तव्यता के प्रतिषेध के लिये हैं (अन्यायपूर्वत्वात्) न्यायपूर्वत्व न होने से । (यत्र) जहां प्रयाज कहे हैं वहां कृष्णलविधि होवे । न होतारं वृणीते आदि(नित्यानुवादवचनानि) नित्यानुवाद वचन (स्युः) होवें ।

व्याख्या—अथवा ऐसा नहीं होवे—वैदिकी इतिकर्तव्यता है । जो कारण है इन लिङ्गों से वैदिकी इतिकर्तव्यता नियन्त्रित नहीं की जा सकती । किस हेतु से ? अन्यायपूर्वत्व होने से । न्यायपूर्वक जो वचन वह साधक होता है । ये न्यायपूर्व नहीं हैं । वैदिकी इतिकर्तव्यता की प्रवृत्ति युक्त नहीं है । वह प्रकरणादि कारणों से दर्शपूर्णमासादि में निबद्ध हैं । (आक्षेप) तो ये लिङ्ग कैसे हैं ? (समाधान) जहां हैं वहां नित्यानुवाद कथन होवें । यहां 'अर्धं बर्हिषो लुनाति अर्धं न' वचन जहां बर्हि है वहीं यह होगा । जो कारण है बर्हि के होने पर यह (अर्धं लुनाति अर्धं न) कहा जाता है । यहां बर्हि नहीं है । न होतारं वृणीते नार्षेयम् यह नित्यानुवाद होगा । (आक्षेप) नित्यानुवाद होता हुआ अनर्थक होता है । (समाधान) क्या करें जिसका अर्थ नहीं है [वह अनर्थक होवे] । प्रयाजे प्रयाजे कृष्णलं जुहोति यह वचन प्रयाजों का होगा । (आक्षेप) यहां प्रयाज और कृष्णल होम दोनों एक साथ कैसे कहे जा सकते हैं ? ऐसा होने पर (=दो अर्थों के कहने पर) वाक्यभेद होगा । (समाधान) अच्छा तो प्रयाजों को नहीं कहेगा । प्रयाज में कृष्णल होम का विधान करेगा । प्रयाजों के न होने पर कृष्णल होम किया नहीं जा सकता है, इससे अर्थापत्ति से प्रयाजों का विधान करेगा । इससे लिङ्ग से वैदिक इतिकर्तव्यता का नियमन नहीं हो सकता । यथोक्त न्याय से लौकिक इतिकर्तव्यता होगी ॥५॥

---

१. 'कृष्णलहोमश्च शक्यो वक्तुं' पाठान्तरम् ।

तत्राऽऽह[1]। अथ कस्मान्नोभे अपीतिकर्तव्यते सह प्रवर्तेते इति ? किमेवं भविष्यति? एवं तुल्यापेक्षा कर्मणामन्यतरतो न बाधिता भवति। उच्यते —

**मिथो विप्रतिषेधाच्च गुणानां यथार्थकल्पना स्यात् ॥६॥ (पू०)**

सह प्रवृत्तावेकया चेत्कर्म निरपेक्षं कृतं, द्वितीयस्याः प्रवृत्तिर्विप्रतिषिद्धा। अतो मिथः प्रवृत्तेर्विप्रतिषेधाद् यथार्थकल्पना स्यात्। एकस्याः प्रवृत्तिः स्यादित्यर्थः। कथमेकस्याः प्रवृत्तेर्धर्माणां यथार्थकल्पना भवति। ये धर्मा येषु कार्येषु प्रकृतावुत्पन्नास्त इहापि तेष्वेव भवन्ति। इतरथा द्वितीयस्या धर्मा अयथार्था भवेयुः पूर्वधर्मैः। तेषां कार्याणां निर्वर्तितत्वात्। एवमेकस्याः प्रवृत्तेर्यथार्थकल्पना भवति। अतो यथार्थकल्पना स्यादित्यनेनैकस्याः प्रवृत्तिरित्युक्तं भवेत्। एकस्याः प्रवृत्तौ यथोक्तेन न्यायेन लौकिक्याः प्रवृत्तिरिति ॥६॥

**भागित्वात् तु नियम्येत गुणानामभिधानत्वात् सम्बन्धादभिधानवद्**
**यथा धेनुः किशोरेण ॥७॥ (उ०)**

---

व्याख्या—उक्त विषय में कहते हैं—क्यों नहीं दोनों ही इतिकर्तव्यताएं साथ साथ प्रवृत्त होवें ? ऐसा होने से क्या होगा ? इस प्रकार कर्मों की तुल्यापेक्षा (=बराबरी) अन्यतर से बाधित नहीं होती है अर्थात् दोनों लौकिक और वैदिक कर्म बराबर होंगे। इस विषय में कहते हैं—

**मिथो विप्रतिषेधाच्च गुणानां यथार्थकल्पना स्यात् ॥६॥**

सूत्रार्थः— (मिथः) परस्पर (विप्रतिषेधात्) विरोध से (च) भी (गुणानाम्) अङ्गों की (यथार्थकल्पना) उचित कल्पना अर्थात् लौकिक इतिकर्तव्यता की कल्पना (स्यात्) होवे।

व्याख्या—[दोनों इतिकर्तव्यताओं की] सह प्रवृत्ति होने पर यदि एक से कर्म निरपेक्ष होता है तो दूसरी की प्रवृत्ति विप्रतिषिद्ध होवे। अतः दोनों की सह प्रवृत्ति के विप्रतिषेध (=विरोध) होने से यथार्थ कल्पना होवे। अर्थात् एक की प्रवृत्ति होवे। (आक्षेप) एक की प्रवृत्ति से धर्मों की यथार्थ कल्पना कैसे होती है ? (समाधान) जो धर्म जिन कार्यों में प्रकृति में उत्पन्न हुए हैं वे यहां भी उन्हीं में होते हैं। अन्यथा दूसरी के धर्म पूर्वधर्मों के साथ अयथार्थ होवें, उन कार्यों के निर्वर्तित (=सम्पन्न) हो जाने से। इस प्रकार एक की प्रवृत्ति होने से यथार्थ कल्पना होती है। इसलिये यथार्थ कल्पना होवे, इससे एक [इतिकर्तव्यता] की प्रवृत्ति होती है यह कहा जाता है। एक की प्रवृत्ति होने पर यथोक्त न्याय से लौकिकी प्रवृत्ति होती है ॥६॥

**भागित्वात् तु नियम्येत गुणानामभिधानत्वात् सम्बन्धादभिधानवद् यथा**
**धेनुः किशोरेण ॥७॥**

---

१. 'अत्राऽऽह' पाठान्तरम्।

तु शब्दः पक्षनिवृत्तौ । न त्वेवं स्यात् । लौकिकीतिकर्तव्यतेति । किं तर्हि ? वैदिकी नियम्येत । कुतः ? भागित्वात् । वैदिक्यपि भागिनी प्रवृत्तेः । साऽपि ह्यपूर्वस्येतिकर्तव्यता । समाने च भागित्व उभयोर्वैदिक्येव स्यात् । गुणानामभिधानत्वात् । गुणा एते प्रयाजादयः सौर्यादिषु दृश्यमाना अभिधायका भवन्त्येतस्यार्थस्य । यथा वैदिक्यत्रेतिकर्तव्येतेति बोधका भवन्तीत्यर्थः ।

कस्मात् ? सम्बन्धात् । एते हि तयेतिकर्तव्यतया सम्बद्धाः । अतः साहचर्यात्तां गमयन्ति । अभिधानवत् । यथा कौण्डपायिनामयने, अग्निहोत्रमित्यभिधानं कर्मणो वाचकम्[1] । तत्, कर्मसहचरितान् धर्मानानयति । तेष्वसत्स्वेतदभिधानमिह न युज्यत इति तेषां धर्माणां तत्र भावो विज्ञायते । एवमिहापि प्रयाजादीनां दर्शनमसत्यां वैदिक्यां न युज्यत इति तस्या अपीह भावो विज्ञास्यते । नन्वसति न्याये

---

सूत्रार्थः—(तु) 'तु' शब्द पूर्वपक्ष की निवृत्ति के लिये है अर्थात् लौकिक इतिकर्तव्यता नहीं है । (भागित्वात्) वैदिकी इतिकर्तव्यता के भागिनी होने से, अर्थात् वह भी अपूर्व की उत्पादिका है । (गुणानाम्) सौर्यादि में प्रयाजादि अङ्गों के (अभिधानत्वात्) अभिधायक होने से, (सम्बन्धात्) प्रयाजादि के वैदिकी इतिकर्तव्यता के साथ सम्बद्ध होने से । (यथा) जैसे (किशोरेण) अश्व के वत्स के वाचक किशोर शब्द के साथ सम्बद्ध होने से (धेनुः) घोड़ी का ग्रहण होता है । कृष्णकिशोरा धेनुः=काले अश्व वत्स से युक्त घोड़ी ।

व्याख्या—'तु' शब्द पूर्वपक्ष की निवृत्ति के लिये है । ऐसा नहीं होवे कि लौकिकी इतिकर्तव्यता नियमित होवे । तो क्या जाना जाता है ? वैदिकी ही नियमित होवे । किस हेतु से ? भागी होने से । वैदिकी प्रवृत्ति भी भागिनी है । वह भी अपूर्व की इतिकर्तव्यता है । [लौकिकी वैदिकी के] समान रूप से भागिनी होने पर दोनों में वैदिकी ही होवे । गुणों के अभिधानत्व से । ये प्रयाजादि गुण सौर्यादि में दिखाई पड़ते हुए वैदिकी इतिकर्तव्या के अभिधायक होते हैं । जिस प्रकार वैदिकी इतिकर्तव्यता होवे उसके बोधक होते हैं यह तात्पर्य है ।

क्या कारण है ? सम्बन्ध से । ये [प्रयाजादि] तादृश इतिकर्तव्यता से सम्बद्ध हैं । अतः साहचर्य से उस [इतिकर्तव्यता] का बोध कराते हैं । अभिधान से । जैसे कौण्डपायिनामयन में अग्निहोत्र इत्यादि अभिधान कर्म के वाचक हैं । वह कर्म सहचरित धर्मों को प्राप्त कराते हैं । उन [धर्मों] के न होने पर यहां अभिधान युक्त नहीं होता इससे उनके धर्मों की सत्ता जानी जाती है । इसी प्रकार यहां [सौर्यादि में] भी प्रयाजादि का दर्शन वैदिकी इतिकर्तव्यता के न होने पर उपपन्न नहीं होता इससे उस [वैदिकी इतिकर्तव्यता] का भाव (=विद्यमानता) भी जाना जाता है । (आक्षेप) न्याय न होने पर लिङ्ग [किसी के निर्णय का] कारण नहीं

---

१. द्र०—मी० भाष्य अ० २, पा० ३, अधि० ११ (सूत्र २४) ।

लिङ्गमकारणम्। सत्यमेवम्। उक्तस्तु न्यायो भागित्वादिति।

यत् तु दृष्टप्रवृत्तिर्लौकिकीति। तत्र ब्रूमः। यद्यपि दृष्टप्रवृत्तिः स्यात्, तथाऽपि वैदिक्येव नियम्येत। कथम्? यथा धेनुः किशोरेण। तद्यथा, कृष्णकिशोरा धेनुरिति। यद्यपि धेनुशब्दो गोधेन्वां दृष्टप्रवृत्तिस्तथाऽप्यभिधानसामान्यादश्वधेन्वामपि भागीति किशोरेण लिङ्गेनाश्वधेन्वां विज्ञायते। एवमिहापि यद्यपि लौकिकी इष्टप्रवृत्तिः, तथाऽपीतिकर्तव्यतासामान्येन भागित्वाल्लिङ्गेन वैदिकी विज्ञेया ॥७॥

---

होता है। (समाधान) यह सत्य है। न्याय कह चुके भागित्व से।

घन्नालाल जवाहरलाल अग्रवाल विरचित 'पूर्वमीमांसा-उद्धरणकोश' पृष्ठ ८६ पर शतपथ ब्राह्मण का पता दिया है उस पर यह वाक्य वा एतत् सदृश कोई वाक्य नहीं है।

---

१. अनुपलब्धमूलम्। २. 'गवामयनं प्रविष्टम्'—पाठान्तरम्।

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये सप्तमस्याध्यायस्य
चतुर्थः पादः



सम्पूर्णः सप्तमोऽध्यायः ॥

---

पूर्वमीमांसा-उद्धरणकोश में निर्दिष्ट आकरस्थान प्रायः चिन्त्य हैं। उनका मूल ग्रन्थ से मिलाये विना उपयोग करना स्वयं को तथा पाठकों को भ्रम में डालने वाला है। इससे इस ग्रन्थ का उपयोग वहुत सावधानता से करना चाहिये। हमारी दृष्टि में तो यह ग्रन्थ जिस रूप में और जिस प्रतिष्ठित संस्था से प्रकाशित हुआ है वह उसके अनुरूप नहीं है ॥२०॥

इति अजयमेरु (अजमेर) मण्डलान्तर्गत-विरञ्च्यावासा (विरकच्यावासा)-
भिजनेन सारस्वत-कुलावतंसस्य तत्रभवतः श्री सूर्यरामस्य प्रपौत्रेण
श्री रघुनाथस्य पौत्रेण श्रीयमुनादेवी-गौरीलालाचार्ययोः पुत्रेण
पूर्वोत्तरमीमांसापारदृश्वनां महामहोपाध्यायाद्यनेकविरुद्भाजाम्
श्रीचिन्नस्वामिशास्त्र्यपरनाम्नां वेङ्कटसुब्रह्मण्य-शास्त्रिणाम्
अन्तेवासिना भारद्वाजगोत्रेण त्रिप्रवरेण
वाजसनेयचरणेन माध्यन्दिनिना
युधिष्ठिर-मीमांसकेन
विरचितायां
मीमांसा-शाबरभाष्यस्य वैदिकतत्त्व-प्रकाशिन्यां 'यशोदा'ख्यायां हिन्दी-व्याख्यायां
सप्तमोऽध्यायः पूर्तिमगात् ॥

२०४७ वैक्रमाब्दे आषाढकृष्णायां नवम्यां
रविवासरे (=जूनमासे सप्तदशतारिकायाम्) १९९० खैस्ताब्दे
सप्तमाध्यायस्य शाबरभाष्य-व्याख्या पूर्तिमगात् ॥



# मीमांसा-शाबर-भाष्यम्

(हिन्दी-व्याख्या-सहितम्)

## अष्टमाध्याये प्रथमः पादः

### [ विशेषातिदेशप्रतिज्ञाधिकरणम् ॥१॥ ]

एवं तावत् सप्तमेनाध्यायेन सामान्यतोऽतिदेशलक्षणमुक्तम्—'अविहितधर्मकेष्वैन्द्राग्नादिषु कर्मसु विहितधर्मकेभ्यो दर्शपूर्णमासादिभ्यो धर्मा अतिदिश्यन्ते' इति। तत्र चिन्ता भवति—किमेकस्मिन् कर्मणि सर्वकर्मभ्यो[1] धर्मातिदेश उतैकस्मादिति। अविशेषात् सर्वेभ्य इति प्राप्तम्। एकेन तु निराकाङ्क्षीकृते कर्मणि द्वितीयधर्मप्राप्तौ किंचित् कारणं नास्ति। सत्यम्। तदेव तु न ज्ञायते। कस्मिन् कस्येति? तदर्थं विशेषलक्षणं वक्तव्यमस्मिन्नस्येति। तदिदमध्यायादौ प्रतिज्ञायते—

**अथ विशेषलक्षणम् ॥१॥ (प्रतिज्ञा)**

---

व्याख्या—इस प्रकार सप्तमाध्याय से सामान्य रूप से अतिदेश लक्षण कहा है—'जिनका धर्म विहित नहीं है ऐसे ऐन्द्राग्नादि कर्मों में विहितधर्मवाले दर्शपूर्णमासादि से धर्म अतिदिष्ट होते हैं।' इससे विचार होता है—क्या एक कर्म में सब [विहितधर्मवाले] कर्मों से धर्म का अतिदेश होता है अथवा एक कर्म से। अविशेष (=विशेष न कहने) से सबसे [धर्म अतिदिष्ट होते हैं] ऐसा प्राप्त होता है। एक [विहितधर्मवाले कर्म] से [अविहितधर्मवाले] कर्म के निराकाङ्क्ष कर देने पर द्वितीय कर्म के धर्म की प्राप्ति में कुछ प्रयोजन नहीं है। यह सत्य है। परन्तु यही तो ज्ञात नहीं होता है कि किस कर्म में किसके धर्म का अतिदेश होवे? इसलिये विशेष लक्षण कहना चाहिये—इस कर्म में इस कर्म का धर्म अतिदिष्ट होवे। यह अध्याय के आरम्भ में प्रतिज्ञात किया जाता है—

**अथ विशेषलक्षणम् ॥१॥**

सूत्रार्थः—(अथ) सामान्य अतिदेश के सप्तम अध्याय से निरूपण करने के अनन्तर (विशेषलक्षणम्) विशेष अतिदेश के लक्षण का निरूपण करते हैं।

---

१. 'सर्वकर्मसु'—पाठान्तरम्।

अथ विशेषलक्षणमिति । अथेदानीं वृत्तात् सामान्यातिदेशलक्षणादनन्तरं विशेषलक्षणं वक्ष्यामः । तदुच्यमानं यथाकालं बोद्धव्यमिति ॥१॥

---

[सादृश्यविशेषेण नियतप्रकृतितो धर्मातिदेशाधिकरणम् ॥२॥]

तदेतत् संक्षेपेणैवोच्यते—

यस्य लिङ्गमर्थसंयोगादभिधानवत् ॥२॥ (उ०)

यस्य वैदिकस्य विध्यन्तरस्य लिङ्गं किंचित्, शब्दगतमर्थगतं वा वैकृत्यां कर्मचोदनायां, तद्गुणवाक्ये वा दृश्यते, तत्र स विध्यन्तः स्यात् । कुतः ? अर्थसंयोगात् । तस्यार्थस्य लिङ्गस्य तेन विध्यन्तविशेषणेन संयोगोऽनुभूतपूर्वः । संयोगिनोश्चान्यतरो दृश्यमान इतरमदृश्यमानमप्यनुमानाद् बुद्धौ संनिधापयति । अभिधानवत् । यथा-अग्निहोत्रमित्यभिधानं कौण्डपायिनामयने श्रूयमाणं नैयमिका-

---

व्याख्या—अब कहे गये सामान्यातिदेश के लक्षण के अनन्तर विशेष अतिदेश का लक्षण कहते हैं। पूर्व निरूपित सामान्यातिदेश के लक्षण के अनन्तर विशेष अतिदेश का लक्षण कहेंगे। उसे यथाकाल कहे गये को जानना चाहिये ॥१॥

---

व्याख्या—वह (=विशेषातिदेश लक्षण) संक्षेप से ही कहा जाता है—

यस्य लिङ्गमर्थसंयोगादभिधानवत् ॥२॥

सूत्रार्थः—(यस्य) जिस आग्नेयादि विध्यन्त का (लिङ्गम्) कोई शब्दगत अथवा अर्थगत लिङ्ग विकृति कर्म की चोदना अथवा उसके गुण वाक्यों में दिखाई देता है, वह वहां =सौर्यादि विध्यन्त होवे (अर्थसंयोगात्) उस अर्थलिङ्ग के उस विध्यन्त के साथ संयोग होने से, (अभिधानवत्) अग्निहोत्र आदि नाम के समान।

व्याख्या—जिस वैदिक विध्यन्त का शब्दगत अथवा अर्थगत कोई लिङ्ग विकृति यागों की चोदना में अथवा उसके गुण वाक्य में देखा जाता है, वहां वह विध्यन्त होवे। किस हेतु से ? अर्थ के संयोग से। उस अर्थ=लिङ्ग का उस विध्यन्त विशेष के साथ पूर्व अनुभव किया गया संयोग है। दो संयोगियों में एक दृश्यमान (=दिखाई देता हुआ) इतर (=दूसरे) अदृश्यमान का भी अनुमान से बुद्धि में उपस्थित कराता है अभिधान के समान। जैसे अग्निहोत्र यह नाम कौण्डपायियों के अयन में श्रूयमाण नियम से किये जानेवाले (=नित्य)

ग्निहोत्रधर्मान् बुद्धौ संनिधापयति। किमतोऽत्र ? एतदतो भवति, अपूर्णं यद्वाक्यं तत्पूरणसमर्थेनावयवेन बुद्धौ संनिहितेनैकवाक्यतां याति। यथा **दर्शपूर्णमासाभ्यां यजेत**[1] इति विध्यादिः, कथमिति विध्यन्तापेक्षः, अग्न्यन्वाधानादिविधानकाण्डेन पाठाद् बुद्धौ संनिहितेनैकवाक्यतां याति। दर्शपूर्णमासाभ्यां यजेतेत्थमिति। एवं विध्यन्तापेक्षो यो वैकृतो विध्यादिः, सोऽपि वैदिकेन विध्यन्तेनानुमानाद् बुद्धौ संनिहितेनैकवाक्यतां यास्यति। यथा—**सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः**[2] इति। तत्र कथमिति विध्यन्तापेक्षायामनेकविध्यन्तसंनिपातेऽसाधारणेन निर्वपतिशब्देन दार्शपौर्णमासिकविध्यन्तसंयोगिना लिङ्गेन तदीयो विध्यन्तः प्रसज्यते। तत्राप्याग्नेयाद्यनेकापूर्वविध्यन्तप्रसङ्गे, एकदेवतात्वेन वौषधिना वाऽसाधारणेन लिङ्गेनाऽऽग्नेयविध्यन्तो नियम्यते। तदेतदेवं विज्ञायते, सौर्यं चरुं निर्वपेदाग्नेयवत्। **आग्नावैष्णवमेकादशकपालं निर्वपेद्**[3] अग्नीषोमीयवत्। सर्वत्रैवम्।

---

अग्निहोत्र के धर्मों को बुद्धि में उपस्थित कराता है। (आक्षेप) इससे यहां पर क्या [सिद्ध होता है] ? (समाधान) इससे यह होता है कि अपूर्ण जो वाक्य है वह पूरण समर्थ अवयव वाले बुद्धि में सन्निहित के साथ एकवाक्यता को प्राप्त होता है। जैसे दर्शपूर्णमासाभ्यां यजेत यह विध्यादि वाक्य, 'कैसे इस' इस आकाङ्क्षा से विध्यन्त की अपेक्षा रखता हुआ अग्न्यन्वाधान आदि विधान समुदाय के साथ पाठ से बुद्धि में समीपस्थ के साथ एकवाक्यता को प्राप्त होता है—दर्शपूर्णमासों से इस प्रकार यजन करे। इसी प्रकार विध्यन्त की अपेक्षा वाला जो विकृतियागस्थ विध्यादि है, वह भी बुद्धि में सन्निहित वैदिक विध्यन्त के साथ अनुमान से एकवाक्यता को प्राप्त होवेगा। जैसे सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः (= ब्रह्मवर्चस की कामनावाला सौर्य चरु का निर्वाप करे) यह। वहां कैसे इस आकाङ्क्षा से विध्यन्त की अपेक्षा होने पर अनेक विध्यन्तों के सन्निपात में (= एक साथ उपस्थित होने पर) असाधारण (= विशेष) 'निर्वाप'शब्द से दर्शपूर्णमास के विध्यन्त संयोगी लिङ्ग से उस (= दर्शपूर्णमास) का विध्यन्त प्राप्त होता है। वहां भी आग्नेयादि अनेक [याग होने से अनेक] अपूर्व विध्यन्तों की प्राप्ति में एकदेवतात्व से अथवा औषधि के असाधारण लिङ्ग से आग्नेय विध्यन्त नियमित होता है। इससे इस प्रकार जाना जाता है—सूर्य देवतावाले चरु द्रव्यवाले याग को आग्नेय याग के समान करे। आग्नावैष्णव'एकादशकपाल का निर्वाप करे अग्नीषोमीय के समान करे। इसी प्रकार सर्वत्र जानना चाहिये।

---

१. अनुपलब्धमूलम्। द्र०—यो दर्शपूर्णमासाभ्यां यजते। ऐ० ब्रा० १।१॥ शत० ब्रा० २।४।२।११॥

२. अनुपलब्धमूलम्। द्र०—सौर्यं चरुं निरवपन् ··· ब्रह्मवर्चसकामः। तै० सं० २।३।२।२-३॥

३. तै० सं० २ २।९, अस्मिन् अनुवाके बहुधावचनं श्रूयते किञ्चिद् भेदेन।

प्रतिपदाख्याने तु गौरवं परिहरद्भिर्वृत्तिकारैः सर्वसामान्यः शब्दः परिगृहीतः प्रकृतिवदिति। एवं यत्र सूक्ष्ममपि किंचित् सामान्यं, शब्दो वाऽर्थो वा, हविर्देवतादि तद्गुणा वा रूपादय उपलभ्येरन्, तत्र तदीयो विध्यन्तः कल्प्यः। तदेतत् संक्षेपेणात्रैव सर्वमुक्तम्। शिष्यहितार्थमुत्तरः प्रपञ्चः। श्लोकमप्युदाहरन्ति—

**वितीर्य हि महज्जालमृषिः[1] संक्षिप्य चाब्रवीत्।**
**इष्टं हि विदुषां लोके समासव्यासधारणम्[2]॥** इति ॥२॥

---

विवरण—स विध्यन्तः स्यात्—विध्यन्त=विधि के अवयव अर्थात् अङ्ग। तस्यार्थस्य लिङ्गस्य "अनुमानाद् बुद्धौ सन्निधापयति-इस भाग का कुमारिल ने 'अनुमान से बुद्धि में उपस्थिति कराता है' तात्पर्य का खण्डन करके 'उपमान से बुद्धि में उपस्थित कराता है' अभिप्राय की स्थापना की है। यह सब विस्तार से टुप्टीका में देखें। आग्नेयाद्यनेकापूर्वविध्यन्ते प्रसक्ते—पूर्णमास में आग्नेय अष्टाकपाल, अग्नीषोमीय एकादशकपाल, अग्नीषोमीय उपांशुयाग आज्य से, तीन यागों की विध्यन्तता है। दर्श में आग्नेय अष्टाकपाल, ऐन्द्रदधि, ऐन्द्रपयः, तीन यागों का विध्यन्त है। उनकी प्राप्ति होने पर। एकदेवताप्रसङ्गेन—विकृति याग सौर्य में सूर्य एक देवता होने से पूर्णमासस्थ एकदेवतावाले आग्नेय याग की विध्यन्तता को, अथवा ओषधिना विकृति यागस्थ चरु व्रीहि ओषधिवाला होने से अष्टाकपाल पुरोडाश के भी ओषधि द्रव्यवान् होने से सौर्य विकृतियाग पूर्णमासस्थ आग्नेय याग की विध्यन्तता को प्राप्त होता है। आग्नावैष्णवमेकादशकपालं निर्वपेद् यह विकृति याग दो देवतावाला होने से पूर्णमासस्थ अग्नीषोमीय दो देवता वाले एकादेश कपाल याग की विध्यन्तता को प्राप्त होता है। ऊपर जो सौर्य याग और आग्नावैष्णव याग में देवता वा हव्य द्रव्य में से एक की समानता से आग्नेय वा अग्नीषोमीय याग की विध्यन्तता प्राप्त हो सकती है। पुनः एकदेवतात्वेन वौषधिना वा दो का निर्देश क्यों किया। इसका उत्तर है देवतागत एकत्वादि के भेद होने पर जहां आज्य द्रव्य होगा वहां अग्नीषोमीय उपांशुयाग की विध्यन्तता होगी।

व्याख्या—प्रतिपद कथन (=प्रत्येक विकृति याग के विषय) में गौरव का परिहार करते हुए वृत्तिकारों ने सर्वसामान्य शब्द 'प्रकृतिवत्' को ग्रहण किया है। इस प्रकार जहां सूक्ष्म भी किञ्चित् सामान्य शब्द वा अर्थ तथा हवि और देवतादि उसके गुणभूत रूपादि उपलब्ध होवें, वहां उसके विध्यन्त की कल्पना करनी चाहिये। यह संक्षेप से ही यहां सब कहा है। शिष्यों के हित के लिये उत्तर प्रपञ्च है। [इस विषय में] श्लोक भी उदाहृत करते हैं—

महान् जाला=बन्धन कारण का विस्तार करके ऋषि ने संक्षेप से भी कहा है। लोक में विद्वानों को समास (=संक्षेप) और व्यास (=विस्तार) से धारण करना इष्ट है॥२॥

---

१. 'महज्जालमृषिः' इत्यपपाठः। न चास्य पाठस्यास्ति काचित् सङ्गतिः।

२. 'महज्ज्ञानमृषिः' इति शुद्धपाठेन युक्तः महाभारते आदिपर्वणि (१।५१) पठ्यते।

## [सोमे ऐष्टिकधर्मानतिदेशाधिकरणम् ॥३॥]

ज्योतिष्टोमेन स्वर्गकामो यजेतेति श्रूयते। तत्र विध्यन्तं प्रति चिन्ता। कुतोऽस्मिन् विध्यन्तः स्यादिति। तदुच्यते—

---

विवरण—वृत्तिकारैः—भाष्यकार शबर स्वामी ने जहां भी वृत्तिकार को उद्धृत किया है वहां एकवचनान्त शब्द का ही प्रयोग किया है। यहां वृत्तिकारैः बहुवचनान्त का प्रयोग होने से सब वृत्तिकारों=व्याख्याकारों का ग्रहण इष्ट है। शाबरभाष्य के व्याख्याता क्षीरसमुद्रवासिमिश्र ने 'व्याख्यातृभिः' रूप में निर्देश किया है। शिष्यहितार्थमुत्तरः प्रपञ्चः—जो 'इसके साथ इस कर्म की चोदनाविषयक लिङ्ग सामान्य है' इसकी विवेचना नहीं कर सकता उसके प्रति प्रतिनियत कर्म से चोदनालिङ्गसामान्य का ज्ञान कराने के लिये उत्तर प्रपञ्च है। प्रायः प्रत्येक आर्ष ग्रन्थ के प्रवक्ता महर्षि वृन्द शिष्यों के हित के लिये अपने प्रवचन में संक्षेप और प्रपञ्च का आश्रयण करते हैं। पाणिनि मुनि द्वारा अष्टाध्यायी में संक्षेप और प्रपञ्च से किये गये प्रवचन के विषय में महाभाष्यकार पतञ्जलि ने लिखा है—ते ह्यल्वपि विधयः सुपरिगृहीता भवन्ति येषां लक्षणं प्रपञ्चश्च। केवलं लक्षणं केवलः प्रपञ्चो वा न तथा कारकं भवति। (महाभाष्य २।१।५, ६।३।१४)।

अर्थात् वे ही विधियां अध्येताओं के द्वारा अच्छे प्रकार परिगृहीत होती हैं, जिनके लक्षण=संक्षिप्त वचन और प्रपञ्च=विस्तार होता है। जिन विधियों का केवल लक्षण अथवा प्रपञ्च ही होता है वे उस प्रकार उपकारक नहीं होती हैं।

उदाहरन्ति—वृत्तिकारा इति शेषः। अर्थात् वृत्तिकार अगले श्लोक को उदाहृत करते हैं। विस्तीर्य हि महज्जालम्—इसका तात्पर्य है ममत्व रूप महज्जाल बन्धन है उसको। द्र०—महदर्थजालं ममत्वबन्धनमिव क्षीरसमुद्रवासी मिश्र की व्याख्या। वस्तुतः महज्जालम् अपपाठ है। इस पाठ की सङ्गति भी नहीं लगती। शुद्धपाठ महज्ज्ञानम् होना चाहिये। यह श्लोक महाभारत आदिपर्व अ० १ के ५१ संख्या पर है। इसका अर्थ है—इतिहासरूपी महद्ज्ञान का विस्तार करके ऋषि (=कृष्णद्वैपायन व्यास) ने संक्षिप्त करके भी कहा है। महाभारत की उभयविध रचना उपलब्ध होती है। आरम्भ में संक्षिप्त रूप से समस्त ऐतिह्य का कथन है। उत्तरत्र १८ पर्वों में अति विस्तार से ॥२॥

---

व्याख्या—ज्योतिष्टोमेन स्वर्गकामो यजेत (=स्वर्ग की कामनावाला ज्योतिष्टोम से यजन करे) ऐसा सुना जाता है। उसमें विध्यन्त के प्रति चिन्ता है। इसमें विध्यन्त कहां (=किस याग) से हो वे। वह कहते हैं—

## प्रवृत्तत्वादिष्टेः सोमे प्रवृत्तिः स्यात् ॥३॥ (पू०)

प्रवृत्तत्वादिष्टेः[1] सोमे प्रवृत्तिः स्यात्। दार्शपौर्णमासिको विध्यन्तः सोमे स्यात्। कुतः ? प्रवृत्तत्वात्[1]। दीक्षणीयादिष्विष्टिषु दार्शपौर्णमासिको विध्यन्तः प्रवृत्तः दीक्षणीयायाम्, आतिथ्यायां,प्रायणीयायां,पशौ च। तदनन्तरं सोमः। तत्रापि स एव प्रवृत्त्या विज्ञायते। यथा, देवदत्तो भोजयितव्यः, विष्णुमित्रो भोजयितव्यः, माठरः कौण्डिन्यो भारद्वाज इत्युत्तरेष्वपि भोजयितव्य इति प्रवृत्त्याऽनुबध्यते। तस्माद् ऐष्टिकः सोमे विध्यन्तः ॥३॥

## लिङ्गदर्शनाच्च ॥४॥ (पू०)

तस्यैकशतं प्रयाजानुयाजाः[2], इति च ऐष्टिका धर्माः सोमे दृश्यन्ते। तस्माच्च अस्मिन् ऐष्टिको विध्यन्तः ॥४॥

---

## प्रवृत्तत्वादिष्टेः सोमे प्रवृत्तिः स्यात् ॥३॥

सूत्रार्थः—(सोमे) सोमयाग में (इष्टेः) इष्टि के धर्मों की प्रवृत्ति होवे (प्रवृत्तत्वात्) सोमाङ्गभूत दीक्षणीयादि में ऐष्टिक धर्मों के प्रवृत्त होने से।

विशेष – कुतूहलवृत्ति में सोमेऽपि पाठान्तर है।

व्याख्या—सोमयाग में [सोमाङ्गभूत दीक्षणीयादि इष्टियों की] प्रवृत्ति होने से इष्टि के धर्मों की प्रवृत्ति होवे। सोम में दार्शपौर्णमासिक विध्यन्त होवे। किस हेतु से ? प्रवृत्त होने से। दीक्षणीयादि इष्टियों में दार्शपौर्णमासिक विध्यन्त प्रवृत्त है—दीक्षणीया, आतिथ्या, प्रायणीया और पशु में। तदनन्तर सोम [होता है]। वहां भी वह (=दार्शपौर्णमासिक विध्यन्त) ही प्रवृत्ति से जाना जाता है। जैसे देवदत्त भोजयितव्य है, विष्णुमित्र भोजयितव्य है, माठर कौण्डिन्य भारद्वाज [ऐसा कहने पर] उत्तरों में भी भोजयितव्य यह प्रवृत्ति से अनुबन्धित होता है। इसलिये सोम में ऐष्टिक विध्यन्त होवे ॥३॥

## लिङ्गदर्शनाच्च ॥४॥

सूत्रार्थः – प्रयाजादि (लिङ्गदर्शनात्) लिङ्ग दर्शन से (च) भी सोम में ऐष्टिक धर्म होवें। [लिङ्गदर्शन भाष्य में देखें।]

व्याख्या - तस्यैकशतं प्रयाजानुयाजाः (=उस सोम के एक सौ एक प्रयाज और अनुयाज होते हैं) ये (=प्रयाज अनुयाज) ऐष्टिक धर्म सोम में देखे जाते हैं। उससे भी इस (=सोम) में ऐष्टिक विध्यन्त प्राप्त होता है ॥४॥

---

१. 'प्रवृत्तित्वात्'—पाठान्तरम्।

२. अनुपलब्धमूलम्। द्र०—त एकशतं प्रयाजानुयाजा भवन्ति। शाङ्खा०ब्रा० १८।१०॥

**कृत्स्नविधानाद् वाऽपूर्वत्वम् ॥५॥ (उ०)**

अपूर्वत्वमेव हि सोमे। स न कुतश्चिद् धर्मान् गृह्णाति। कुतः? कृत्स्न-विधानात्। इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वम्[1] उक्तम्। विहितेतिकर्तव्यताक-श्चायम्। तस्मादपूर्वः ॥५॥

**स्रुगभिधारणाभावस्य च नित्यानुवादात् ॥६॥**

---

विवरण—शाङ्खायन ब्राह्मण १८।१० में एकशत (१०१) प्रयाज और अनुयाज की जो उपपत्ति दर्शाई है, वह हमारी समझ में पूरी तरह न आने से हम गणना का विवरण देने में असमर्थ हैं। एकशतं प्रयाजानुयाजाः—एकशतम् एकोत्तरशतम् अर्थात् १०१। महाभाष्य के एकशतमध्वर्युशाखाः (पस्पशाह्निक) का कई लोग '१०० यजुर्वेद की शाखा' अर्थ करते हैं वह अशुद्ध है। संस्कृत भाषा के वाग्व्यवहारानुसार 'एकशतम्' का अर्थ १०१ ही होता है। चरण-व्यूह में भी शुक्लयजुर्वेद की १५ शाखाएं और कृष्णयजुर्वेद की ८६ शाखाएं (१५+८६=१०१) कही हैं। प्रकृत शाङ्खायन ब्राह्मण (१८।१०) में भी १०१ की उपपत्ति में कहा है—शतायुर्वै पुरुषः शतपर्वा शतवीर्य शतेन्द्रियः, उप य एकशततम स आत्मा। पुरुष शरीर को शतायु शतपर्व शतवीर्य शतेन्द्रिय कहकर एकशततम एक सौ एकवां आत्मा को गिनाया है ॥४॥

**कृत्स्नविधानाद् वाऽपूर्वत्वम् ॥५॥**

सूत्रार्थः—(वा) 'वा' शब्द पूर्व उक्त पक्ष के निराकरण के लिये है सोम में ऐष्टिक धर्म प्रवृत्त नहीं होते। (कृत्स्नविधानात्) सोम के प्रकरण में सकल अङ्गकलाप का विधान होने से उसका अपूर्वत्व है।

व्याख्या—सोम में अपूर्वत्व ही है। वह कहीं से भी धर्मों को ग्रहण नहीं करता। किस हेतु से? कृत्स्न का विधान होने से। इतिकर्तव्याविधेर्यजतेः पूर्वत्वम् (=जिस यजति की इतिकर्तव्यता की विधि नहीं कही है वह पूर्ववान् होता है अर्थात् वहां अतिदेश से धर्मों की प्राप्ति होती है) ऐसा कह चुके [मी० ७।४।१]। यह सोम विहित कर्तव्यतावाला है अर्थात् इसकी कृत्स्न इतिकर्तव्यता [प्रकरण में] विहित है। इससे यह अपूर्व है ॥५॥

**स्रुगभिधारणाभावस्य च नित्यानुवादात् ॥६॥**

सूत्रार्थः—(स्रुगभिधारणाभावस्य) स्रुक् के अभिधारण के अभाव का निर्देश (नित्या-नुवादात्) नित्यानुवाद होने से (च) भी सोमयाग में ऐष्टिक धर्मों की प्रवृत्ति नहीं है।

विशेष—न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवि में अन्तरिक्ष और द्युलोक में

---

१. मी० अ० ७ पा० ४ अ० १ सू० १॥

स्रुगभिघारणस्य चाभावानुवादः सोमे भवति—घृतं वै देवा वज्रं कृत्वा सोममघ्नन्, स्रुचौ बाहू। तस्मात् स्रुचि सोमहविर्नाऽऽसाद्यते। न सोममाज्येनाभिघारयति[1] इति। तदुपपद्यते, यद्यपूर्वः सोमः। अथ दर्शपूर्णमासप्रकृतिः स्यात् आज्येनाभिघार्य स्रुग्भ्यां हूयते। तत्रैतद् दर्शनं नोपपद्यते। तस्मादपूर्वः ॥६॥

## विधिरिति चेत् ॥७॥ (पू०)

इति चेत् पश्यसि, स्रुगभिघारणाभावानुवाददर्शनादपूर्वः सोम इति। अथ

---

अग्निचयन प्राप्त ही नहीं अतः यह प्रतिषेध नित्यानुवाद है। असति प्रसङ्गे प्रतिषेधो नित्यानुवादः। द्र०—मी० भाष्य १।२।१८॥

व्याख्या—स्रुगभिघारण के अभाव का अनुवाद भी सोम में होता है। घृतं वै देवा वज्रं कृत्वा सोममघ्नन् स्रुचौ बाहू। तस्मात् स्रुचि सोमहविर्नाऽऽसाद्यते। न सोममाज्येनाभिघारयति (=देवों ने घृत को वज्र बनाकर सोम को नष्ट किया दोनों स्रुच् दो बाहू हैं। इससे स्रुच् में सोम हवि का आसादन नहीं होता और न सोम हवि का घृत से अभिघारण करते हैं)। वह उपपन्न होता है यदि सोम अपूर्व है। यदि सोम दर्शपूर्णमास प्रकृति वाला होवे तो [सोम का] आज्य से अभिघारण करके दो स्रुचों से [उसका] होम होवे। उस अवस्था में यह उपपन्न नहीं होता। इससे सोम अपूर्व है ॥६॥

विवरण—स्रुगभिघारणस्य—दर्शपूर्णमासादि में पुरोडाश के जुहू नाम्नी स्रुक् में स्थापन से पूर्व स्रुवा से उपस्तरण किया जाता है। तत्पश्चात् पुरोडाश के अंगुष्ठपर्वमात्र दो भाग जुहू में रखकर स्रुक् का स्रुवा से अभिघारण किया जाता है। अभावानुवादः—सूत्र में नित्यानुवाद शब्द है। नित्यानुवाद का लक्षण मी० १।२।१८ के भाष्य में इस प्रकार दर्शाया है—असति प्रसङ्गे प्रतिषेधो नित्यानुवादः। स्रुचौ बाहू—आहुति देते समय जुहू स्रुक् के नीचे उपभृत् संज्ञक स्रुक् धारण की जाती है। इनको ही बाहू कहा है। स्रुचि सोमहविर्नाऽऽसाद्यते—जैसे जुहू स्रुक् में आहुति के लिये पुरोडाशादि हवि रखी जाती है तद्वत् सोम का जुहू में आसादन नहीं होता और न सोम हवि का स्रुवा से अभिघारण होता है ॥६॥

## विधिरिति चेत् ॥७॥

सूत्रार्थः—दर्शपूर्णमास से स्रुगभिघारण की प्राप्ति होने पर (विधिः) प्रतिषेध विधि (इति चेत्) मानी जाये तो।

व्याख्या—यदि यह समझते हो कि स्रुक् के अभिघारण के अभाव के अनुवाददर्शन से

---

१. अनुपलब्धमूलम्। मै० संहितायां (३।८।२) तु 'घृत वै देवा वज्रं कृत्वा सोममघ्नन् स्रुचौ बाहू' एतावानेव पाठ उपलभ्यते।

कस्माद् दर्शपूर्णमासप्रकृतित्वेन प्राप्तस्य स्रुगभिघारणस्य प्रतिषेधकोऽयं विधिर्न भवति ? ॥७॥

इति स्थितायां प्रतिज्ञायां सूत्रेण परिचोदयति—

**न वाक्यशेषत्वात् ॥८॥ (उ०)**

नायं विधिः। कस्मात् ? वाक्यशेषत्वात्। अन्योऽत्र विधिराम्नातः। यदाह-**अंशुरंशुस्ते देव सोमाऽऽप्यायताम्**[1] इति। तस्य वाक्यशेषोऽयम्। कथं ज्ञायते? तेनाऽऽकाङ्क्षितत्वात्। **अवधिषुर्वा एतत् सोमं यदभिषुण्वन्ति। यदस्य स्रुचौ बाहू कुर्वन्ति। यच्चाऽऽज्यमन्तिकमकार्षुः। यदाह—अंशुरंशुस्ते देव सोमाऽऽप्यायताम् इति। यदेवास्याघ्नन्तः क्रूरमकुर्वंस्तदाप्याययन्ति**[2] इति। यद्ययमपि विधिः स्याद्

---

सोम अपूर्व है तो किस हेतु से दर्शपूर्णमास के प्रकृतित्व के कारण प्राप्त स्रुगभिघारण की प्रतिषेधक यह विधि नहीं होती है ? ॥७॥

व्याख्या—ऐसी प्रतिज्ञा के स्थित होने पर सूत्र से उत्तर देते हैं—

**न वाक्यशेषत्वात् ॥८॥**

सूत्रार्थः—(न) प्रतिषेध विधि नहीं है। (वाक्यशेषत्वात्) वाक्यशेष होने से। अर्थात् स्रुगभिघारण के अभावरूप अनुवाद अंशुरंशुस्ते देव सोम आप्यायताम् विधि का वाक्यशेष है। इस कारण यह प्रतिषेध विधि नहीं हो सकती।

व्याख्या—यह [प्रतिषेध] विधि नहीं है। किस हेतु से ? वाक्यशेष होने से। यहां अन्य विधि पढ़ी है—अंशुरंशुस्ते देव सोमाऽऽप्यायताम् (=हे देव सोम तुम्हारा अवयव अवयव आप्यायित होवे=बढ़े)। इस विधि का वाक्यशेष है। कैसे जाना जाता है ? उससे आकाङ्क्षित होने से अर्थात् उसकी आकाङ्क्षा रखने से। अवधिषुर्वा एतत् सोमं यदभिषुण्वन्ति। यदस्य स्रुचौ बाहू कुर्वन्ति। यच्चाऽऽज्यमन्तिकमकार्षुः। यदाह—अंशुरंशुस्ते देव सोमाऽऽप्यायताम् इति। यदेवास्याघ्नन्तः क्रूरमकुर्वंस्तदाप्याययन्ति (=मारते हैं जो यह सोम का अभिषव करते हैं। जो इसके दोनों स्रुचों को बाहू बनाते हैं और जो आज्य को समीप में रखते हैं। जो यह कहा है—हे देव सोम तुम्हारा अवयव अवयव बढ़े। जो ही इसको मारते हुए क्रूर कर्म किया है उसे आप्यायित करते हैं)। यदि यह (स्रुग-

---

१. मै० सं० ३।८।२॥

२. मै० संहितायां (३।८।२) त्वित्थं पठ्यते—अवधिषुर्वा एतत् सोमं यदस्य स्रुचं चाज्यं चान्तिकमकार्षुर्यदाह अंशुरंशुस्ते देव सोमाप्यायतामिति। यदेवास्य घ्नन्तं क्रूरमक्रस्तदक्रूरमक्रंस्तदाप्यायति। (भाष्यपाठे योऽपपाठ आसीत् तस्य मै० सहितापाठाधारेण शोधनं कृतम्।)

वाक्यं भिद्येत । तस्मान्न विधिः ॥८॥

## शङ्कते चानुपोषणात् ॥९॥ (उ०)

सोमे शङ्कते—यदनुपोष्य प्रयायाद् ग्रीवबद्धमेनममुष्मिँल्लोके नेनीयेरन्[1] इति । दार्शपौर्णमासिके विध्यन्ते सति नियतमुपोषणं स्यात् । तानुपोषणाशङ्का न युज्यते ।[2] तस्मादपूर्वः ॥९॥

---

भिधारण का अनुवाद्दर्शन) भी विधि होवे तो वाक्य भेद होवे । इससे [यह प्रतिषेध] विधि नहीं है ॥८॥

विवरण—भाष्यकार ने जो सूत्र ६ तथा इस ८वें सूत्र के भाष्य में वैदिक वचन उद्धृत किये हैं उनका कुछ भाग मै० सं० ३।८।२ में मिलता है कुछ भाग नहीं मिलता । सम्भव है वह मैत्रायणी की किसी अवान्तर शाखा का पाठ हो ॥८॥

### शङ्कते चानुपोषणात् ॥९॥

सूत्रार्थः—(च) और (अनुपोषणात्) वेदि के अनुपोषण से (शङ्कते) शङ्का करता है उससे भी सोम अपूर्व कर्म है ।

विशेष—अनुपोषण तथा तद्विषयक शङ्का भाष्य में देखें ।

व्याख्या—सोम में शङ्का करता है—यदनुपोष्य प्रयायाद् ग्रीवबद्धमेनममुष्मिँल्लोके नेनीयेरन् (=यदि वेदि का प्रदाह विना किये यजमान मर जाये तो ग्रीवा से बन्धे हुए इस यजमान को परलोक में यमभृत्य ले जायें) । दार्शपौर्णमासिक विध्यन्त होने पर [बर्हि का] उपोषण नियमित रूप से होवे । उस स्थिति में अनुपोषण की शङ्का युक्त नहीं होती। इससे सोम अपूर्व है ॥९॥

विवरण—यदनुपोष्य—'न उप ओष्य' उष दाहे ण्यन्त से ल्यप् । एङि पररूपम्(अष्टा० ६।१।९४) इत्यनेन पररूपम् । तै० सं० ३।३।८ में 'यदनुपोष्य' पाठ है । उसमें 'वृद्धिरेचि' (अष्टा० ६।१।८८) से छान्दस वृद्धि जाननी चाहिये । अथवा 'ओकारौकारपर औकारम्' इस तैत्तिरीयप्रातिशाख्य-वचन से वृद्धि होती है । ग्रीवबद्धम् यहां ङ्याप्पोः संज्ञाछन्दसोर्बहुलम्(अष्टा० ६।३।६३) से पूर्वपद को ह्रस्व हुआ है । नियतमुपोषणम्—दर्शपूर्णमास में कर्म के अन्त में वेदि में आस्तृत बर्हि का अग्नि में प्रक्षेप होता है । दार्शपौर्णमासिक धर्म की सोम में प्रवृत्ति होने पर बर्हि का उपोषण नियमित रूप से होवे उस अवस्था में अनुपोष्य यायात् शङ्का ही उपपन्न नहीं

---

१. तै० सं० ३।३।८।३-४॥ तै० सं० तु 'अनुपोष्य' पाठः ।

२. इतोऽग्रे 'अपूर्वत्वे तु प्रागुपोषणविधानाद् उपोष्यानुपोष्य वा प्रयायात् । तत्रानुपोषण-शङ्का युज्यते' इत्यधिकः पाठः । अत्र 'प्रागुपोषणाविधानात्' पाठेन भाव्यम् ।

## दर्शनम् ऐष्टिकानां स्यात् ॥१०॥ (उ०)

यच्च प्रयाजानुयाजानां दर्शनं लिङ्गत्वेनापदिष्टं[1], तस्यैकशतं प्रयाजानुयाजा इति। तद् दीक्षणीयादीनां सोमाङ्गभूतानां कर्मणां ये प्रयाजानुयाजास्तेषां समुच्चयवचनम्। किं कारणम्? सोमस्यापूर्वत्वात्। तेषां च तावतां तत्राभावात्। अङ्गाङ्गमपि च तस्येति शक्यते वक्तुम्। यथा वाजपेयस्य यूप इति। तस्मादपूर्वः सोमः ॥१०॥

———

होती है। न युज्यते—इससे आगे पूना संस्करण में 'अपूर्वत्वे तु प्रागुपोषणविधानाद् उपोष्यानुपोष्य वा प्रयायात्। तत्रानुपोषणशङ्का युज्यते पाठ अधिक है। इसका भाव है—सोम के अपूर्व होने पर पहले उपोषण के विधान होने से उपोष्य अनुपोष्य वा मरे। इसमें अनुपोषण शङ्का युक्त है। उस पाठ में 'प्रागुपोषणविधानात्' (=पूर्व उपोषण के विधान होने से) पाठ अशुद्ध है। उपोषण का पूर्व विधान होने पर अनुपोषण की शङ्का हो ही नहीं सकती। तथा तै० सं० में पूर्व उपोषण का विधान है ही नहीं। अतः पूना पाठ को स्वीकार करने पर भी प्रागुपोषणविधानात् पाठ होना चाहिये ॥६॥

### दर्शनमैष्टिकानां स्यात् ॥१०॥

सूत्रार्थः—जो प्रयाज अनुयाजों का (दर्शनम्) दर्शन कहा है वह (ऐष्टिकानाम्) सोमाङ्गभूत दीक्षणीयादि कर्मों का (स्यात्) होवे।

व्याख्या—और जो प्रयाजों और अनुयाजों का दर्शन लिङ्ग रूप कहा है - तस्यैकशतं प्रयाजानुयाजाः {=उसके एक सौ एक प्रयाज और अनुयाज हैं) वह सोमाङ्गभूत दीक्षणीयादि कर्मों के जो प्रयाज और अनुयाज हैं उनका समुच्चय वचन है। क्या कारण है? सोम के अपूर्व होने से। और उन [प्रयाजानुयाजों] के उतने वहां न होने से। उस [सोम] के अङ्ग [दक्षिणीयादि] के अङ्ग भी कह सकते हैं। जैसे वाजपेय का यूप [व्यवहार होता है]। इससे सोम अपूर्व है ॥१०॥

विवरण—वाजपेयस्य यूपः—यूप वाजपेय के पशुयाग में है, परन्तु उसे जिस प्रकार 'वाजपेय का यूप' कहा जाता है इसी प्रकार सोम के अङ्गभूत दीक्षणीयादि इष्टियों के अङ्गभूत प्रयाज अनुयाज सोम के भी कहे जा सकते हैं ॥१०॥

———

१. 'लिङ्गत्वेनोपदिष्टम्' पाठान्तरम्।

## [ऐन्द्राग्नादिषु दार्शपूर्णमासिकधर्मातिदेशाधिकरणम् ॥४॥]

इष्टय उदाहरणम्—ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः[1] इत्येवमाद्याः। तत्र सन्देहः—किं दार्शपौर्णमासिको वा, सौमिको वा विध्यन्त उत दार्शपौर्णमासिक एवेति ? किं प्राप्तम् ? अनियमः। दर्शपूर्णमासयोरपि विध्यन्तोऽस्ति सोमेऽपि। इमाश्चेष्टयो विध्यन्तापेक्षाः। एकेन च विध्यन्तेन भवितव्यमित्युक्तम्। न च गृह्यतेऽन्यतरनियमे विशेषः। तस्मादनियमः। एवं प्राप्ते उच्यते—

**इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात् ॥११॥ (उ०)**

इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः। हेतुर्नोक्तः प्रज्ञात इति। कः पुनरसौ ? चोदनायां प्रकृतिलिङ्गसंयोगः। किं पुनस्तत् प्रकृतिलिङ्गम् ? तद्धितेन देवतोपदेशः, कपालवत्ता, निर्वपतिशब्दश्च, ऐन्द्राग्नमेकादशकपालं निर्वपेद्[2] इति। इतरत्रापि

---

व्याख्या—इष्टियां उदाहरण हैं—ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः (=प्रजा की कामना वाला इन्द्राग्नीदेवता वाले एकादशकपाल का निर्वाप करे) इत्यादि। उनमें सन्देह होता है—क्या इनमें दर्शपूर्णमास का विध्यन्त होवे वा सोम का विध्यन्त अथवा दर्शपूर्णमास का ही विध्यन्त होवे ? क्या प्राप्त होता है ? अनियम प्राप्त होता है [क्योंकि] दर्शपूर्णमाससम्बन्धी विध्यन्त भी है और सोमसम्बन्धी भी। ये इष्टियां विध्यन्त की अपेक्षा रखने वाली हैं। एक विध्यन्त को होना चाहिये यह कह चुके। दोनों में से किसी एक के नियम में विशेष नहीं जाना जाता है। इससे अनियम होवे। ऐसा प्राप्त होने पर कहते हैं—

**इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात् ॥११॥**

सूत्रार्थः—(इष्टिषु) इष्टियों में (दर्शपूर्णमासयोः) दर्शपूर्णमास के विध्यन्त की (प्रवृत्तिः) प्रवृत्ति (स्यात्) होवे।

विशेष—इष्टि शब्द से वे कर्म कहे जाते हैं जो अध्वर्यु आग्नीध्र, होता एवं ब्रह्मा चार ऋत्विजों से सम्पाद्यमान तथा सपत्नीक यजमानकर्तृक होते हैं। द्र०—श्रौतपदार्थनिर्वचन, ऐष्टिक पदार्थ, संख्या १।

व्याख्या—इष्टियों में दर्शपूर्णमास [के विध्यन्त] की प्रवृत्ति होवे। हेतु नहीं कहा गया है यतः वह प्रज्ञात (=विज्ञात) है। वह कौनसा है ? चोदना में प्रकृति के लिङ्ग का संयोग। वह प्रकृति का लिङ्ग क्या है ? तद्धित से देवता का उपदेश (=कथन), कपालवत्ता और निर्वपति शब्द—ऐन्द्राग्नमेकादशकपालं निर्वपेत् (=इन्द्र और अग्निदेवतावाले एकादश-

---

१. तै० सं० २।२।१।१॥ २. द्र०—तै० सं० २।२।१।१॥

तथैव, ऐन्द्राग्नो द्वादशकपालः[1] इति। निर्वपतिरपि—अग्निहोत्रहवण्या हवींषि निर्वपति[2] इति। प्रकृतिलिङ्गेन च विध्यन्तविशेष उक्तः—यस्य लिङ्गमर्थसंयोगाद्[3] इति। तस्माद् दार्शपौर्णमासिकस्तासु विध्यन्तः। तच्च दर्शयति—प्रयाजे प्रयाजे कृष्णलं जुहोति[4] इति। अलिङ्गास्वपि स्थालीपुलाकवत्सिद्धिः ॥११॥

———

[अग्नीषोमीये पशौ दार्शपूर्णमासिकधर्मातिदेशाधिकरणम् ॥५॥]

पशावग्नीषोमीये चिन्त्यते—किं दार्शपौर्णमासिको विध्यन्त उत सौमिक इति? किं प्राप्तम्? तथैव पूर्वपक्षः[5]। तत्रोत्तरमभिधीयते—

---

कपाल का निर्वाप करे)। अन्यत्र भी वैसे ही है—ऐन्द्राग्नो द्वादशकपालः (=ऐन्द्राग्न देवतावाला द्वादशकपाल)। 'निर्वपति' भी—अग्निहोत्रहवण्या हवींषि निर्वपति (=अग्निहोत्रहवणी से हवियों का निर्वाप करता है। प्रकृति के लिङ्ग से भी विध्यन्त विशेष कहा है—यस्य लिङ्गमर्थसंयोगात् (=जिस आग्नेयादि विध्यन्त का कोई शब्दगत वा अर्थगत विकृति में दिखाई पड़े उसका वह विध्यन्त होवे अर्थ के संयोग से)। इससे दर्शपूर्णमाससम्बन्धी विध्यन्त उन इष्टियों में होता है। और उसे दर्शाता है—प्रयाजे प्रयाजे कृष्णलं जुहोति (=प्रतिप्रयाज एक एक कृष्णल का अग्नि में होम करता है)। जिन विकृतियों में कोई लिङ्ग नहीं है उनमें भी स्थालीपुलाक न्याय की तरह सिद्धि जानी जाती है ॥११॥

विवरण—ऐन्द्राग्नमेकादशकपालम्—यह विकृति याग है। इतरत्रापि तथैव—इतरत्र अर्थात् प्रकृतियाग दर्शपूर्णमास में भी वैसे ही लिङ्ग तद्धित से देवता संयोग और कपालवत्ता कही है। ऐन्द्राग्नो द्वादशकपालः—यह असान्नाय्ययाजी के दर्शयाग में कहा है। अग्निहोत्रहवण्या—यह पूर्णमास में हविर्निर्वाप के प्रकरण में पठित है ॥११॥

———

व्याख्या—अग्नीषोमीय पशु में विचार करते हैं—क्या दर्शपूर्णमाससम्बन्धी विध्यन्त होवे अथवा सोमसम्बन्धी। क्या प्राप्त होता है? उसी प्रकार पूर्वपक्ष [जानना चाहिये]। उसमें उत्तर देते हैं—

विवरण—सोमयाग में सुत्या से पूर्व दिन (चतुर्थ दिन) अग्नीषोमीय पशु का आलभन होता है। संहिता (शाखा) एवं ब्राह्मणग्रन्थों में यह अग्नीषोमीय सोमयाग के प्रकरण में पढ़ा

---

१. द्र०—ऐन्द्राग्नो द्वादशकपालः पुरोडाशो भवति। शत० १।६।४।३॥
२. आप० श्रौत १।१७।१०॥ ३. मी० ८।१।२॥
४. तै० सं० २।३।२।३॥ ५. 'पूर्वः पक्षः' पाठान्तरम्।

## पशौ च लिङ्गदर्शनात् ॥१२॥ (उ०)

पशौ च लिङ्गदर्शनात्। पशौ च दार्शपौर्णमासिक एव विध्यन्तः। कुतः? लिङ्गदर्शनात्। एकादश प्रयाजान् यजति[1], एकादशानुयाजान्[2] इति। तथा—स्रौचमाधारमाधार्य जुह्वा पशुमनक्ति[3] इति। ननु लिङ्गमपदिष्टं, कुतः प्राप्तिः? चोदनासामान्यात्। किं सामान्यम्? व्यक्तचोदनात्वम्[4]। का व्यक्तिः? द्रव्यदेवतावत्ता, अग्नीषोमीयं पशुम्[5] इति। इतरत्, ऐन्द्रं पयः[6] इति। अव्यक्तचोदनस्तु सोमः ॥१२॥

---

है और यही सब पशुयाग के धर्म आम्नात हैं। यही अग्नीषोमीय पशु अन्य पशुयागों की प्रकृति है। श्रौतसूत्रों में पशुयाग के समस्त धर्म निरूढ पशुबन्ध में पढ़े हैं। यह भेद ध्यान में रखना चाहिये।

### पशौ च लिङ्गदर्शनात् ॥१२॥

सूत्रार्थः—(पशौ) पशु में (च) भी (लिङ्गदर्शनात्) लिङ्ग के दर्शन से दर्शपूर्णमास सम्बन्धी विध्यन्त होता है। [लिङ्गदर्शन भाष्य में देखें]।

व्याख्या—पशु में भी लिङ्गदर्शन से। पशु में भी दार्शपौर्णमासिक ही विध्यन्त होता हैं। किस हेतु से? लिङ्गदर्शन से। एकादश प्रयाजान् यजति एकादशानुयाजान्(=ग्यारह प्रयाजों का यजन करता है, ग्यारह अनुयाजों का)। तथा—स्रौचमाधारमाधार्य जुह्वा पशुमनक्ति (=स्रुक् सम्बन्धी आधार का आधरण करके जुहू से पशु को घृत लगाता है। लिङ्ग का कथन किया है, प्राप्ति किस हेतु से होती है? चोदना सामान्य से। सामान्य क्या है? व्यक्त चोदनात्व। व्यक्ति क्या है? द्रव्यदेवतावत्त्व अर्थात् द्रव्य और देवता का सम्बन्ध—अग्नीषोमीयं पशुम्। [यहां अग्नीषोम देवता और पशु का सम्बन्ध व्यक्त है।] अन्य ऐन्द्रं पयः (=दर्शेष्टि में इन्द्र और पयः द्रव्य का सम्बन्ध है)। सोम अव्यक्त चोदना वाला है ['अग्निष्टोमेन यजेत' इस चोदना में देवता और द्रव्य का सम्बन्ध नहीं कहा है।१२।

---

१. तै० सं० ६।३।७।५॥ २. तै० सं० ६।३।११।६॥

३. अनुपलब्धमूलम्। द्र०—स्रुच्यमाधार्य प्रत्याक्रम्य जुह्वा पशुं समनक्ति। आप० श्रौत ७।१४।१॥ काशीमुद्रिते भाष्यपुस्तके 'स्रौवम्' इत्यपपाठः।

४. 'व्यक्तचोदनत्वं'—पाठान्तरम्।

५. तै० सं० ६।१।११।६॥ भाष्य एकदेश उद्धृतः।

६. अनुपलब्धमूलम्। शाङ्खा० ५।४॥

[सवनीयादिपशुष्वग्नीषोमीयधर्मातिदेशाधिकरणम् ॥६॥]

इह पशुबन्धा उदाहरणम्—सवनीयो, निरूढः पशुः, सौम्यादयश्च। तेषु किं दार्शपौर्णमासिको विध्यन्त उत दैक्षस्येति? दैक्ष इत्यग्नीषोमीय उच्यते, दीक्षासम्बन्धात्। किं प्राप्तम्? यथोक्तेन न्यायेन दार्शपौर्णमासिक इति। तथा प्राप्ते, उच्यते—

## दैक्षस्य चेतरेषु ॥१३॥ (उ०)

दैक्षस्य चेतरेषु पशुषु सवनीयादिष्वग्नीषोमीयस्य विध्यन्तः। आलभति-चोदनासामान्यात्, पशुत्वचोदनासामान्याच्च। तच्च दर्शयति—**वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यन्दिने, अङ्गैस्तृतीयसवने**[1] इति वपापुरोडाशाङ्गप्रचारं

---

व्याख्या—यहां पशुबन्ध उदाहरण हैं—सवनीय, निरूढ पशु, सौम्य आदि। उनमें क्या दर्शपूर्णमास सम्बन्धी विध्यन्त होता है अथवा दैक्ष का? दैक्ष शब्द से अग्नीषोमीय पशु कहा जाता है दीक्षा के सम्बन्ध से। क्या प्राप्त होता है? यथोक्त (= पूर्वोक्त) न्याय से दर्शपूर्णमास सम्बन्धी विध्यन्त प्राप्त होता हैं। ऐसा प्राप्त होने पर कहते हैं—

विवरण—सौम्यादयः—सोम में होने वाला सवनीय पशु। सौम्य शब्द से सोम देवता वाले अन्य पशु का ग्रहण भी हो सकता है। आदि शब्द से अन्य पशुओं का निर्देश जानना चाहिये। दीक्षासम्बन्धेन—सोमयाग के आरम्भ में यजमान दीक्षा ग्रहण करता है। एकादीक्षा पक्ष में तीन दिन उपसद् इष्टियां होती हैं। चतुर्थ दिन अर्थात् तीसरी उपसद् के दिन अग्नीषोमीय पशु का आलभन होता है। इस प्रकार दीक्षा सम्बन्ध से अग्नीषोमीय दैक्ष कहा गया है।

दैक्षस्य चेतरेषु ॥१३॥

सूत्रार्थः—(दैक्षस्य) दीक्षा प्रकरण में होनेवाले अग्नीषोमीय पशु का विध्यन्त (च) भी (इतरेषु) अन्य पशुओ में जानना चाहिये। अर्थात् अग्नीषोमीय पशुयाग इतर पशुयागों की प्रकृति है।

विशेष—यहां उपरि निर्दिष्ट विवरण देखें।

व्याख्या—दैक्ष का भी इतर पशुओं सवनीय आदि में अग्नीषोमीय का विध्यन्त जानना चाहिये। 'आलभति' चोदना के सामान्य से और पशुत्व चोदना के सामान्य से। उसे दर्शाता है—वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यन्दिने, अङ्गैस्तृतीयसवने (= वपा से प्रातःसवन में यजन होता है, पुरोडाश से माध्यन्दिन में और अङ्गों से तृतीय सवन में) इससे वपा पुरोडाश और अङ्गों का प्रचार दर्शाता है। और कहीं भेद से भी—औदुम्बरो यूपो

---

१. द्र०—मै० सं० ३।९।५॥

दर्शयति। भेदेन च तथा क्वचित्—**औदुम्बरो यूपो भवति**[1] इति यूपं दर्शयति। तस्मादग्नीषोमीयः पशूनां प्रकृतिः ॥१३॥

---

## [ऐकादशिनेषु पशुषु सवनीयपशुधर्मातिदेशाधिकरणम् ॥७॥]

ऐकादशिनाः पशव उदाहरणम्—**कृष्णशीर्ष आग्नेय** इत्यारभ्याऽऽम्नाताः[2]। अन्येषां च—**आग्नेयेन वापयति, मिथुनं सारस्वत्या करोति, प्रजनयति सौम्येन**[3] एति। तेषु सन्देहः। किमग्नीषोमीयविध्यन्त उत सवनीयविध्यन्त इति। किं प्राप्तम्? पूर्वोक्तेन न्यायेनाग्नीषोमीयस्येति प्राप्ते उच्यते—

**ऐकादशिनेषु सौत्यस्य द्वैरशन्यस्य दर्शनात् ॥१४॥ (उ०)**

---

भवति (=गूलर का यूप होता है) से यूप को दर्शाता है। इसलिये अग्नीषोमीय पशुओं की प्रकृति है ॥१३॥

---

व्याख्या—एकादशिनी के पशु उदाहरण हैं—कृष्णशीर्ष आग्नेयः से आरम्भ करके आम्नात ११ पशु। अन्यों के भी—आग्नेयेन वापयति, मिथुनं सरस्वत्या करोति, प्रजनयति सौम्येन (=आग्नेय पशु से बीज का वपन कराता है, सारस्वती मेषी के साथ मिथुन करता है, सौम्य पशु से प्रजा उत्पन्न करता है)। इनमें सन्देह है। वपा इनमें अग्नीषोमीय पशु का विध्यन्त होवे अथवा सवनीय पशु का विध्यन्त होवे। क्या प्राप्त है? पूर्वोक्त न्याय से अग्नीषोमीय का विध्यन्त होवे। ऐसा प्राप्त होने पर कहते हैं—

**ऐकादशिनेषु सौत्यस्य द्वैरशन्यस्य दर्शनात् ॥१४॥**

सूत्रार्थः—(ऐकादशिनेषु) एकादशिनी के पशुओं में (सौत्यस्य) सुत्या (=सोमाभिषव) के दिन होनेवाले सवनीय पशु के विध्यन्त होवें (द्वैरशनी) दो रशनात्व (अस्य) इसके (दर्शनात्) दर्शन से।

---

१. तै० सं० २।१।१।६॥

२. स्वल्पभेदेन—१ कृष्णशीर्षाग्नेयो, २ मेषी सारस्वती, ३ बभ्रुः सौम्यः, ४ श्यामः पौष्णः, ५ शितिपृष्ठो बार्हस्पत्यः, ६ पिशङ्गो वैश्वदेवो, ७ वृष्णिरैन्द्रः, ८ कल्माषो मारुतः, ९ संहित ऐन्द्राग्नो, १० अधोरामः सावित्रः, ११ पैलो वारुणः॥ मै० सं० ४।७।८॥

३. द्र०—आग्नेयेन वापयति मिथुनं सरस्वत्या करोति रेतः सौम्येन दधाति प्रजनयति। तै० सं० ६।६।५।१-२॥

ऐकादशिनेषु सौत्यस्य। सौत्य इति सुत्याकालत्वात् सवनीयमाहुः। तदीयो विध्यन्त ऐकादशिनेषु। कुतः? द्वैरशन्यस्य दर्शनात्। अग्निष्ठाद् द्वे द्वे रशने आदाय द्वाभ्यां रशनाभ्यामेकैकं यूपं परिव्ययति[1] इति। अग्नीषोमीयप्रकृतित्वे एकैकरशन्यं स्यात्। अथ वचनमिदं कस्मान्न भवति? अग्निष्ठाद् द्वे द्वे रशने आदायेत्येतदत्र विधीयते। यदि रशनाद् द्वित्वमपि विधीयते तदा वाक्यं भिद्यते। तस्मात् तदनूद्यते। ननु लिङ्गमपदिष्टं, कुतः प्राप्तिः? उच्यते। समाने पशुत्वे सुत्याकालता विशेषिकं लिङ्गम्। ततः प्राप्तिः ॥१४॥

---

व्याख्या—ऐकादशिन पशुओं में सौत्य का विध्यन्त होवे। सौत्य यह सुत्याकाल होने से सवनीय को कहते हैं। उनका विध्यन्त ऐकादशिन पशुओं में होवे। किस हेतु से? इसके (=ऐकादशिन पशुओं के) द्विरशनावाला देखे जाने से। अग्निष्ठाद् द्वे द्वे रशने आदाय द्वाभ्यां रशनाभ्यामेकैकं यूपं परिव्ययति (=अग्निष्ठ यूप से दो रशनाएं लेकर दो रशनाओं से एक एक यूप का परिव्ययण करता है)। अग्नीषोमीय प्रकृति होने पर एक एक रशना वाला होवे। (आक्षेप) अच्छा तो यह वचन क्यों नहीं होता? (समाधान) अग्निष्ठाद् द्वे द्वे रशने आदाय यह यहां विधान किया है। यदि रशनाद्वित्व का भी विधान करें तो वाक्यभेद होवे। इसलिये उस (=रशनाद्वित्व) का अनुकथन किया जाता है। (आक्षेप) आपने लिङ्ग का कथन किया है, प्राप्त कैसे होती है? (समाधान) समान पशुत्व होने पर सुत्याकालता विशिष्ट लिङ्ग है। अर्थात् सभी ११ पशुओं का सुत्या के दिन ही आलभन विशिष्ट लिङ्ग है। उससे प्राप्ति होती है ॥१४॥

विवरण—द्वैरशन्यस्य दर्शनात्—ऐकादशिन पशुओं के द्विरशनावाले होने से। कुतूहलवृत्ति में कहा है—ऐकादशिन पशुओं के दो रशना वाले होने से द्विरशना यूपा भवन्ति (=दो रशनावाले यूप होते हैं)। अग्निष्ठाद् द्वे द्वे रशने आदाय—अग्निष्ठ यूप का पहले तक्षणादि कर्म होता है। उसमें सभी पशुओं की रशनाएं लपेट दी जाती हैं। प्रति यूप पशु को बांधने से पूर्व अग्निष्ठ यूप में लपेटी हुई रशनाओं में से दो दो रशनाएं प्रत्येक यूप में लपेटी जाती हैं। सवनीय पशु के लिये भी दो रशनाएं कही हैं—त्रिवृता यूपं परिवीयाग्नेयं पशुमुपाकरोति। आप० श्रौत १२।१८।१२॥ इस पर रुद्रदत्त की व्याख्या—पूर्वरशनामुत्क्षिप्य त्रिवृतान्यया परिव्ययति, न तु तामेवादाय, पुनस्त्रिवृतवचनात्—अर्थात् पूर्व जो यूप में त्रिवृत रशना लपेटी गई थी उसको हटाकर अन्य त्रिवृत रशना से यूप को लपेटता है। न कि उसी पूर्व रशना को लेकर, पुनः त्रिवृत वचन से अर्थात् पूर्व रशना त्रिवृत थी ही यदि उसी से लपेटना होता तो पुनः त्रिवृत कहना व्यर्थ होता ॥१४॥

---

१. अनुपलब्धमूलम्।

[पशुगणेष्वैकादशिनधर्मातिदेशाधिकरणम् ॥८॥]

इह पशुगणा उदाहरणम्—वसन्ते ललामांस्त्रीन् वृषभान् आलभते[1]। तथा —मैत्रं श्वेतमालभते, वारुणं कृष्णमपां चौषधीनां च सन्धावन्नकामः[2] इति। तत्र विचार्यते—किमग्नीषोमीयस्य विध्यन्त उतैकादशिनानामिति? यथोक्तेन न्यायेनाग्नीषोमीयस्य। एवं प्राप्त उच्यते—

**तत्प्रवृत्तिर्गणेषु स्यात् प्रतिपशु यूपदर्शनात् ॥१५॥ (उ०)**

तत्प्रवृत्तिर्गणेषु स्यात्। तेषामैकादशिनानां प्रवृत्तिः पशुगणेषु स्यात्। कुतः? प्रतिपशु यूपदर्शनात्। यत् त्रिषु यूपेष्वालभेत बहिर्धाऽस्मादिन्द्रियं वीर्यं दध्यात्, भ्रातृव्यमस्य जनयेदेकयूप आलभेत[3] इति यूपत्रित्वं प्रतिषिध्यैकं यूपं सौत्रामण्यां विदधाति। तदुपपद्यते, यदि ऐकादशिनविध्यन्तः। तत्र हि प्रतिपशु यूपाः। अग्नी-

---

व्याख्या—यहां पशुगण उदाहरण हैं—वसन्ते ललामांस्त्रीन् वृषभान् आलभते (= वसन्त में तीन ललाम वृषभों का आलभन करे)। तथा—मैत्रं श्वेतमालभते, वारुणं कृष्णमपां चौषधीनां च सन्धावन्नकामः (=अन्नकाम पुरुष मित्रदेवता वाले श्वेत पशु का आलभन करे वरुण देवता वाले कृष्ण पशु का, जलों और ओषधियों की सन्धि में)। इस में विचार करते हैं—क्या इन में अग्नीषोमीय पशु का विध्यन्त होवे अथवा ऐकादशिनियों का? यथोक्त न्याय से अग्निषोमीय का विध्यन्त होवे। ऐसा प्राप्त होने पर कहते हैं—

विवरण ललामांस्त्रीन्—श्वेत पुण्ड्रवाल के चिह्नों से युक्त पशु ललाम कहा जाता है।

**तत्प्रवृत्तिर्गणेषु स्यात् प्रतिपशु यूपदर्शनात् ॥१५॥**

सूत्रार्थः—(गणेषु) पशुगणों में (तत्प्रवृत्तिः) ऐकादशिन की प्रवृत्ति (स्यात्) होवे। (प्रतिपशु) प्रति पशु (यूपदर्शनात्) यूप के दर्शन से।

व्याख्या—उस (=ऐकादशिन) की प्रवृत्ति गणों में होवे। उन ऐकादशिनों के विध्यन्त की प्रवृत्ति पशुगणों में होवे। किस हेतु से? प्रतिपशु यूप के दर्शन से। यत् त्रिषु यूपेष्वालभेत बहिर्धाऽस्मादिन्द्रियं वीर्यं दध्यात् भ्रातृव्यमस्य जनयेदेकयूपे आलभेत (=जो तीन यूपों में आलभन करे उस से इन्द्रिय वीर्य को करे, इस के भ्रातृव्य को उत्पन्न करे यदि एक यूप में आलभन करे)। इस से तीन यूपों का प्रतिषेध करके एक यूप का सौत्रामणि में विधान करता है। वह उपपन्न होता है यदि ऐकादशिनों का विध्यन्त होवे। वहां (= ऐकादशिनों में) प्रति

---

१. अनुपलब्धमूलम्। द्र०—वसन्ता प्रातस्त्रीन् ललामानालभेत। तै० सं० २।१।४।१॥
२. तै० सं० २।१।९।२॥
३. अतिस्वल्पभेदेन तै० ब्रा० १।८।६।१॥

षोमीयप्रकृतित्व एक एव यूपः स्यात्। तत्रैतन्नोपपद्यते। तस्माद् ऐकादशिनानां विध्यन्तः पशुगणेषु ॥१५॥

———

[अव्यक्तयागेष्वृद्भिदादयु सौमिकधर्मातिदेशाधिकरणम् ॥६॥]

इदं श्रूयते—अभिजिता यजेत[1], विश्वजिता यजेत[2] इत्येवंजातीयका यजतयः। तेषु विध्यन्तचिन्ता—किमेषु सौमिको विध्यन्त उत दार्शपौर्णमासिक इति ? अविशेषादनियमे प्राप्ते उच्यते—

अव्यक्तासु तु सोमस्य ॥१६॥ (उ०)

---

पशु यूप है। अग्नीषोमीय प्रकृतित्व होने पर एक ही यूप होवे। वहां यह (=त्रित्वप्रतिषेध) उपपन्न नहीं होता। इससे ऐकादशिनों का विध्यन्त पशुगणों में होवे ॥१५॥

विवरण—यूपत्रित्वं प्रतिषिध्य तीन ललामों के लिये तीन यूपों का प्रतिषेध यत् त्रिषु यूपेष्वालभते वाक्य में कहकर एक यूप का विधान किया है। तीन ललामों के लिये तीन यूपों की प्राप्ति ऐकादशिन की विध्यन्त प्राप्त होने पर ही होती है क्योंकि वहां प्रति पशु यूप कहा है। अग्नीषोमीयप्रकृतित्वे—पशुगणों में अग्नीषोमीय विध्यन्त की प्रवृत्ति होने पर एक यूप की ही प्राप्ति होगी क्योंकि अग्नीषोमीय में एक ही यूप है। उस अवस्था में तीन यूपों का प्रतिषेध उपपन्न नहीं होगा ॥१५॥

———

व्याख्या—यह सुना जाता है-अभिजिता यजेत (=अभिजित् से यजन करे), विश्वजिता यजेत (=विश्वजित् से यजन करे) इत्यादि यजतियां। उनमें विध्यन्त की चिन्ता होती है—क्या इन में सौमिक विध्यन्त होवे अथवा दर्शपूर्णमास का ? विशेष श्रुत न होने से अनियम प्राप्त होने पर कहते हैं—

अव्यक्तासु तु सोमस्य ॥१६॥

सूत्रार्थः—(अव्यक्तासु) अव्यक्त चोदनाओं में (तु) तो (सोमस्य) सोम का विध्यन्त होवे।

---

१. तै० सं० ५।६।५।१॥ द्र०- ताण्डय ब्रा० १६।८।४—अभिजिता वै देवा इमान् लोकान् अभ्यजयन्।

२ अनुपलब्धमूलम्। द्र०—तृतीये संवत्सरेऽभिजिता यजेत विश्वजिता वा यजेत सर्ववेदसं दक्षिणा। आप० श्रौत १७।२६।१२,१३॥; ताण्डय ब्रा० १६।८।४—विश्वजिता विश्वमजयन्।

अव्यक्तासु तु सोमस्य। काऽव्यक्तता? द्रव्यदेवतस्याभावः। द्रव्यदेवतेन हि यागोऽभिव्यज्यते। एताश्चाद्रव्यदेवतादचोदनाः, **अभिजिता यजेत**[1] इति। एतास्वव्यक्तासु सौमिको विध्यन्तः स्यात्। कुतः? अव्यक्तसामान्यात्। सोमोऽप्यव्यक्तचोदनः। **ज्योतिष्टोमेन यजेत**[2] इति। ननु, **सोमेन यजेत**[3] इत्येषा व्यक्तचोदना। तथाऽपि देवताया अभावादव्यक्तता। तथा च, **दूणाशेन**[4] **यजेत**[5] इत्यव्यक्तचोदिते, दीक्षणीयादीनि सोमाङ्गानि दर्शयति—**दीक्षणीयायां द्वादशमानं हिरण्यं दक्षिणा, चतुर्विंशतिमानं प्रायणीयायाम्**[6] इति। तस्मात् तासु सौमिको विध्यन्ताः।१६

---

व्याख्या—अव्यक्त चोदनाओं में तो सोम का विध्यन्त होवे। अव्यक्तता क्या है? द्रव्य देवता का अभाव। द्रव्य और देवता से ही याग अभिव्यक्त होता है। ये चोदनाएं द्रव्य और देवता से रहित हैं—अभिजिता यजेत। इन अव्यक्त चोदनाओं में सौमिक विध्यन्त होवे। किस हेतु से? अव्यक्तत्व के सामान्य से। सोम भी अव्यक्त चोदना वाला है ज्योतिष्टोमेन यजेत। (आक्षेप) सोमेन यजेत यह व्यक्त चोदना है। (समाधान) तथापि देवता के अभाव से अव्यक्तता है तथा दूणाशेन यजेत (=दूणाश नाम के याग से यजन करे) इस अव्यक्त चोदना वाले याग में दीक्षणीयादि सोमाङ्गों को दर्शाता है—दीक्षणीयायां द्वादशमानं हिरण्यं दक्षिणा (=दीक्षणीयेष्टि में द्वादशमान हिरण्य दक्षिणा होती है), चतुर्विंशतिमानं प्रायणीयायाम् (=चतुर्विंशतिमान हिरण्य दक्षिणा प्रायणीयेष्टि में होती है)। इस लिये उन अव्यक्त चोदना वाले यागों में सौमिक विध्यन्त होता है।।१६।।

विवरण—व्यक्तचोदना—सोम द्रव्य के श्रुत होने से पूर्वपक्षी ने इसे व्यक्त चोदना कहा है। सिद्धान्ती सोमद्रव्य के श्रुत होने पर भी देवता के अभाव से अव्यक्तता दर्शाता है। दूणाशेन यजेत—दूणाश याग का दूसरा नाम 'बहुहिरण्य' है (द्र०—कात्या० श्रौत २२।८।२५)। पुणे

---

१. द्र०—वसन्ते वसन्ते ज्योतिष्टोमेन यजेत। आप० श्रौत १०।२।५।।

२. द्र०—य एवं विद्वान् सोमेन यजते। तै० सं० ३।२।२।३।।

३. पुणेमुद्रिते संस्करणे सम्पादकेन टिप्पण्यां 'दूणाशेन इति पाठो लिखिते मुद्रिते च दृश्यते' इत्युक्त्वाऽत्र 'श्येनेन' इत्येवं पाठः शोधितः। स तूत्तरवाक्याननुकूलः। उद्धृतोद्धरणं तु दूणाशयाग एवोपलभ्यते।

४. अनुपलब्धमूलम्। द्र०—द्विनामोत्तरो बहुहिरण्यो दूणाशश्च। कात्या० श्रौत २२।८।२५।।

५. अनुपलब्धमूलम्। दीक्षणीयायां हिरण्यं द्वादशमानं ददाति, उत्तरेषु च द्विगुणं पूर्वं पूर्वम्, प्रायणीयाऽऽतिथ्योपसत्सु। कात्या० श्रौत २२।६।१,२,३।। तथा द्र०—आप० श्रौत २२।६।२०।।

[अहर्गणेषु द्वादशाहिकधर्मातिदेशाधिकरणम् ॥१०॥]

इह अहर्गणा उदाहरणम्—द्विरात्रादयः शतरात्रपर्यन्ताः। तेषु सन्देहः—किं ज्यौतिष्टोमिको विध्यन्त उत द्वादशाहिक इति ? पूर्वेण न्यायेन सौमिके प्राप्ते, उच्यते—

## गणेषु द्वादशाहस्य ॥१७॥ (उ०)

गणेषु द्वादशाहिको विध्यन्त इति। कुतः ? चोदनासामान्यात्। द्वादशाहेन यजेत[1], द्विरात्रेण यजेत[2] इति। अहःशब्दोऽप्यहोरात्रवचनः, रात्रिशब्दोऽपि। एत-

---

मुद्रित संस्करण के सम्पादक ने टिप्पणी में 'दूणाशेन इति पाठो लिखिते मुद्रिते च दृश्यते' ऐसा लिखकर मूल भाष्य में 'दूणाशेन' के स्थान पर 'श्येनेन' पाठ छापा है। यह उत्तरभाष्य से विपरीत है वहां जो उद्धरण दिया है वय दूणाशयागसम्बन्धी है न कि श्येनयागसम्बन्धी। आपस्तम्ब में इस याग का 'बहुहिरण्य' नाम से उल्लेख होने से सम्पादक को 'दूणाश' नामान्तर का ज्ञान न होने से उसने लिखित और मुद्रित पाठ की उपेक्षा करके मनमाना संशोधन किया है। द्वादशमानं हिरण्यं दक्षिणा—'मीयते हिरण्यादिकं येन तन्मानम्' जिस परिमाण से बनिये हिरण्य आदि तोलते हैं वह यहां 'मान' कहा गया है। आपस्तम्ब श्रौतसूत्र ५।२१।१० में स्पष्ट कहा है—येन हिरण्यं मिमीते तेन मीत्वा ददाति। वह मान क्या है? इसका उल्लेख रुद्रदत्त ने नहीं दर्शाया। धूर्तस्वामी ने—आद्यमानं गुञ्जिका। केचिद् वटबीजम् लिखा है। गुञ्जिका= गुञ्जा=रत्ती अथवा बड़ का बीज। हमारे विचार में मान शब्द का गुञ्जा=रत्ती अर्थ मानना ही उचित है ॥१६॥

———

व्याख्या—यहां अहर्गण उदाहरण हैं—द्विरात्र से लेकर शतरात्र पर्यन्त। उनमें सन्देह होता है—क्या इनमें ज्योतिष्टोमसम्बन्धी विध्यन्त होवे अथवा द्वादशाहसम्बन्धी ? पूर्व न्याय से सौमिक विध्यन्त के प्राप्त होने पर कहते हैं—

गणेषु द्वादशाहस्य ॥१७॥

सूत्रार्थः—(गणेषु) अहर्गणों में (द्वादशाहस्य) द्वादशाह का विध्यन्त होवे॥

व्याख्या—गणों में द्वादशाहसम्बन्धी विध्यन्त होवे। किस हेतु से ? चोदना के समान होने से द्वादशाहेन यजेत (=द्वादशाह से यजन करे), द्विरात्रेण यजेत (=द्विरात्र से यजन करे)। अहः शब्द भी अहोरात्र का वाचक है, रात्रि शब्द भी। यह शब्दगत लिङ्ग है

---

२. अनुपलब्धमूलम्। द्र०—द्वादशरात्रेण यजेत। तै० सं० ७।२।६।१॥

३. अनुपलब्धमूलम्। द्र०—सत्या० श्रौत १७।६।१॥

च्छब्दगतं लिङ्गम्, अर्थगतमपि गणत्वम् । गण एव सङ्घातधर्मैर्गं गमनुग्रहीतुं समर्थो न एकाहः । द्वाभ्यां लोमावद्यति, [द्वाभ्यां त्वचं, द्वाभ्यामसृक्] द्वाभ्यां मांसम्[1] इत्येतदारभ्य द्वादशोपसत्त्वं द्वादशाहिकं धर्मं गवामयने दर्शयति[2] । तस्मादहर्गणानां द्वादशाहः प्रकृतिः ॥१७॥

---

## [संवत्सरसत्रेषु गावामयनिकधर्मातिदेशाधिकरणम् ॥११॥]

इह संवत्सरसत्राण्युदाहरणम्—आदित्यानामयनप्रभृतीनि । तेषु चिन्ता—किं द्वादशाहिको विध्यन्त उत गवामयनिक इति । पूर्वोक्तेन न्यायेन द्वादशाहिके प्राप्तेऽभिधीयते—

### गव्यस्य च तदादिषु ॥१८॥ (उ०)

---

और अर्थगत गणत्व लिङ्ग है । गण ही सङ्घात धर्मों से गण को अनुगृहीत करने में समर्थ है, एकाह (=एक दिन में होनेवाला ज्योतिष्टोम) [अनुगृहीत करने में समर्थ] नहीं है। द्वाभ्यां लोमावद्यति [द्वाभ्यां त्वचं, द्वाभ्यामसृक्] द्वाभ्यां मांसम् (=दो से लोमों को काटता है, दो से त्वचा को, दो से रुधिर को, दो से मांस को) इत्यादि से आरम्भ करके द्वादशोपसत्त्व जो द्वादशाह का धर्म है उसको गवामयन में दर्शाता है। इससे अहर्गणों को द्वादशाह प्रकृति है ॥१७॥

विवरण—द्वादशाहिकं धर्मं गवामयने दर्शयति—इस विषय में मी० ७।४।१४ का भाष्य द्रष्टव्य है । गवामयन भी १८०+१+१८० संख्याक अहर्गण ही है । द्वादशाह के १२ दिनों के प्रत्येक दिन के कर्तव्य कर्म का चित्र मी० ८।३।३ भाष्य व्याख्या में देखें ॥१७॥

---

व्याख्या—यहां संवत्सरसत्र उदाहरण है—आदित्यानामयन आदि । उनमें विचार किया जाता है—क्या उनमें द्वादशाहिक विध्यन्त होवे अथवा गवामयनसम्बन्धी । पूर्वोक्त न्याय से द्वादशाहिक विध्यन्त प्राप्त होने पर कहते हैं—

### गव्यस्य च तदादिषु ॥१८॥

सूत्रार्थः—(च) और (गव्यस्य) गवामयन का विध्यन्त (तदादिषु) वह संवत्सर में

---

१. द्र०—द्वाभ्यां लोमावद्यति, द्वाभ्यां त्वचं, द्वाभ्यामसृक्, द्वाभ्यां मांसम् । तै० सं० ७।४।९।१॥

२. द्र०—मी० ७।४।१४ सूत्रभाष्यम् ।

गव्यस्य च तदादिषु । गव्यमिति, गवामयनं ब्रूमः । गोसम्बन्धात् । **गावो वा एतत् सत्रमासत**[1] इति । तस्य विध्यन्तस्तदादिषु संवत्सरसत्रेषु स्यात् । कुतः ? संवत्सरसामान्यात् । **पत्नय उपगायन्ति**[2] इति च माहाव्रतिकं धर्मं संवत्सरसत्रे दर्शयति । **ऋत्विज उपगायन्ति**[3] इति च सहस्रसंवत्सरे ॥१८॥

---

## [निकायिनामुत्तरेषु पूर्वनिकायिधर्मातिदेशाधिकरणम् ॥१२॥]

निकाय इति सङ्घात औत्तराधर्येणावस्थित उच्यते । स येषां ते निकायिनः । यथा—साहस्राः, साद्यस्काः । तेषां पूर्वस्य केचिद् धर्मा आम्नाताः, उत्तरे त्वधर्मकाः । तत्र चिन्त्यते—किं ज्योतिष्टोमस्य विध्यन्त उत प्रथमस्य निकायिन

---

समाप्य गवामयन जिन संवत्सर सत्रों का आदि में है उनमें होवे । ['गव्य' शब्द के विषय में आगे विवरण में देखें ।]

व्याख्या—गव्य का तदादि में विध्यन्त होवे । 'गव्य' से गवामयन को कहते हैं, गोसम्बन्ध से । गावो वा एतत् सत्रमासत (=गौवों ने इस सत्र को किया) । उस (=गवामयन का विध्यन्त तदादि संवत्सर सत्रों में होवे । किस हेतु से ? संवत्सर सामान्य से । पत्नय उपगायन्ति (=पत्नियां गान करती हैं) यह भी महाव्रतसम्बन्धी धर्म संवत्सर सत्र में दर्शाता है [कि उनमें गवामयनसम्बन्धी विध्यन्त होता है] । ऋत्विज उपगायन्ति (=ऋत्विक् उपगान करते हैं) यह भी संवत्सर सत्र में दर्शाता है ॥१८॥

विवरण—गव्यमिति गवामयनं ब्रूमः, गोसम्बन्धात्—'गवामयन' शब्द का अर्थ है—गौवों का अयन । अतः गो शब्द से तस्येदम् (अष्टा० ४।३।१२०) से उत्सर्ग अण् की प्राप्ति होने पर सर्वत्र गोरजादिप्रत्ययप्रसङ्गे यत् (वार्तिक ४।१।८५ सूत्रस्थ) से यत् प्रत्यय होता हैं ॥१८॥

---

व्याख्या—निकाय यह जो सङ्घात औत्तराधर्यरूप (=ऊपर नीचे रूप) से अवस्थित होता है, वह कहा जाता है । वह निकाय जिनका है वे निकायी कहाते हैं । जैसे—साहस्राः, साद्यस्काः [ये याग विशेषों के नाम हैं] । उनमें पूर्व (=प्रथम) के कुछ धर्म पठित हैं, उत्तर धर्मरहित हैं । उनमें विचार किया जाता है—क्या [उत्तरों में] ज्योतिष्टोम का विध्यन्त होवे अथवा

---

१. द्र० गावो वै सत्रमासत । ऐ० ब्रा० ४।१७॥

२. तै० सं० ७।५।८।३॥

३. अनुपलब्धमूलम् । द्र०—सर्वे सहर्त्विजो महाव्रतेन स्तुवीरन् । ताण्ड्य ब्रा० ५।६।१॥

इति ? अव्यक्तचोदनत्वाज्ज्योतिष्टोमस्य इति प्राप्ते उच्यते—

**निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात् ॥१९॥ (उ०)**

निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात्। कुतः ? निकायित्वसामान्यात्। साहस्राणां साहस्रसामान्यात्। साद्यस्काणां साद्यस्कसामान्यात्।[1] एवं सर्वत्र। पूर्वस्मिंश्च साहस्रे सहस्रं दक्षिणामाम्नायोत्तरस्मिन् दर्शयति—**यावदस्य साहस्रस्योत्तरा गौः समाहिता भवति, तावदस्माल्लोकादसौ लोकः**[2] इति। तथा पूर्वस्मिन् साद्यस्के—**साण्डस्त्रिसंवत्सरः सोमक्रयणः स्पर्धमानानाम्**[3] इत्याम्नायोत्तरस्मिन्नपि

---

पूर्व निकायियों का। अव्यक्त चोदना होने से ज्योतिष्टोम का विध्यन्त होवे। ऐसा प्राप्त होने पर कहते हैं—

**निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात् ॥१९॥**

सूत्रार्थः—(निकायिनाम्) निकायियों में (च) भी (पूर्वस्य) पूर्व=प्रथम के विध्यन्त की (उत्तरेषु) उत्तरों में (प्रवृत्तिः) प्रवृत्ति (स्यात्) होवे।

विशेष—निकाय शब्द में उपसमाधान (औत्तराधर्य रूप से राशीकरण) अर्थ में निपूर्वक चिञ् चयने से घञ् प्रत्यय होता है और धातु के आदि चकार को ककार हो जाता है। द्र०—निवासचितिशरीरोपसमाधानेष्वादेश्च कः (अष्टा० ३।३।४१)।

व्याख्या—निकायियों में भी पूर्व के विध्यन्त की उत्तरों में प्रवृत्ति होवे। किस हेतु से ? निकायित्व सामान्य से। साहस्रों की साहस्र सामान्य से, साद्यस्कों की साद्यस्क सामान्य से। इसी प्रकार सर्वत्र जानें। पूर्व साहस्र याग में सहस्र दक्षिणा का कथन करके उत्तर साहस्र में दर्शाता है—यावदस्य साहस्रस्योत्तरा गौः समाहिता भवति तावदस्माल्लोकादसौ लोकः (=जितनी इस साहस्र की उत्तर=ऊपर की गौ [ऊंची] स्थित होती है उतना इस लोक से वह लोक उत्तर है)। तथा पूर्व साद्यस्क में—साण्डस्त्रिसंवत्सरः सोमक्रयणः स्पर्धमानानाम् (=साण्ड=अण्डकोषसहित तीन संवत्सर वाला सोम क्रयण होता है स्पर्धा करने वालों का)। ऐसा कथन करके उत्तर साद्यस्क में भी उसे ही दर्शाता है—

---

१. 'साद्यस्कधर्मसामान्यात्' इति पाठान्तरम्।

२. अनुपलब्धमूलम्। द्र०—यावद् वै सहस्रं गाव उत्तराधरा इत्याहुस्तावदस्मात् लोकात् स्वर्गो लोकः। ताण्ड्य ब्रा० १६।८।६॥

३. अनुपलब्धमूलम्। द्र०—त्रिवत्सः साण्डः सोमक्रयणः सेन्द्रत्वाय। ताण्ड्य ब्रा० १६।१३।९॥ त्रिवत्सः साण्डः सोमक्रयणः। आप० श्रौत २२।२।२५॥

तमेव दर्शयति– **स्त्रीगौः सोमक्रयणी व्यावृत्ता ह्येषां स्पर्धिता**[1] इति। तस्मात् पूर्वस्योत्तरेषु धर्माः ॥१६॥

---

## [फलादीनामनतिदेशाधिकरणम् ॥१३॥]

इह फलनियमकर्तृसमुदाया उदाहरणम्। फलं स्वर्गः, नियमो यावज्जीविकोऽभ्यासः, कर्त्ता स्वर्गकामः, समुदायो दर्शपूर्णमासाविति। तत्र चिन्त्यते—किं फलनियमकर्तृसमुदायानां सौर्यादिषु प्रवृत्तिः, नेति? किं प्राप्तम्? **इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः**, इत्यनेन न्यायेन प्रवृत्तिरिति प्राप्तम्। तथा प्राप्त उच्यते—

---

स्त्रीगौः सोमक्रयणी व्यावृत्ता ह्येषां स्पर्धिता (=स्त्री अपत्य वाली गौ सोमक्रयणी होती है, उनकी स्पर्धिता निवृत्त हो गई है)। इससे पूर्व के धर्म उत्तरों में होते हैं ॥१६॥

विवरण– यावदस्य साहस्रस्य—ताण्ड्य ब्रा० १६।८।६ में पाठ है–यावद् वै सहस्रं गाव उत्तराधरा इत्याहुस्तावदस्मात् लोकात् स्वर्गो लोकः—इसका सायणाचार्य के अनुसार भाव है—सहस्रसंख्याक गायें उत्तराधर=अन्योन्य के ऊपर रूप से अवस्थित जितनी ऊंची होती उतना इस लोक से स्वर्गलोक है। इसकी सहस्र गायें दक्षिणा है। साण्डस्त्रिसंवत्सरः—ताण्ड्य ब्रा० ६।१३।६ मे त्रिवत्सः साण्डः सोमक्रयणः सेन्द्रत्वायं पाठ है। इसके भाष्य में सायणाचार्य ने लाट्या० श्रौतसूत्र ८।३।१-११ के अनुसार त्रिवत्सः के तीन अर्थ किये हैं—(१) तीसरे वर्ष की समाप्ति में कुछ शेष कालवाला त्रिवत्स कहाता है (२) जो बछड़ा तीन गायों का दूध पीता हो वह तीन का वत्स होने से त्रिवत्स कहाता है। (३) अथवा वत्सर पद के अन्त्य रेफ का लोप होने से तीन वर्ष का वत्स त्रिवत्स कहाता है। स्त्रीगौः स्त्र्यपत्या गौः स्त्रीगौः अर्थात् बछड़ीवाली गाय ॥१६॥

---

व्याख्या—यहां फल, नियम, कर्त्ता, और [आग्नेयादि] समुदाय उदाहरण हैं। फल स्वर्ग, नियम—यावज्जीवन [दर्शपूर्णमास का] अभ्यास, कर्त्ता—स्वर्गकाम और समुदाय—दर्शपूर्णमास [गत आग्नेयादि याग]। इनके विषय में विचार किया जाता है—क्या फल नियम कर्त्ता और समुदायों का सौर्यादि इष्टियों में प्रवृत्ति होती है या नहीं? क्या प्राप्त होता है? इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः (= इष्टियों में दर्शपूर्णमास के विध्यन्त की प्रवृत्ति होती है)। इस न्याय से प्रवृत्ति होती है यह प्राप्त होता है। ऐसा प्राप्त होने पर कहते हैं—

---

१. अनुपलब्धमूलम्। द्र०—स्त्रीगौः सोमक्रयणी। आप० श्रौत २२।४।६॥

**कर्मणस्त्वप्रवृत्तित्वात् फलनियमकर्तृसमुदायस्यानन्वयस्तद्-बन्धनत्वात् ॥२०॥ (३०)**

फलनियमकर्तृसमुदायस्याप्रवृत्तिः। कुतः ? कर्मणोऽप्रवृत्तित्वात् । तद्-

---

विवरण—सौर्यादि इष्टियों की पूर्ति के लिये जैसे दर्शपूर्णमास के विध्यन्त को स्वीकार किया जाता है उसी प्रकार दर्शपूर्णमास से सम्बद्ध फल-स्वर्ग, नियम—यावज्जीवन दर्शपूर्णमास करते रहना, कर्त्ता—स्वर्ग की कामनावाला तथा आग्नेयादि यागों का समुदाय इन सबकी प्रवृत्ति होनी चाहिये। अर्थात् सौर्यादि याग के साथ फल-स्वर्ग, नियम—यावज्जीवन अभ्यास, कर्त्ता— स्वर्ग की कामना वाला तथा आग्नेयादि याग समुदाय की प्रवृत्ति भी होनी चाहिये। तात्पर्य यह है कि स्वर्ग की कामनावाला स्वर्गरूपी फल प्राप्ति के लिये आग्नेयादि याग समुदाय का सौर्यादि याग करनेवाला यावज्जीवन करता रहे।

**कर्मणस्त्वप्रवृत्तित्वात् फलनियमकर्तृसमुदायस्यानन्वयस्तद्बन्धनत्वात् ॥२०॥**

सूत्रार्थः – सौर्यागादि में (कर्मणः) दर्शपूर्णमास के प्रधान कर्म की आकाङ्क्षा न होने से (अप्रवृत्तित्वात्) दर्शपूर्णमास की प्रवृत्ति न होने से (फलनियमकर्तृसमुदायस्य) फल नियम कर्त्ता समुदाय का (तद्बन्धनत्वात्) प्रकृतियाग के साथ बन्धन होने से सौर्यादि याग में (अनन्वयः) अन्वय (=सम्बन्ध) नहीं होता है।

विशेष–'तद्बन्धनत्वात्' के स्थान में 'तत्सम्बन्धात्' पाठान्तर है। अर्थ में भेद नहीं होता।

सूत्रार्थ-स्पष्टीकरण—प्रकृतिवद् विकृतिः कर्तव्या इस नियम से जैसे दर्शपूर्णमास के विध्यन्तों का अतिदेश होता है, उसी प्रकार दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत—में उक्त स्वर्ग-रूपी फल, स्वर्ग की कामनावाला कर्त्ता तथा यावज्जीवं दर्शपूर्णमासाभ्यां यजेत से यावज्जीवन करने का नियम तथा आग्नेयादि याग समुदाय इनका अतिदेश नहीं होता है। क्योंकि इनका सम्बन्ध दर्शपूर्णमास के साथ ही है। तथा सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः में सौर्य याग का फल—ब्रह्मवर्चस की प्राप्ति, कर्त्ता—ब्रह्मवर्चस की कामनावाला उक्त है अतः इस याग को इनकी आकाङ्क्षा ही नहीं है तथा यावज्जीवन कर्तव्य नियम भी क्रतु=दर्शपूर्णमास का धर्म नहीं है अपितु पुरुषधर्म है, यह द्वितीय अध्याय के चतुर्थ पाद के सूत्र १-७ में कह चुके हैं अतः नियम की प्राप्ति भी नहीं होगी। आग्नेयादि याग समुदाय भी दर्शपूर्णमास के साथ ही सम्बद्ध होने से समुदाय का भी अतिदेश नहीं होगा। वस्तुतः स्वर्गादि फल स्वर्ग कामनावाला कर्त्ता और आग्नेयादि याग समुदाय ये दर्शपूर्णमास के साथ से ही सम्बद्ध हैं। सौर्यादि यागों को तो केवल कथं कर्तव्यम् इस कथं भाव की आकाङ्क्षा होने से विध्यन्त की ही प्रवृत्ति होती है।

व्याख्या—फलनियमकर्तृसमुदाय की प्रवृत्ति नहीं होती है। किस हेतु से ? कर्म के अप्रवृत्तित्व से अर्थात् प्रधान कर्म की आकांक्षा न होने से दार्शपौर्णमासिक फलादि की प्रवृत्ति

बन्धनत्वाच्च फलादीनाम् ।

कर्म तावन्न प्रवर्तते । किं कारणम् ? विध्यन्तेन धर्माः प्रवर्तन्ते । न च कर्म विध्यन्तविहितम् । विध्यादिविहितं तत् । तस्मान्न प्रवर्तते । तस्याप्रवृत्तित्वात् फल-नियमकर्तृसमुदायस्यानन्वयः । अप्रवृत्तिरित्यर्थः । कुतः ? तद्बन्धनत्वात् । फलं तावत्, **दर्शपूर्णमासाभ्यां यजेत** इति दर्शपूर्णमाससंयुक्तं श्रुतम् । तद्यत्र दर्शपूर्णमासौ, तत्र भवितुमर्हति । न च सौर्यादिषु तौ स्तः । अतः स्वर्गस्यापि तत्राभावः । एवं नियमोऽपि कर्मबन्धनः । **यावज्जीवं दर्शपूर्णमासाभ्यां यजेत**[1] इति । स दर्शपूर्णमासा-भावे कथं स्यात् । तथा कर्त्ता कर्मबन्धनः । **दर्शपूर्णमासाभ्यां स्वर्गकामः**[2] इति । सोऽपि कथं तयोरसतोः स्यात् । समुदायोऽप्याग्नेयादीनाम् । तानि सौर्यादिषु न सन्तीति तत्समुदायः कथं तत्र भवेत् । तस्मात् तेषामप्रवृत्तिः[3] ॥२०॥

**प्रवृत्तौ चापि तादर्थ्यात् ॥२१॥**

---

नहीं होती है । उस (=दर्शपूर्णमास) के साथ फलादि का बन्धन होने से भी ।

कर्म की प्रवृत्ति नहीं होती है । क्या कारण है ? विध्यन्तरूप से धर्म प्रवृत्त होते हैं । कर्म विध्यन्तरूप से विहित नहीं है, वह विध्यादि रूप से विहित है । इससे कर्म प्रवृत्त नहीं होता है । उसकी प्रवृत्ति न होने पर फल नियम कर्त्ता और समुदाय का अन्वय (सम्बन्ध)नहीं होता है अर्थात् प्रवृत्ति नहीं होती है । किस हेतु से ? उसके साथ बन्धन होने से । फल — दर्शपूर्णमासाभ्यां यजेत से दर्शपूर्णमास संयुक्त श्रुत है । इसलिये जहां दर्शपूर्णमास हैं वहां उसे होना चाहिये । वे [दर्शपूर्णमास] सौर्यादि में नहीं हैं । इसलिये वहां (= सौर्यादि में) स्वर्ग का भी अभाव होता है । इसी प्रकार नियम भी कर्म से बन्धा है—यावज्जीवं दर्शपूर्ण-मासाभ्यां यजेत । वह दर्शपूर्णमास के अभाव में कैसे सम्भव होवे । तथा कर्त्ता भी कर्म से बन्धा है—दर्शपूर्णमासाभ्यां स्वर्गकामः । वह भी दोनों के अभाव में कैसे होवे । आग्नेयादि का समुदाय भी — वे सौर्यादि में नहीं हैं इससे आग्नेयादि का समुदाय वहां कैसे होवे । इससे उनकी वहां प्रवृत्ति नहीं होती है ॥२०॥

**प्रवृत्तौ चापि तादर्थ्यात् ॥२१॥**

**सूत्रार्थः** — (प्रवृत्तौ) फलादि की प्रवृत्ति होने पर (चापि) भी (तादर्थ्यात्) उनकी पुरुषादि के लिये होने से प्रवृत्ति निष्फल होगी ।

---

१. अनुपलब्धमूलम् । द्र०—आप० श्रौत ३।१४।१३॥
२. अनुपलब्धमूलम् । द्र०—आप० श्रौत ३।१४।८,९॥
३. 'तेषामेषामप्रवृत्तिः' पाठान्तरम् ।

अपि च धर्माणां प्रवृत्तिः कर्मार्था, कर्मण उपकर्तुम्। न च फलादीनि कर्मण उपकुर्वन्ति। फलं तावत् पुरुषस्योपकरोति, न कर्मणः। उक्तं हि—फलं च पुरुषार्थत्वाद्[1] इति। नियमोऽपि न कर्मधर्मः, कर्तृधर्मोऽसावित्युक्तम्—कर्तुर्वा श्रुतिसंयोगाद्[2] इति। तथा कर्त्ता स्वर्गकामो न कर्मार्थः। कर्म स्वर्गकामार्थम्। न हि स्वर्गकामः कर्मण उपदिश्यते, स्वर्गकामो यजेतेति। किं तर्हि? कर्म स्वर्गकामस्योपदिश्यते। स्वर्गकामो यजेत, नान्यत्कुर्यादिति। तथा, समुदायो न कर्मार्थः। फलार्थोऽसौ, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति। एवमेतेषां कर्मणोऽनुपकारकत्वात् प्रवृत्तिरनर्थिका स्यात्। तस्मान्न प्रवर्तेरन् ॥२१॥

## अश्रुतित्वाच्च ॥२२॥

अत्राऽऽह। यदि दर्शपूर्णमाससंयोगात् फलादीनामप्रवृत्तिः, प्रयाजादीनामपि

---

विशेष—सूत्र पाठ में 'च' और 'अपि' दोनों का पाठ मिलता है। 'च' का पाठ चिन्त्य है। सुबोधिनी वृत्ति में प्रवृत्तावपि तादर्थ्यात् पाठ ही है।

व्याख्या—और भी, धर्मों की प्रवृत्ति कर्म के लिये है, कर्म को उपकृत करने के लिये। फलादि कर्म का उपकार नहीं करते। फल पुरुष का उपकारक है, कर्म का नहीं। कहा है—फलं च पुरुषार्थत्वात् (=फल भी पुरुषार्थ होने से कर्म का उपकारक नहीं है)। नियम भी कर्म का धर्म नहीं है, वह कर्त्ता का धर्म है ऐसा कह चुके—कर्तुर्वा श्रुतिसंयोगात् (=श्रुति के संयोग से यावज्जीवन अभ्यास कर्त्ता का धर्म है)। तथा कर्त्ता स्वर्ग की कामना वाला है कर्मार्थ नहीं है। कर्म स्वर्गकामनावाले के लिये है। स्वर्गकाम कर्म के प्रति उपदिष्ट नहीं है, स्वर्गकामो यजेत (=स्वर्ग की कामनावाला यजन करे)। तो क्या है? कर्म स्वर्ग की कामनावाले के लिये उपदिष्ट है—स्वर्ग की कामनावाला यजन करे अन्य कुछ नहीं करे। तथा [आग्नेयादि याग का] समुदाय कर्म के लिये नहीं है। वह फल के लिये है—दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत। इस प्रकार इन [फलादि] के कर्म के अनुपकारक होने से प्रवृत्ति अनर्थक होवे। इससे ये प्रवृत्त न होवें ॥२१॥

अश्रुतित्वाच्च ॥२२॥

सूत्रार्थः—(अश्रुतित्वात्) फलादि की प्रवृत्ति में श्रुति न होने से (च) भी फलादि की सौर्यादि में प्रवृत्ति नहीं होती है।

व्याख्या—(आक्षेप) यदि फलादि की दर्शपूर्णमास के साथ संयोग होने से प्रवृत्ति नहीं होती है तो प्रयाजादि की भी दर्शपूर्णमास के साथ सम्बन्ध होने से अप्रवृत्ति प्राप्त होती

---

१. मी० ३।१।५। २. मी० २।४।२।

तत्सम्बन्धादप्रवृत्तिः प्राप्ता। तान्यपि हि तत्संयुक्तानीति। उच्यते। यद्यपि तानि दर्शपूर्णमासयोः श्रुतानि। विध्यन्तेन तु सौर्यादिष्वप्यतिदिष्टानि। फलादीनि तु न विध्यन्तेनातिदिश्यन्ते। तेषां यदि प्रत्यक्षा प्रवर्तिका श्रुतिः स्यात्, ततः प्रवर्तेरन्। न चासावस्ति। तस्मादश्रुतित्वान्न प्रवर्तन्ते ॥२२॥

———

## [काम्यगुणानां विकृतावनतिदेशाधिकरणम् ॥१४॥]

इह गुणकामा उदाहरणम्—**गोदोहनेन प्रणयेत् पशुकामस्य**[1], **उपास्मै गायता नर इति ग्रामकामाय प्रतिपदं कुर्याद्**[2] इत्येवमादयः। तत्र विचार्यते किं गुणकामानां वैकृतेषु प्रवृत्तिः, उत नेति। ततः सूत्रेणैवोपक्रमः—

**गुणकामेष्वाश्रितत्वात् प्रवृत्तिः स्यात् ॥२३॥ (पू०)**

---

है। वे भी उससे संयुक्त हैं। (समाधान) यद्यपि वे (=प्रयाजादि) दर्शपूर्णमास के श्रुत हैं, परन्तु विध्यन्त भाव से सौर्यादि में अतिदिष्ट होते हैं। फलादि तो विध्यन्त से अतिदिष्ट नहीं होते। यदि उनकी प्रत्यक्षप्रवर्तिका श्रुति होवे तो प्रवृत्त होवें। और वह (=प्रत्यक्ष श्रुति) नहीं है। इससे श्रुति न होने से प्रवृत्त नहीं होते। [प्रयाजादि का तो विकृतियों में दर्शन होने से उनका अतिदेश सिद्ध है।] ॥२२॥

———

व्याख्या - यहां गुणकाम उदाहरण हैं—गोदोहनेन प्रणयेत् पशुकामस्य (=पशु की कामनावाले के जल का प्रणयन गोदोह—जिस बर्तन में गायें दुही जाती हैं उससे करे), उपास्मै गायता नर इति ग्रामकामाय प्रतिपदं कुर्यात् (=ग्राम की कामनावाले के लिये 'उपास्मै गायता नरः' ऋक् प्रतिपद् करे)। इस विषय में विचार करते हैं—क्या गुणकामनाओं की वैकृत कर्म में प्रवृत्ति होती है अथवा नहीं? इस [शङ्का के] पश्चात् सूत्र से ही आरम्भ करते हैं—

विवरण - प्रतिपदं कुर्यात् - सायणाचार्य ने ताण्डय ब्रा० ६।६।१ में लिखा है - प्रतिपदिति प्रथमतृचमेव, स एव स्तोत्रिय इति चोच्यते अर्थात् प्रतिपद् नाम प्रथम तृच का है, वही स्तोत्रिय भी कहाता है।

गुणकामेष्वा श्रितत्वात् प्रवृत्तिः स्यात् ॥२३॥

---

१. अनुपलब्धमूलम्। द्र०—आप० श्रौत १।१६।३॥ मीमांसा ३।६।१०; ४।३।४ सूत्रभाष्ययोः 'गोदोहनेन पशुकामस्य प्रणयेत्' इत्येवं पाठः। २. ताण्डय ब्रा० ६।६।१॥

गुणकामेष्वाश्रितत्वात् प्रवृत्तिः स्यात्। प्रवृत्तिर्गुणकामानाम्। कुतः? आश्रितत्वात्। गोदोहनं प्रणयनाश्रितं गोदोहनेन प्रणयेदिति। तत्र[1] प्रणयनं प्रवर्तते। आश्रये च प्रवर्तमाने तदाश्रितमपि प्रवर्तते। तथा पट आकृष्यमाणे तदाश्रितं चित्रमप्याकृष्यते। यथा च चमसः प्रवर्तते। यथा च, खादिरं वीर्यकामाय यूपं कुर्याद्[2] इति। एवं गोदोहनमपि प्रवर्तते। गोदोहने च प्रवर्तमाने तदाश्रितः कामोऽपि प्रवर्तितुमर्हति। तस्माद् गुणकामानां प्रवृत्तिः ॥२३॥

## निवृत्तिर्वा कर्मभेदात् ॥२४॥ (उ०)

निवृत्तिर्वा गुणकामानामप्रवृत्तिः। कुतः? कर्मभेदात्। कार्यभेदादित्यर्थः। अन्यत् कार्यं गोदोहनस्य, अन्यच्चममस्य। चमसः क्रत्वर्थो, गोदोहनं तु पुरुषार्थः।

---

सूत्रार्थः—(गुणकामेषु) गुण गोदोहनादि से काम पश्वादि की इच्छा होने पर विकृतियों गोदोहनादि की (प्रवृत्तिः) प्रवृत्ति (स्यात्) होवे (आश्रितत्वात्) प्रणयनाश्रित होने से।

व्याख्या—गुणकामनाओं में आश्रित होने से प्रवृत्ति होवे। प्रवृत्ति अर्थात् गुणकामों की प्रवृत्ति होवे। किस हेतु से? आश्रितत्व के कारण। गोदोहन प्रणयन के आश्रित अर्थात् प्रणयन होने पर गोदोहन से प्रणयन करे। यहां (=विकृतियों में) आपः का प्रणयन प्रवृत्त होता है। आश्रय के प्रवर्तमान होने पर आश्रित भी प्रवृत्त होता है। जैसे वस्त्र के खींचने पर वस्त्राश्रित चित्र भी खींचा जाता है। और जैसे [प्रणयन में] चमस प्रवृत्त होता है [विकृतियों में आपः के प्रणयन में]। और जैसे खादिरं वीर्यकामाय यूपं कुर्यात् (=वीर्य की कामना वाले के लिये खादिर यूप करे) [यह विकृति में भी प्रवृत्त होता है]। इस प्रकार गोदोहन भी प्रवृत्त होता है। और गोदोहन के प्रवृत्त होने पर तदाश्रित [सिद्ध होनेवाली] कामना भी प्रवर्तित होनी चाहिये। इसलिये गुणकामों की प्रवृत्ति होती है ॥२३॥

विवरण—चमसः प्रवर्तते—यज्ञ में आपः प्रणयन में चमस सामान्य रूप से निर्दिष्ट है। उसकी विकृति में प्रवृत्ति होती है ॥२३॥

### निवृत्तिर्वा कर्मभेदात् ॥२४॥

सूत्रार्थः—(वा) 'वा' शब्द पूर्व उक्त पक्ष का निवर्तक है। (कर्मभेदात्) कर्म=कार्य के भेद से (निवृत्तिः) गुणकामों की निवृत्ति होती है।

व्याख्या—निवृत्ति होवे गुणकामों की अर्थात् अप्रवृत्ति होवे। किस हेतु से? कर्मभेद से। कार्यभेद से यह अर्थ है। गोदोहन पात्र का अन्य कार्य है और अन्य चमस का। चमस क्रत्वर्थ है और गोदोहन पुरुषार्थ है। यह कहा है—यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्सा-

---

१. 'तच्च' पाठान्तरम्।

२. अनुपलब्धमूलम्। द्र०—खादिरं स्वर्गकामो वीर्यकामो वा। आप० श्रौत ७।१।१६॥

तदुक्तम्—यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्साऽर्थलक्षणाऽविभक्तत्वाद्[1] इत्यत्र। क्रत्वर्थः किमर्थं प्रवर्तेत्। क्रतूपकाराय हि तस्य प्रवृत्तिः। एवं प्रतिपदः। तस्मान्न प्रवर्तेरन् गुणकामाः ॥२४॥

यत्तूपन्यस्तं, यथा खादिरं वीर्यकामाय यूपं कुर्याद् इत्यत्र प्रवृत्तिरेवमत्रापीति। तत्र ब्रूमः—

अपि वाऽतद्विकारत्वात् क्रत्वर्थत्वात् प्रवृत्तिः स्यात् ॥२५॥

अपि वा, एवंविधेषु प्रवृत्तिः स्यात्। कुतः? अतद्विकारत्वात्। न खादिरः क्रत्वर्थविकारः। अयमपि क्रत्वर्थ एव। तदुक्तम्—एकस्य तूभयत्वे संयोगपृथक्त्वम्[2] इति। क्रत्वर्थश्चेत् पलाशवत् प्रवर्तेत। तस्मिंश्च प्रवर्तमाने तदाश्रितः कामोऽपि प्रवर्तते। खादिरेण हि स सिध्यति। स च खादिरोऽस्ति। तस्मात् कामं साधयिष्यति ॥२५॥

---

र्थलक्षणाऽविभक्तत्वात् (=जिसमें पुरुष की प्रीति होती है उसको प्राप्त करने की इच्छा पुरुषार्थरूप है, पुरुषार्थ की प्रीति से अविभक्त अर्थात् संयुक्त होने से) इसमें (मी० ४।१।२)। जो क्रतु के लिये नहीं है वह [विकृतियों में] किस लिये प्रवृत्त होवे। क्रतु के उपकार के लिये उसकी प्रवृत्ति होती है। इसी प्रकार [प्रतिपद्] जो ग्राम की इच्छा की पूर्ति के लिये है वह भी प्रवृत्त नहीं होती है। इसलिये गुण काम प्रवृत्त न होवें ॥२४॥

व्याख्या—और जो कहा है जैसे खादिरं वीर्यकामाय यूपं कुर्याद् इसमें प्रवृत्ति होती है वैसे ही यहां [गोदोहनेन प्रणयेत् पशुकामः] में भी होवे। उस विषय में कहते हैं—

अपि वाऽतद्विकारत्वात् क्रत्वर्थत्वात् प्रवृत्तिः स्यात् ॥२५॥

सूत्रार्थः—(अपि वा) 'अपि वा' सम्भावना प्रकट करने के लिये है। (अतद्विकारत्वात्) खादिर यूप के क्रत्वर्थविकार न होने से तदाश्रित वीर्यरूप फल के क्रत्वर्थ होने से (प्रवृत्तिः) विकृति यागों में प्रवृत्ति (स्यात्) होवे।

व्याख्या—अपि वा एवंविध (=इस प्रकार के) अर्थात् खादिरं वीर्यकामाय यूपं कुर्यात् वचनों में प्रवृत्ति होवे। किस हेतु से? उसका विकार न होने से। खादिर क्रत्वर्थ का विकार नहीं है। यह (=वीर्य फल) भी क्रत्वर्थ ही है। इस विषय में कहा है—एकस्य तूभयत्वे संयोगपृथक्त्वम् (=एक खादिर यूप के तो नित्यत्व और नैमित्तिकत्व दोनों में सम्बन्ध का पृथक् पृथक् होना कारण है)। [खादिर] क्रत्वर्थ होवे तो पलाशवत् प्रवर्तित होता है। उसके प्रवृत्तमान होने पर तदाश्रित काम भी प्रवृत्त होता है। वह काम खादिर यूप से ही सिद्ध होता है। और वह खादिर यूप है। इससे वह कामना को सिद्ध करेगा ॥२५॥

---

१. मी० ४।१।२॥ २. मी० ४।३।५॥

## [सौर्ययागे विकल्पेनाऽऽग्नेयद्वयधर्मातिदेशाधिकरणम् ॥१५॥]

**सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः**[1] इति श्रूयते। अस्ति तु प्रकृतावभिमर्शन-द्वयं, **चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्राऽमावास्याम्**[2] इति। तदिह चोदकेन प्राप्यते। तत्र संशयः। किं सौर्यो यदा पौर्णमास्यां प्रयुज्यते तदा चतुर्होत्राभि-अष्टव्यः, यदाऽमावास्यायां तदा पञ्चहोत्रा, उतोभयत्र विकल्पः चतुर्होत्रा वा पञ्च-

---

विवरण—अतद्विकारत्वात्—'तस्य विकारः=तद्विकारः, न तद्विकारः=अतद्विकारः' यहां 'तत्' से 'क्रत्वर्थ' का ग्रहण है। अर्थ होगा—क्रत्वर्थ का विकार न होने से। खादिरे बध्नाति में खादिर यूप किसी अन्य क्रत्वर्थ यूप के स्थान में प्रयुक्त नहीं है जैसे प्रणयन में गोदोहन क्रत्वर्थ चमस के स्थान में कामना विशेष से प्रयुक्त है। अतः जैसे पालाशे बध्नाति की विकृति में प्रवृत्ति होती है तद्वत् खादिर की भी होती है। उसके होने पर तदाश्रित काम भी विकृति में प्रवृत्त होगा। इसके लिये भाष्यकार ने मीमांसा ४।३।५ सूत्र उद्धृत किया है। पयसा जुहोति दध्ना जुहोति में दधि अग्निहोत्र में नित्यवत् श्रुत है। उसका ही दध्नेन्द्रियकामस्य में श्रवण होने पर वह इन्द्रियरूप फल का भी साधक होता है—एकस्य तूभयत्वे संयोगपृथक्त्वात् का तात्पर्य है जुहोति क्रिया के साथ दधि और इन्द्रियकामस्य का पृथक् पृथक् सम्बन्ध होने से—दध्ना जुहोति, वीर्यकामस्य जुहोति। इसी प्रकार यहां खादिरे बध्नाति तथा खादिरं वीर्यकामस्य कुर्यात्। विशेष मी० ४।३।५ के भाष्य में देखें।

भट्टकुमारिल ने टुप्टीका में भाष्याशय का खण्डन किया है। उसे टुप्टीका में तथा कुतूहलवृत्ति में देखना चाहिये ॥२५॥

———

व्याख्या—सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः (=ब्रह्मवर्चस की कामनावाला सूर्यदेवताक चरु का निर्वाप करे) यह सुना जाता है। प्रकृति (=दर्शपौर्णमास) में दो अभि-मर्शन हैं—चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्राऽमावास्याम् (=चतुर्होता मन्त्र से पौर्णमासी की हवियों का अभिमर्शन=स्पर्श करता है, पञ्चहोता मन्त्र से अमावास्या के हवियों का अभिमर्शन करता है)। इसमें संशय होता है कि सौर्ययाग जब पौर्णमासी में होवे तब चतुर्होता मन्त्र से स्पर्श करना चाहिये और जब अमावास्या में होवे तब पञ्चहोता मन्त्र से, अथवा उभयत्र विकल्प है चतुर्होता वा पञ्चहोता से। क्या प्राप्त होता है? व्यवस्था प्राप्त

---

१. अनुपलब्धमूलम्। द्र०—सौर्यं चरुं निरवपत्·····ब्रह्मवर्चसकामः॥ तै० सं० २।३।२।२-३॥

२ द्र०—चतुर्होत्रा पूर्णमासे हवींष्यासन्नान्यभिमृशेद्·····पञ्चहोत्रामावास्यायां हवींष्यासन्नान्यभिमृशेत्। काठक सं० ९।१४। तथा द्र०—आप० श्रौत ४।८।७॥

होत्रा वेति । किं प्राप्तम् ? व्यवस्थेति । कुतः ? चोदकानुग्रहात् । प्रकृतौ व्यवस्था कृता । चोदको व्यवस्थां प्रापयति । एवं प्राप्त उच्यते—

## एककर्मणि विकल्पोऽविभागो हि चोदनैकत्वात् ॥२६॥ (उ०)

एकस्मिन् कर्मण्यत्र सौर्ये विकल्पः । कुतः ? अविभागो हि चोदनैकत्वात् । एकैषा चोदना सौर्ये चरुं निर्वपेद् ब्रह्मवर्चसकाम इति । तत्राविभागो भवति । उभावप्यभिमर्शने प्राप्येते । तयोरेकार्थत्वात् समुच्चयो न सम्भवति । तस्माद्

---

होती है । किस हेतु से ? चोदक (=प्रकृतिवद् विकृतिः कर्तव्या) वचन के अनुग्रह से । प्रकृति में व्यवस्था की है, चोदक वचन व्यवस्था प्राप्त कराता है । ऐसा प्राप्त होने पर कहते हैं—

विशेष—चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्राऽमावास्यायाम् – द्र०—चतुर्होत्रा पौर्णमास्यां हवींष्यासन्नान्यभिमृशेत् प्रजाकामः, पञ्चहोत्रा अमावास्यायां स्वर्गकामः । आप० श्रौत. ४।८।७॥ चतुर्होता मन्त्र—पृथिवी होता । द्यौरध्वर्युः । रुद्रोऽग्नीत् । बृहस्पतिरुपवक्ता । तै० आर० ३।२।१॥ उपवक्ता=ब्रह्मा । पञ्चहोता मन्त्र—अग्निर्होता । अश्विनावध्वर्यू (=अध्वर्युः प्रतिप्रस्थाता च) त्वष्टाग्नीत् । मित्र उपवक्ता । तै० आर० ३।३।१॥ मी० ३।७।८-१० । अधि० ४ में इस विषय में निर्णय किया है कि प्रधान और अङ्ग सभी हवियों का स्पर्शन करना चाहिये । आप० श्रौत का जो वचन उद्धृत किया है उसमें हवींष्यासन्नानि अभिमृशेत् सामान्य निर्देश किया है । सौर्यो यदा·····यदाऽमावास्यायां – इष्टियों का काल कहा है–पौर्णमास्याममावास्यायां वा जुहुयात् । इससे पौर्णमासी और अमावास्या में इष्टियों का विधान है ।

मी० ३।७।१० के भाष्य के अनुवाद में पृष्ठ १०५५ (प्रथम संस्करण) के प्रथम सन्दर्भ के अन्त में 'इस कारण प्रधान हवियों का अभिमर्शन करना चाहिये' पाठ छपा है, वहां 'प्रधान हवियों तथा अङ्ग हवियों दोनों का अभिमर्शन करना चाहिये' पाठ शुद्ध करें । द्वि० संस्करण में यथास्थान संशोधन कर दिया है ।

### एककर्मणि विकल्पोऽविभागो हि चोदनैकत्वात् ॥२६॥

सूत्रार्थः – (एककर्मणि) एक कर्म में (विकल्पः) अभिमर्शन मन्त्रों [चतुर्होता, पञ्चहोता] का विकल्प होता है । (चोदनैकत्वात्) प्रकृतिवद् विकृतिः कर्तव्या इस चोदना के एक होने से अतिदिष्ट सौर्यादि में (अविभागो हि) विभाग ही नहीं होता । [विशेष भाष्य में देखें ।]

व्याख्या यहां सौर्य एक कर्म में विकल्प होवे । किस हेतु से ? विभाग ही नहीं है चोदना के एक होने से । यह एक चोदना है—सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः । वहां अविभाग होता है । दोनों ही अभिमर्शन [अतिदेश से] प्राप्त होते हैं । उन [दोनों मन्त्रों] के एक अभिमर्शन रूप अर्थ के लिये होने से समुच्चय संभव नहीं होता । इससे विकल्प होता है । जो

विकल्पः। यत् तु, प्रकृतौ व्यवस्थेति। नासौ कालकृता। किं तर्हि? समुदायकृता। न च सौर्ये तौ समुदायौ स्तः। यद्येवमभिमर्शनमेव तर्हि न प्राप्नोति, तयोः समुदाययोरभावादिति। अत्रोच्यते—न प्राप्नोति, यदि समुदाययोरभिमर्शनमुच्येत। तयोस्त्वनभिभ्रष्टव्यत्वात् समुदायिनां तदुच्यते लक्षणया। समुदायिविकारश्च सौर्यः। तस्मात् तत्रापि चोदकः प्रापयति तत् ॥२६॥

———

[सौर्ये चरावाग्नेयधर्मातिदेशाधिकरणम् ॥१६॥]

सौर्ये कर्मणि दार्शपौर्णमासिको विध्यन्त इत्युक्तम्—इष्टिषु दर्शपूर्णमासयोः

---

प्रकृति में व्यवस्था है वह कालकृत(=पूर्णिमा वा अमावास्याकृत) नहीं है। तो कैसी है? समुदायकृत अर्थात् पौर्णमासी में होने वाला जो याग समुदाय और अमावास्या में होने वाला जो याग समुदाय उन के भेद से व्यवस्था है। सौर्य में वे दोनों (=पौर्णमासी और आमावास्या के) समुदाय नहीं हैं।(आक्षेप)यदि ऐसा है तो अभिमर्शन ही नहीं प्राप्त होता है, उन दोनों[याग] समुदायों के अभाव होने से। (समाधान)) इस विषय में कहते हैं—यदि [याग] समुदाय का अभिमर्शन कहें तो प्राप्त नहीं होता। उन [यागसमुदायों]का स्वस्थान से भ्रंशत्व के अभाव से [अर्थात् पौर्णमासी और अमावास्या में जो तीन-तीन यागों का समुदाय है उसे उस उस काल से हटाये न जा सकने के कारण] समुदायियों (=जो यागसमुदायी पौर्णमासी और अमावास्या कर्म है) का वह लक्षणा से अभिमर्शन कहा जाता है। सौर्य समुदायियों का विकार है अर्थात् पौर्णमास और दर्शयाग का विकार है। इससे वहां(=सौर्यरूप समुदाय में)भी चोदक अभिमर्शन प्राप्त कराता है ॥२६॥

विवरण—सूत्र और भाष्य का यह तात्पर्य है कि चोदक (अतिदेश) वचन पूर्णमासी और अमावास्या में जो तीन तीन यागों का समुदाय है उन्हें तो स्व स्व काल से हटाया नहीं जा सकता। इसलिये अभिमर्शन उन समुदायों से सम्बद्ध नहीं है। अपितु तीन तीन समुदायों के जो दो समुदायी पौर्णमास कर्म और अमावास्या कर्म है उनको लक्षणा से लक्षित करके अभिमर्शन कहा जाता है। उन समुदायियों का विकार सौर्य है अतः अतिदेश से दोनों समुदायियों से सम्बद्ध अभिमर्शनद्वय प्राप्त होता है। अभिमर्शनद्वय का समुच्चय हो नहीं सकता। एक अभिमर्शन से ही कृतार्थ अर्थात् अपूर्व के होने से, अतः समान प्रयोजन के लिये दो कार्य प्राप्त होने पर विकल्प ही होगा ॥२६॥

———

व्याख्या—सौर्य कर्म में दर्शपूर्णमाससम्बन्धी विध्यन्त होवे, यह कह चुके—इष्टिषु

**प्रवृत्तिः**[1] इति । सन्ति तु तत्र कर्माण्याग्नेयादीनि । तत्र विचारः—किं यस्य कस्यचिद् दार्शपौर्णमासिकस्य कर्मणः सौर्ये विध्यन्त उताऽऽग्नेयस्येति ? किं प्राप्तम् ?

**लिङ्गसाधारण्याद् विकल्पः स्यात् ॥२७॥ (पू०)**

विकल्पः । कुतः ? लिङ्गसाधारण्यात् । सौर्ये दार्शपौर्णमासिकविध्यन्तप्राप्तौ यल्लिङ्गमुपदिष्टम्[2]—**प्रयाजे प्रयाजे कृष्णलं जुहोति**[3] इति, तत् साधारणं सर्वेषां विध्यन्ते सम्भवति । न च समुच्चयः । तस्माद् विकल्पः ॥२७॥

**ऐकार्थ्याद् वा नियम्येत पूर्ववत्त्वाद् विकारो हि ॥२८॥ (उ०)**

आग्नेयस्य विध्यन्तो नियम्येत । कुतः ? ऐकार्थ्यात् । एकदेवतत्वादित्यर्थः । आग्नेय एकदेवत्यः । सौर्योऽपि । तेनैकदेवतत्वेन लिङ्गेनाऽऽग्नेयविध्यन्तो नियम्येत।

---

दर्शपूर्णमासयोः प्रवृत्तिः(मी० ८।१।११) सूत्र से । वहां आग्नेयादि कर्म हैं । उन में विचार है—क्या जिस किसी दर्शपूर्णमाससम्बन्धी कर्म का विध्यन्त सौर्य में होवे अथवा आग्नेय का ? क्या प्राप्त होता है ?

**लिङ्गसाधारण्याद् विकल्पः स्यात् ॥२७॥**

**सूत्रार्थः**—दर्श और पौर्णमास के (लिङ्गसाधारण्याद्) लिङ्ग के साधारण होने से (विकल्पः) विकल्प (स्यात्) होवे । [लिङ्गभाष्य व्याख्या में देखें ।]

व्याख्या—विकल्प होवे । किस हेतु से ? लिङ्ग के साधारण(=दोनों में समान)होने से । सौर्य में दर्शपूर्णमाससम्बन्धी विध्यन्त की प्राप्ति में जो लिङ्ग उपदिष्ट है—प्रयाजे-प्रयाजे कृष्णलं जुहोति (=प्रति प्रयाज कृष्णल का होम करता है) वह सब की विध्यन्तों में सम्भव होता है । [सब की विध्यन्तों का] समुच्चय नहीं हो सकता इस कारण विकल्प होवे ॥२७॥

**ऐकार्थ्याद् वा नियम्येत पूर्ववत्त्वाद् विकारो हि ॥२८॥**

**सूत्रार्थः**—(वा) 'वा' पूर्व पक्ष की निवृत्ति के लिये है । (ऐकार्थ्याद्) एक देवता प्रयोजन होने से विध्यन्त (नियम्येत) नियमित होवे । सौर्य के (पूर्ववत्त्वात्) पूर्ववान् होने से, वह (विकारः) विकार (हि) ही है ।

व्याख्या—आग्नेय का विध्यन्त नियमित होवे । किस हेतु से ? एकार्थ होने से । एक देवतावाला होने से । आग्नेय याग एक देवतावाला है, सौर्य भी एक देवतावाला है । इस कारण एकदेवतात्व हेतु से लिङ्ग के द्वारा आग्नेय विध्यन्त नियमित होवे । पूर्ववत्त्व होने से ।

---

१. मी० ८।१।११॥ २. 'अपदिष्टम्' पाठान्तरम् । ३. तै० सं० २।३।२।३॥

पूर्ववत्त्वात्। पूर्ववानयं सौर्यः। पूर्वत्राभिहितं विध्यन्तमपेक्षते। विकारो हि। विकृतिरेषा। सर्वाश्च विकृतयः पूर्ववत्यः। चोदनावाक्यानामसमाप्तत्वात्। तत्र लिङ्गेन विध्यन्तनियमो भवतीत्युक्तम्। अस्ति चैकदेवतत्वं लिङ्गम्। तेनाऽऽग्नेय-विध्यन्तः ॥२८॥

अत्राह—

## अश्रुतत्वान्नेति[4] चेत् ॥२९॥

स्यादेतदेवं, यद्यत्रैकत्वं श्रूयेत। न तु श्रूयते। कथम्? तद्धितेनायं निर्देशः—सौर्यमिति, तथा आग्नेयमिति। तत्र वचनव्यक्तिर्न ज्ञायते, किं सूर्यो देवताऽस्य, उत सूर्यौ च सूर्याश्चेति। तथा, आग्नेयेऽपि ॥२९॥

---

यह सौर्य पूर्ववान् है। अर्थात् पूर्वविहित विधि की अपेक्षा रखता है। [इस कारण] विकार ही है। यह [सौर्य] विकृतिरूप है। सभी विकृतियां पूर्ववती होती हैं, चोदना वाक्यों (=सौर्यादि याग-विधायक वाक्यों) के असमाप्त होने से [अर्थात् 'सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः' इस विधायक वाक्य से यह नहीं जाना जाता है कि सौर्ययाग कैसे करें?] ऐसी अवस्था में लिङ्ग से विध्यन्त का नियम होता है, यह कहा है। एकदेवतात्व लिङ्ग है। इससे [सौर्य में] आग्नेय विध्यन्त होता है ॥२८॥

व्याख्या—इस विषय में कहते हैं—

## अश्रुतत्वान्नेति चेत् ॥२९॥

सूत्रार्थः—(अश्रुतत्वात्) सौर्ययाग में और आग्नेययाग में स्पष्ट रूप से सूर्य और अग्नि के देवतात्व के श्रवण न होने से आग्नेय विध्यन्त की प्राप्ति नहीं है ऐसा कहें तो।

विवरण—सौर्य और आग्नेय ये पद तद्धितप्रत्ययान्त है अतः जैसे इनका अर्थ 'सूर्य देवता है जिसका', 'अग्नि देवता है जिसका' जाना जाता है उसी प्रकार सूर्यौ देवते, सूर्या देवता अस्य तथा अग्नी देवते, अग्नयो देवता अस्य यह अर्थ भी जाना जाता है। अतः प्रत्यक्षरूप से उभयत्र एक ही देवतारूप अर्थ नहीं जाना जाता है अतः आग्नेय विध्यन्त होवे कथन युक्त नहीं है।

व्याख्या—यह ऐसा होवे, यदि यहां एकत्व सुना जाये [वह] नहीं सुना जाता है। कैसे? तद्धित से यह निर्देश है—'सौर्यः', तथा 'आग्नेयम्'। वहां वचन व्यक्ति नहीं जानी जाती है—क्या सूर्य इसका देवता है अथवा 'सूर्यौ' 'सूर्याः' [देवता हैं वा बहुत देवता, तद्धित रूप सबका समान होगा।] इसी प्रकार आग्नेय में भी [सन्देह रहता है—'अग्नी देवते' अथवा 'अग्नयो देवताः'। [इस से आग्नेय धर्म ही प्रवृत्त होवें, यह नियम उपपन्न न होने से विकल्प होवे।]।२९।

---

४. 'अश्रुतित्वात्' पाठान्तरम्।

## स्याल्लिङ्गभावात् ॥३०॥

स्याद् व्यवस्थितिरेकत्वस्य। कुतः ? लिङ्गभावात्। लिङ्गमत्रास्ति। किम्? वाक्यशेष एकत्वं श्रूयते, सौर्ये तावत्—अमुमेवाऽऽदित्यं स्वेन भागधेयेनोपधावति, स एवैनं ब्रह्मवर्चसं गमयति[1] इति। आग्नेयेऽपि—अङ्गिरसो वा इत उत्तमाः स्वर्गं लोकमायंस्ते यज्ञवास्त्वभ्यायंस्ते पुरोडाशं कूर्मं भूत्वा प्रसर्पन्तमपश्यंस्तमब्रुवन्, इन्द्राय ध्रियस्व बृहस्पतये ध्रियस्व विश्वेभ्यो देवेभ्यो ध्रियस्वेति। स तानाह न ध्रिये। तमब्रुवन्, अग्नये ध्रियस्वेति। सोऽब्रवीत्, ध्रियेऽहम्। यदाग्नेयोऽष्टाकपालोऽमावास्यायां पूर्णमास्यां चाच्युतो भवति। अग्निमेव स्वेन भागधेयेन समर्धयति[2] इति ॥३०॥

## तथा चान्यार्थदर्शनम् ॥३१॥

---

विवरण—भाष्यकार ने एकवचन द्विवचन बहुवचन की अव्यक्तता के उदाहरण दिये हैं। हमारे विचार में लिङ्गभेद के उदाहरण भी दिये जा सकते हैं। यथा सूर्यो देवता अस्य के समान सूर्या देवता अस्य का रूप भी सौर्य ही होगा। इसी प्रकार अग्नायी देवता अस्य का रूप भी आग्नेय ही होगा ॥२९॥

## स्याल्लिङ्गभावात् ॥३०॥

सूत्रार्थः—एकत्व की व्यवस्थिति (स्यात्) होवे, (लिङ्गभावात्) लिङ्ग के होने से [लिङ्ग भाष्य में देखें।]

व्याख्या—एकत्व की व्यवस्थिति होवे। किस हेतु से? लिङ्ग होने से। यहां (=एकत्व की व्यवस्थिति में) लिङ्ग है। क्या लिङ्ग है ? वाक्यशेष में एकत्व सुना जाता है। सौर्य में—अमुमेवाऽऽदित्यं स्वेन भागधेयेनोपधावति, स एवैनं ब्रह्मवर्चसं गमयति (=उस आदित्य को ही स्व भाग से प्राप्त होता है। वह ही इसे ब्रह्मवर्चस को प्राप्त कराता है)। [यहां विधिवाक्य में सूर्य का निर्देश करके अर्थवाद में आदित्य का उल्लेख दोनों के एकत्व का भी बोधक है।] आग्नेय में भी—अङ्गिरसो वा इत ..... ...समर्धयति (=अङ्गिरस नाम के ऋषि इस पृथिवी लोक से ऊर्ध्वतम स्वर्ग लोक को प्राप्त हुए। वे यज्ञशाला में आये [वहां] उन्होंने पुरोडाश को कूर्मरूप धारण किये हुए चलते हुए देखा, उससे कहा—इन्द्र के लिये रुक जा, बृहस्पति के लिये रुक जा, विश्वे देवों के लिये रुक जा। वह उनसे बोला—नहीं रुकता। उस को [ऋषियों ने] कहा—अग्नि के लिये रुक जा। वह बोला—मैं रुकता हूं। जो आग्नेय अष्टाकपाल [पुरोडाश] अमावास्या और पौर्णमासी में अच्युत होता है। अग्नि को ही स्व भाग से समृद्ध करता है) ॥३०॥

## तथा चान्यार्थदर्शनम् ॥३१॥

---

१. तै० सं० २।३।२।३॥ २. स्वल्पभेदन तै० सं० २।६।३।२-३॥

अनुवाक्यायामेकत्वश्रवणम्—अग्निर्मूर्धा दिवः[1] इत्याग्नेये, उदुत्यं जातवेदसम्[2] इति सौर्ये। ननु पुनरुक्तमेतल्लिङ्गद्वयोपदर्शनमिति। तदुच्यते। नैतत् पुनरुक्तम्। एकमत्र चोदनागतम्, एकं मन्त्रगतम्। चोदनागतं प्रापकं, मन्त्रगतं प्राप्तस्य द्योतकमिति ॥३१॥

---

[देवताघटितसादृश्यापेक्षया द्रव्यघटितसादृश्यस्य बलीयस्त्वाधिकरणम् ॥१७॥]

इदं श्रूयते—ऐन्द्रमेकादशकपालं निर्वपेद्[3] इति। तथा—आग्नेयं पयः[4] इति। तत्र सन्देहः—किं देवतासामान्यादैन्द्रपुरोडाशे सान्नाय्यस्य विध्यन्तः, आग्नेये च पयस्यौषधस्य, देवतासामान्यं बलवत्तरम्। अथ हविःसामान्यादुत्तरत्र सान्नाय्यस्य विध्यन्तः, पूर्वत्रौषधस्य, हविःसामान्यं बलीय इति। किं प्राप्तम्? उच्यते—देवतासामान्यं बलीय इति। कुतः? मुख्यत्वात्। मुख्यनियन्त्रिता देवता। ऐन्द्रमाग्नेय-

---

सूत्रार्थः—(तथा च) और भी (अन्यार्थदर्शनम्) अन्य प्रयोजन के लिये उक्त दर्शन = लिङ्ग होता है।

व्याख्या—अनुवाक्या में एकत्व का श्रवण होता है—अग्निर्मूर्धा दिवः यह आग्नेययाग में, उदुत्यं जातवेदसम् यह सौर्ययाग में। (आक्षेप) यह दो लिङ्ग दर्शन पुनरुक्त है। (समाधान) इस विषय में कहते हैं—यह पुनरुक्त नहीं है। एकत्र (पूर्व में) चोदना = विधिगत है और एक (दूसरा) मन्त्रगत। चोदनागत प्रापक है और मन्त्रगत प्राप्त अर्थ का द्योतक है ॥३१॥

---

व्याख्या—यह सुना जाता है—ऐन्द्रमेकादशकपालं निर्वपेत् (= इन्द्रदेवताक एकादश कपाल का निर्वाप करे)। तथा—आग्नेयं पयः (= अग्निदेवताक दूध)। इनमें सन्देह है—क्या देवता सामान्य से ऐन्द्र पुरोडाश में सान्नाय्य विध्यन्त होवे और आग्नेय पयः में औषध का विध्यन्त। देवता की समानता बलवत्तर है। और यदि हविसामान्य से तो उत्तरत्र (= आग्नेयपयः में) सान्नाय्य का विध्यन्त होवे तथा पूर्वत्र (= ऐन्द्र पुरोडाश में) औषधका, हविसामान्य बलवान् है मानकर। क्या प्राप्त होता है? कहते हैं—देवता सामान्य बलवान् है। किस हेतु से? मुख्यत्व होने से [देवता के लिये हवि दी जाती है अतः देवता की मुख्यता है]। मुख्य-

---

१. मै० सं० ४।१०।१ याज्यानुवाक्या काण्डे। २. ऋ० १।५०।१॥
३. द्र०—तै० सं० २।२।१॥
४. अनुपलब्धमूलम्। द्र०—आग्नेयं वा एतत् पयो यदजक्षीरम्। मै० सं० ३।१।८॥

मिति । जघन्यनियन्त्रितं हविः । तयोर्विरोधे मुख्यानुग्रहो न्याय्यः । मुख्यस्याविरुद्ध-प्रवृत्तित्वात् । जघन्यस्य तु मुख्येन विरुद्धा प्रवृत्तिः । तस्माद् देवतासामान्यं बलीय इति प्राप्ते ब्रूमः—

**विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात् ॥३२॥ (उ०)**

विप्रतिपत्तौ हविषा नियम्येत । विप्रतिपत्तावेतस्यां हविर्देवतयोः हविषा विध्यन्तो नियम्येत । कुतः ? कर्मणस्तदुपाख्यत्वात् । कर्म देवतां प्रति द्रव्यस्योत्सर्गः । स च हविःषूपाख्यायते, उपलभ्यत इत्यर्थः । हविस्त्यज्यमानं दृश्यते । किमतः ? अतो हविः कर्मणः प्रत्यासन्नम् । प्रत्यासत्तिश्च लिङ्गम् । ननु देवताऽपि यागेन सम्बद्धा । न तया विना यागो भवति ? उच्यते । सत्यं सम्बद्धा । आरादुपकारिणी तु सा । नासौ त्यज्यते । तस्माद् बहिरङ्गम् । अतो हविःसामान्यं बलीयः ॥३२॥

**तेन च कर्मसंयोगात् ॥३३॥**

---

नियन्त्रित देवता है—ऐन्द्रम्, आग्नेयम् । हवि जघन्य नियन्त्रित है । दोनों के विरोध होने पर मुख्य का अनुग्रह न्याय्य है । मुख्य के अविरुद्ध प्रवृत्तिवाला होने से । [अर्थात् मुख्य के विरुद्ध प्रवृत्ति नहीं होती है] । जघन्य की मुख्य के विरुद्ध प्रवृत्ति देखी जाती है । इस कारण देवता सामान्य बलवान् है । ऐसा प्राप्त होने पर कहते हैं—

**विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात् ॥३२॥**

सूत्रार्थः (विप्रतिपत्तौ) हवि और देवता से विध्यन्त में विरोध होने पर (हविषा) हवि के सामान्य से (नियम्येत) विध्यन्त नियमित होवे । (कर्मणः) कर्म के (तदुपाख्यत्वात्) उस=हवि में उपलभ्यमान होने से । अर्थात् यागरूपी कर्म देवता के उद्देश्य से द्रव्यत्याग माना जाता है । अतः जुहोति यजेत आदि क्रियाओं का तात्पर्य हवि के त्याग में है अर्थात् कर्म के प्रति देवता की अपेक्षा हवि अन्तरङ्ग है ।

व्याख्या – विप्रतिपत्ति में हवि से नियम होवे । इस विप्रतिपत्ति में हवि और देवता में से हवि से विध्यन्त नियमित होवे । किस हेतु से ? कर्म के हवि [के त्याग] में उपलब्ध होने से । कर्म [का स्वरूप] देवता के प्रति द्रव्य का उत्सर्ग है । और वह उत्सर्ग हवि में उपाख्यात होता है अर्थात् उपलब्ध होता है । हवि त्याग की जाती हुई देखी जाती है । इस से क्या [सिद्ध होता है] ? इससे हवि कर्म के निकट है । प्रत्यासत्ति (=समीपता) लिङ्ग है । (आक्षेप) देवता भी याग से संबद्ध है, उस के विना भी याग नहीं होता ? (समाधान) सत्य है देवता भी संबद्ध है । वह तो दूर से उपकारिणी होती है वह छोड़ी नहीं जाती । इस लिये वह बहिरङ्ग है । इस से [देवता सामान्य की अपेक्षा] हविसामान्य बलवान् है ॥३२॥

**तेन च कर्मसंयोगात् ॥३३॥**

तेन च हविषा संयुज्य कर्म चोद्यते, ऐन्द्रम्, आग्नेयमिति। हविःप्रधानः शब्दः। किमतः? अतो हविरत्र बुद्धौ सन्निहितं, तल्लिङ्गं भवति। यथा धूमो बुद्धिविषयतामापन्नोऽग्नेर्लिङ्गं, न विद्यमानः[1] ॥३३॥

ननु देवताऽप्यत्र श्रूयते, ऐन्द्रमाग्नेयमिति। उच्यते—

## गुणत्वेन देवताश्रुतिः ॥३४॥

विशेषणत्वेन देवता श्रूयते, हविर्विशेष्यत्वेन। विशेष्यं च बुद्धौ सन्निहितं

---

सूत्रार्थः—(तेन) उस हवि से (कर्मसंयोगात्) कर्म का संयोग होने से (च) भी हविः सामान्य बलवान् है। अर्थात् हवि का त्यागरूप कर्म ऐन्द्र वा आग्नेय इन्द्र वा अग्नि देवतावाला कहा जाता है।

व्याख्या—उस हवि से संयुक्त होकर कर्म कहा जाता है—ऐन्द्र आग्नेय। हवि प्रधान शब्द है। इससे क्या [सिद्ध होता है] ? इससे यहां (=ऐन्द्र आग्नेय प्रयोगों में) हवि बुद्धि में सन्निहित होती है वह लिङ्ग होती है। जैसे बुद्धिविषयता को प्राप्त धूम अग्नि का लिङ्ग होता है, विद्यमान धूम लिङ्ग नहीं होता ॥३३॥

विवरण-ऐन्द्रम् आग्नेयम्—इन्द्र वा अग्नि देवता है जिस कर्म का, वह ऐन्द्र वा आग्नेय कहा जाता है। कर्म त्यागरूप है वह त्याग हवि से सम्बद्ध है। इस प्रकार ऐन्द्र और आग्नेय ये हविप्रधान शब्द हैं। सुबोधिनीवृत्तिकार ने इसका तात्पर्य इस प्रकार दर्शाया है—'उस हवि से संयुक्त कर्म कहा जाता है—सौर्यं चरुम्, ऐन्द्रमेकादशकपालं निर्वपेत्। हवि कर्म में साक्षात् सम्बद्ध है और देवता हवि के द्वारा। अतः हविसामान्य लिङ्ग प्रबल है।' न विद्यमानः—धूम से अग्नि के ज्ञान में पूर्वकाल में 'जहां जहां धूम है वहां वहां अग्नि है' यह असकृत् प्रत्यक्ष के आधार पर बुद्धिस्थ जो धूम है वह अग्नि का लिङ्ग है। जिसको यत्र यत्र धूमस्तत्र तत्र वह्नि व्याप्ति का परिज्ञान नहीं है वह विद्यमान धूम को देखकर भी वह्नि ज्ञान नहीं कर सकता। भाष्य में कहीं कहीं नाविद्यमानः पाठ है, वह अशुद्ध है ॥३३॥

व्याख्या—(आक्षेप) देवता भी तो यहां सुनी जाती है—ऐन्द्रम्, आग्नेयम्? (समाधान) इस विषय में कहते हैं—

### गुणत्वेन देवताश्रुतिः ॥३४॥

सूत्रार्थः—(देवताश्रुतिः) देवता का श्रवण (गुणत्वेन) गौणरूप से अर्थात् विशेषण रूप से होता है।

व्याख्या—विशेषण रूप से देवता सुना जाता है, हवि विशेष्य रूप से। और विशेष्य बुद्धि में सन्निहित होता है, विशेषण सन्निहित नहीं होता है। वह विशेषण विशेष्य को विशेषित

---

१. 'नाविद्यमानः' इति क्वाचित्कोऽपपाठः।

भवति, न विशेषणम् । तद् विशेष्यं विशेष्य निवर्तते । कथं ज्ञायते ? विशेष्यानुबन्धसंयोगात् । यथा राजपुरुषः पूज्य इत्युक्ते पुरुषः पूज्यो गम्यते, न राजा । एवमिहापि, ऐन्द्रं पय इत्युक्ते हविर्बुद्धौ सन्निधीयते, न देवता । यच्च बुद्धौ सन्निहितं, तल्लिङ्गमित्युक्तम् । तस्माद्धविःसामान्यं बलीयः । अत ऐन्द्रे पुरोडाश आग्नेयस्य विध्यन्तः । आग्नेये च पयसि सान्नाय्यस्येति ।

गुणत्वेन देवताश्रुतिः—इत्येतस्य सूत्रस्यापरा व्याख्या । इदं पदोत्तरं सूत्रम् । यदुक्तं हविःसामान्यं बलीय इति, नैतद्युक्तम् । देवतासामान्यं बलीय इति । कुतः ? सर्वोऽयं प्रयासो देवताराधनार्थ एव । साऽस्य प्रसन्ना फलं ददाति । एवं श्रूयते—**तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति**[1] इति । यश्चेन्द्रस्य प्रसादनोपाय इति ज्ञातः, पुनरपीन्द्रे प्रसादयितव्ये स एवाऽऽस्थेयो भवति । तस्माद् देवतासामान्यं बलीय इति । अत्र ब्रूमः—

---

करके निवृत्त हो जाता है । यह कैसे जाना जाता है ? विशेष्य के साथ अनुबन्ध का संयोग होने से । जैसे—राजपुरुषः पूज्यः ऐसा कहने पर [राजपुरुष में विशेष्य] पुरुष ही पूज्य जाना जाता है, राजा पूज्य नहीं जाना जाता है । जो बुद्धि में सन्निहित होता है वह लिङ्ग होता है यह कह चुके । इसलिये हविःसामान्य बलवान् है । अतः ऐन्द्र पुरोडाश में आग्नेय [पुरोडाश] का विध्यन्त होगा और आग्नेय पयः में सान्नाय्य का ।

विवरण- विशेषणत्वेन देवता श्रूयते, हविर्विशेष्यत्वेन —इन्द्रो देवताऽस्य पुरोडाशरूपस्य हविषः इस अर्थ में सास्य देवता (अष्टा० ४।२।२३) से अण् प्रत्यय होता है । इस विग्रह से स्पष्ट है कि इन्द्र पुरोडाशादि हवि का विशेषण है इसी प्रकार आग्नेयः पुरोडाशः में अग्नि शब्द से अग्नेर्ढक् (अ० ४।२।३२) से ढक् होता है । अग्नि पुरोडाशरूप हवि को विशेषित करता है । समान रूप जो पुरोडाश हवि है वह इन्द्र से विशेषित ऐन्द्र और अग्नि से विशेषित आग्नेय कहाता है ।

व्याख्या—गुणत्वेन देवताश्रुतिः इस सूत्र की दूसरी व्याख्या—यह सूत्र कुछ पदों के अनन्तर है ऐसा जानना चाहिये । जो यह कहा है कि 'हविःसामान्य बलवान् है', यह ठीक नहीं है, देवतासामान्य बलवान् है । किस हेतु से ? यह [यज्ञरूपी] सारा प्रयत्न देवता के आराधन (=संतुष्ट) करने के लिये ही है । वह प्रसन्न हुई देवता इस (=यज्ञरूपी प्रयास) का फल देती है । ऐसा सुना जाता है—तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति (=प्रसन्न हुआ इन्द्र इसे प्रजा और पशुओं से तृप्त करता है । जो इन्द्र के प्रसन्न करने का उपाय ज्ञात है, पुनः इन्द्र की प्रसन्नता के लिये वही स्वीकरणीय होता है । इससे देवता सामान्य बलवान् है । इस विषय में कहते हैं—

---

१. तै० सं० २।५।४।३॥

स्यादेतदेवं, यदि देवतातः फलं स्यात्। यागात् तु फलं—**स्वर्गकामो यजेत** इति श्रूयते। यत् तु **तृप्त एवैनमिन्द्र** इति। तत्रेदमुच्यते—

**गुणत्वेन देवताश्रुतिः।**

यागे गुणभूता देवता। तस्या दातृत्वं स्तुत्योच्यते। यथा—अमात्येन मे ग्रामो दत्तः, सेनापतिना मे ग्रामो दत्त इति। न चामात्यः सेनापतिर्वा ग्रामस्य प्रभवति, राजैव प्रभवति। इतरस्मिन् गुणभूते स्तुत्या दातृत्ववादः। तस्माद् यथोक्तेनैव न्यायेन हविःसामान्यमेव बलीय इति ॥३४॥

———

**[कृष्णलचरावाग्नेयधर्मातिदेशाधिकरणम् ॥१८॥]**

**हिरण्यमाज्यधर्मस्तेजस्त्वात्[1] ॥३५॥ (पू०)**

---

यह ऐसा होवे, यदि देवता से फल प्राप्त होवे। फल तो याग से होता है—स्वर्गकामो यजेत ऐसा सुना जाता है। और जो कहा—तृप्त एवैनमिन्द्रः आदि। वहां यह कहते हैं—

**गुणत्वेन देवताश्रुतिः।**

व्याख्या—याग में देवता गुणभूत है। उस का [फल का] दातृत्व स्तुति से कहा जाता है। जैसे—अमात्य (=मन्त्री) ने मुझे गांव दिया, सेनापति ने मुझे गांव दिया। अमात्य और सेनापति ग्राम का स्वामी नहीं है। राजा ही स्वामी है। इतर (=राजा से भिन्न) गुणभूत में स्तुति से दातृत्ववाद है। इससे यथोक्त न्याय से हविः सामान्य ही बलवान् है ॥३४॥

———

**हिरण्यमाज्यधर्मस्तेजस्त्वात् ॥३५॥**

**सूत्रार्थः**—(हिरण्यम्) सुवर्ण (आज्यधर्मः) आज्य के धर्मवाला होवे, (तेजस्त्वात्) तेजोयुक्त होने से। [वचन भाष्य में देखें।]

**विशेष**—कृतूहलवृत्ति में 'आज्यधर्म' पाठ है। वही व्याकरण की दृष्टि से शुद्ध है। आज्यस्य धर्मा यस्य इस बहुव्रीहि समास में धर्मादनिच् केवलात् (अष्टा० ५।४।१२४) से अनिच् समासान्त होता है। हिरण्य नपुंसकलिङ्ग है। अतः आज्यधर्म यही पाठ युक्त है। सूत्र पाठ में 'आज्यधर्मः' पाठ तथा भाष्य में आज्यधर्मा पाठान्तर युक्त प्रतीत नहीं होता।

---

१. 'आज्यधर्म तेजस्त्वात्' इति कृतूहलवृत्तौ पाठः। धर्मादनिच् केवलात् (अष्टा० ५।४।१२४) इत्यनेन 'अनिच्' समासान्तः। नपुंसकलिङ्गेन हिरण्येन सम्बद्धत्वादत्र 'आज्यधर्म' इति नपुंसकलिङ्गत्वमेव युक्तम्।

**प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः** इति श्रूयते। तद्धिरण्यमाज्यधर्मः[1] स्यात्। उपांशुयाजविध्यन्तस्तत्र भवेत्। कुतः? तेजस्त्वसामान्यात्। तेजस्त्वं सामान्यम्। हिरण्यमश्मनां तेजः। आज्यमपि गवां सार[2] इत्यर्थः। अथवा हिरण्यमपि तेजस्वित्वादुज्ज्वलम्। आज्यमपि स्निग्धत्वादुज्ज्वलमेव। तस्मात् सामान्यादुपांशुयाजधर्मा शतकृष्णलश्चरुः ॥३५॥

**धर्मानुग्रहाच्च ॥३६॥**

---

व्याख्या—प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः (=आयु की कामना वाला घृत में प्रजापतिदेवताक सौ कृष्णल चरु का निर्वाप करे) ऐसा सुना जाता है। वह सुवर्ण आज्य के धर्म वाला होवे। उपांशुयाज का विध्यन्त वहां होवे। किस हेतु से? तेजस्त्व सामान्य से। तेजस्त्व [दोनों में] सामान्य है। हिरण्य पाषाणों का तेज है और आज्य भी गायों का सार है अथवा हिरण्य भी तेजस्वी होने से उज्ज्वल है और आज्य भी स्निग्ध होने से उज्ज्वल ही है। इस सामान्य से उपांशुयाज का धर्मवाला शतकृष्णल चरु होवे ॥३५॥

विवरण—**उपांशुयाजविध्यन्तः**—पौर्णमासेष्टि में उपांशुयाज का विधायक वाक्य है—तावन्नूतामग्नीषोमावाज्यस्यैव नौ उपांशु पौर्णमास्यां यजन् (द्र०—मी० २।२।३ भाष्य में उद्धृत)। इसमें उपांशुयाज का घृत द्रव्य कहा है। इसलिये उपांशुयाज का विध्यन्त कहा है। **हिरण्यमश्मनां तेजः**—महाभारत उद्योग पर्व[3] में कहा है—अश्मनो लोहमुत्थितम् अर्थात् अश्मा से लोह उत्पन्न हुआ। पृथिवी गर्भ में पाषाणों की उत्पत्ति के पश्चात् क्रमशः लोह आदि धातुओं की उत्पत्ति हुई। उनमें हिरण्य की उत्पत्ति सबसे अन्त में हुई। वैदिक निघण्टु में लोह शब्द हिरण्यनामों में पढ़ा है (निघण्टु १।२)। इस कारण हिरण्य को अश्मों के तेज कहा है। **तेजस्वित्वादुज्ज्वलम्**—सुवर्ण को वैशेषिक दर्शन में संहत अग्नि माना है। उसमें पार्थिवादि का अंश नहीं होने से बार बार तपाने पर भी स्वर्ण की मात्रा न्यून नहीं होती। वह उज्ज्वल अर्थात् पृथिवी आदि से असंपृक्त है। **स्निग्धत्वादुज्ज्वलम्**—घृत स्निग्ध होने से उज्ज्वल है अतएव उसमें दर्पणवत् प्रतिबिम्ब गृहीत होता है ॥३५॥

**धर्मानुग्रहाच्च ॥३६॥**

**सूत्रार्थः**—हिरण्य में आज्य के (धर्मानुग्रहात्) अवेक्षणादि अनेक धर्मों के अनुग्रह से (च) भी आज्यधर्मता होवे।

**विशेष**—आज्य धर्म का अनुग्रह मानने पर केवल घृत का जो विलापन=पिघलाना धर्म

---

१. 'आज्यधर्मा' पाठान्तरम्।
२. 'सारमित्यर्थः' पाठान्तरम्।
३. द्र०—वेदविद्यानिदर्शन, पृष्ठ १०९।

हिरण्ये च बहव आज्यधर्मा अनुगृह्यन्ते, अवेक्षणादयः। तस्मादप्याज्यधर्माः ॥३६॥

## औषधं वा विशदत्वात् ॥३७॥ (उ०)

अथवा, औषधस्य हिरण्ये विध्यन्तः। कुतः? विशदत्वात्। हिरण्यमपि विशदम्, औषधमपि विशदम्।

कः पुनरनयोः सामान्ययोर्विशेषः? न खलु कश्चित्। किंतु विशदत्वस्य कारणद्वयमुपोद्बलकम्। तेजस्वितायास्तद्धर्मानुग्रह एकः ॥३७॥

## चरुशब्दाच्च ॥३८॥

चरुशब्दश्चात्र, भवति, प्राजापत्यं चरुमिति। चरुशब्दश्चौषधस्य वक्ता, तद् बलवदौषधस्य लिङ्गम् ॥३८॥

---

है उसी की बाधा होती है। अन्य अवेक्षण उत्पवनादि अनेक धर्म अनुगृहीत होते हैं।

व्याख्या—और हिरण्य में बहुत से आज्य धर्म अनुगृहीत होते हैं अवेक्षण (=दर्शन) आदि। इससे भी आज्य धर्म होवे ॥३६॥

### औषधं वा विशदत्वात् ॥३७॥

सूत्रार्थः—(वा) 'वा' शब्द पूर्व उक्त आज्यधर्मता की निवृत्ति के लिये है। (विशदत्वात्) हिरण्य के विशद=कठोर होने से (औषधम्) औषधधर्म होवें।

विशेष—कुतूहलवृत्ति में औषधाद् वा सूत्र में पाठ है।

व्याख्या—अथवा औषध का विध्यन्त हिरण्य में होवे। किस हेतु से? विशद (=कठोर) होने से। हिरण्य भी विशद है और औषध भी विशद है।

तो फिर इन दोनों (=आज्य धर्म तथा औषध धर्म) सामान्यों में क्या विशेष है? निश्चय ही कोई विशेष नहीं है। किन्तु विशदत्व के दो कारण उपोद्बलक हैं (द्र०—अग्रिमसूत्र ३८, ३९); तेजस्विता का एक धर्मानुग्रह है [उज्ज्वलत्व] ॥३७॥

### चरुशब्दाच्च ॥३८॥

सूत्रार्थः—(चरुशब्दात्) चरु शब्द के श्रवण से (च) भी औषध धर्म होंगे।

व्याख्या—यहां 'चरु' शब्द भी होता है—प्राजापत्यं चरुम्। चरु शब्द औषध का कहने वाला है। वह औषध [धर्म] का बलवान् लिङ्ग है ॥३८॥

विवरण—चरुशब्दश्चौषधस्य वक्ता—अन्तः उष्म सिद्ध पकाया ओदन चरु कहाता है। लोकभाषा में 'विना मांड निकाले पकाया हुआ चावल' कहते हैं ॥३८॥

## तस्मिंश्च श्रपणश्रुतेः ॥३६॥

तस्मिंश्चाऽऽज्ये श्रपणं श्रूयते, घृते श्रपयतीति। किमतः? अत एतद् भवति। औषधविध्यन्तेन श्रपणं प्राप्यते। तत्र केवलमाज्यं विधायिष्यते। आज्यविध्यन्ते तु श्रपणमाज्यं च विधीयेयाताम्। तथा वाक्यं भिद्येत।

तस्मिंश्च श्रपणश्रुतेः—इत्येतस्यापरा व्याख्या। आह। साक्षादेवेहाऽऽज्यं श्रूयते। तस्मात् तस्य विध्यन्त इति। तत उत्तरमिदम्। तस्मिंश्च श्रपणश्रुतेः। दार्शपौर्णमासिकं श्रपणं तस्मिंश्चाऽऽज्ये श्रूयते। गुणगतं तत्सामान्यम्। हविर्गतं तु वैशद्यं, चरुशब्दश्च। तस्मात्ते बलवती ॥३६॥

———

---

### तस्मिंश्च श्रपणश्रुतेः ॥३६॥

सूत्रार्थः—(तस्मिन्) चरु के विषय में (श्रपणश्रुतेः) घृत में पाक का श्रपण होने से (च) भी औषध धर्म होगे।

व्याख्या—और उस (=चरु) में आज्य में पाक सुना जाता है—घृते श्रपयतीति। इससे क्या सिद्ध होता है? इससे यह सिद्ध होता है कि औषध विध्यन्त से पाक प्राप्त कराया जाता है। उस अवस्था में केवल आज्य का विधान किया जायेगा। आज्य का विध्यन्त मानने पर श्रपण और आज्य दोनों का विधान करना होगा। वैसा करने पर वाक्यभेद होगा।

विवरण—औषधविध्यन्तेन श्रपणं प्राप्यते—आग्नेय अष्टाकपाल पुरोडाश का विध्यन्त प्रकृतिवद् विकृतिः कर्तव्या चोदना से प्राप्त होने पर पुरोडाशविषयक श्रपण यहां भी प्राप्त हो जायेगा। इससे केवल घृतमात्र का विधान करना होगा। यह प्राजापत्यं घृते चरुं निर्वपेत् वचन से विधान कर दिया गया। आज्यविध्यन्ते तु श्रपणमाज्यं च विधीयताम्—उपांशुयाज में आज्य हवि है। उसका श्रपण वहां नहीं कहा है। केवल घृत को पिघलाने मात्र के लिये 'अधिश्रयण' अग्नि पर रखने का विधान है अतः प्रकृत में श्रपण और घृत दोनों का विधान करना पड़ेगा।

व्याख्या—तस्मिंश्च श्रपणश्रुतेः इसकी दूसरी व्याख्या—(आक्षेप) यहां (=प्रकृत वाक्य में) साक्षात् ही आज्य सुना जाता है। इस से उसका विध्यन्त होवे। इस आक्षेप के अनन्तर उत्तर है—तस्मिंश्च श्रपणश्रुतेः—दर्शपूर्णमास सम्बन्धी श्रपण उस=आज्य में सुना जाता है। यह गुणगत सामान्य है। हविर्गत सामान्य है—कठोरता और चरु शब्द। इससे ये दोनों बलवान् हैं ॥३६॥

———

[मधूदकयोरुपांशुयाजधर्मातिदेशाधिकरणम् ॥१६॥]

मधूदके द्रवसामान्यात् पयोविकारः स्यात् ॥४०॥ (पू०)

चित्रायामिष्टौ श्रूयते—दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यं भवति इति। तत्र, मधूदके पयोविकारः स्यात्। कुतः? द्रवसामान्यात्। द्रवे च मधूदके, पयोऽपि द्रवम् ॥४०॥

आज्यं वा वर्णसामान्यात् ॥४१॥ (उ०)

आज्यं वा, इमे विकुर्याताम्[1], उपांशुयाजस्य तयोर्विध्यन्तः स्यात्। कुतः? वर्णसामान्यात्। समानवर्णे मधूदके आज्येन ॥४१॥

---

मधूदके द्रवसामान्यात् पयोविकारः स्यात् ॥४०॥

सूत्रार्थः—(मधूदके) मधु और उदक (द्रवसामान्यात्) द्रवत्व सामान्य से (पयोविकारः) दूध के विकार (स्यात्) होवें।

व्याख्या—चित्रा इष्टि में सुना जाता है—दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यं भवति (=दधि मधु घृत पयः धानाः=खीलें, तण्डुल, इनसे संसृष्ट प्राजापत्य हवि होता है)। इन में मधु और उदक पयोविकार होवें। किस हेतु से? द्रव सामान्य से। मधु और उदक द्रव हैं, पयः भी द्रव है ॥४०॥

विवरण—दधि आदि सातों हवियों का निर्देश करके तत्संसृष्ट शब्द से एक याग सूचित होता है। देवता के एकत्व से भी ऐन्द्रदध्यमावास्यायाम् ऐन्द्रपयोऽमावास्यायाम् से अमावास्या में विहित दधि पयः दो हवियों का एक ही देवता होने से एक ही याग होता है। अनेक हव्य द्रव्यों के होने पर धर्मों के विरोध में भूयस्त्व (=आधिक्य) से धर्म नियम आगे विप्रतिषिद्ध-धर्माणां समवाये भूयसां स्यात् सधर्मकत्वम् (मी० १२।२।२४) सूत्र से कहेंगे। उससे सिद्ध-होने पर यह अधिकरण मधु और उदक में आज्यधर्म होवे अथवा सान्नाय्य धर्म के-विवेचन मात्र के लिये है। विशेष 'टुप्' टीका में देखें ॥४०॥

आज्यं वा वर्णसामान्यात् ॥४१॥

सूत्रार्थः—(वा) 'वा' शब्द पूर्व उक्त पक्ष की निवृत्ति के लिये है। (आज्यम्) मधु और उदक में आज्य विध्यन्त होवे (वर्णसामान्यात्) वर्ण की समानता से।

व्याख्या—अथवा आज्य इनको विकृत करे। उपांशुयाज का उन दोनों में विध्यन्त होवे। किस हेतु से? वर्ण के सामान्य से। मधु और उदक आज्य के समान वर्णवाले हैं ॥४१॥

---

१. 'आज्यं वा विकुर्यात इते' पाठान्तरम्।

## धर्मानुग्रहाच्च ॥४२॥

आज्यधर्माश्च बहवो मधूदकयोः शक्याः कर्तुमुत्पवनादयो, न तु पयोधर्मा दोहनादयः ॥४२॥

## पूर्वस्य चाविशिष्टत्वात् ॥४३॥

यत्तु पूर्वं कारणमुक्तं द्रवत्वसामान्यं, तदविशिष्टम् । आज्यमप्यग्निसंयोगाद् द्रवी भवति । तस्मादुपांशुयाजविध्यन्तो मधूदकयोरिति ॥४३॥

**इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्येऽष्टमस्याध्यायस्य प्रथमः पादः ॥**

---

विवरण—आज्यं वा इमे विकुर्याताम् का तात्पर्य है कि उपांशुयाजस्य आज्य का जो विध्यन्त है वही इन विकृतियाग के द्रव्यों में होवे ॥४१॥

### धर्मानुग्रहाच्च ॥४२॥

सूत्रार्थः—मधु और उदक में आज्य के (धर्मानुग्रहात्) बहुत से धर्मों के अनुग्रह से (च) भी आज्यधर्म होवें ।

व्याख्या—आज्य के उत्पवन आदि बहुत से धर्म मधु और उदक में किये जा सकते हैं। पयः के दोहनादि धर्म नहीं किये जा सकते ॥४२॥

### पूर्वस्य चाविशिष्टत्वात् ॥४३॥

सूत्रार्थः—(पूर्वस्य) पूर्व उक्त द्रवत्वसामान्य के (अविशिष्टत्वात्) अविशिष्ट होने से अर्थात् घृत भी अग्नि के संयोग से द्रव हो जाता है, इससे (च) भी आज्य धर्म होवे ।

व्याख्या—जो पूर्व द्रवत्वसामान्यं कारण कहा है वह अविशिष्ट अर्थात् समान है। आज्य भी अग्नि के संयोग से द्रव हो जाता है। इस लिये मधु और उदक में उपांशु याज का विध्यन्त होवे ॥४३॥

# अष्टमाध्याये द्वितीयः पादः

[वाजिनयागसुराग्रहयोरैष्टिकधर्मातिदेशाधिकरणम् ॥१॥]

चातुर्मास्येषु वाजिनेज्या श्रुता—**वाजिभ्यो वाजिनम्**[1] इति। सौत्रामण्यां च सुराग्रहाः—**आश्विनं ग्रहं गृह्णाति, सारस्वतमैन्द्रम्**[2] इति। तत्र संशयः—किमुभयोः सौमिको विध्यन्त उत दार्शपौर्णमासिक इति? तदुच्यते—

**वाजिने सोमपूर्वत्वं सौत्रामण्यां च ग्रहेषु ताच्छब्द्यात् ॥१॥ (पू०)**

वाजिने, सौत्रामण्यां च ग्रहेषु सोमपूर्वत्वम्। सौमिको विध्यन्तः। कुतः?

---

व्याख्या—चातुर्मास्य में वाजिन का याग श्रुत है—वाजिभ्यो वाजिनम् (=वाजिन् देवताओं के लिये वाजिन द्रव्य का होम करे। और सौत्रामणि में सुरा के ग्रह श्रुत हैं-आश्विनं ग्रहं गृह्णाति सारस्वतमैन्द्रम् (=आश्विनग्रह का ग्रहण करता है सारस्वत ग्रह का ऐन्द्र ग्रह का)। इन में संशय होता है—क्या दोनों (=वाजिन, सुरा) में सौमिक विध्यन्त होवे अथवा दर्शपूर्णमास संबन्धी विध्यन्त? इस में कहते हैं—

विवरण—गरम दूध में दही डालने से दूध के फटने पर जो घना भाग होता है उसे आमिक्षा कहते हैं और जो जल होता है उसे वाजिन कहते हैं—तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम् (मी० भाष्य २।२।२३ में उद्धृत)। सौत्रामण्यां च सुराग्रहाः—सौत्रामणि याग में सुरा की आहुतियों का विधान है। परन्तु यह सुरा मद्य (=शराब) नहीं है। इसके स्वरूप की विस्तृत विवेचना मी० भाष्य ३।५।१४ की व्याख्या में विवरण के अन्तर्गत भाग ३, पृष्ठ ९५६ पर की है। पाठक वहां देखें।

**वाजिने सोमपूर्वत्वं सौत्रामण्यां च ग्रहेषु ताच्छब्द्यात् ॥१॥**

सूत्रार्थः—(वाजिने) वाजिन याग में (सोमपूर्वत्वम्) सोम का धर्म=विध्यन्त होवे, (च) और (सौत्रामण्याम्) सौत्रामणि में (ग्रहेषु) ग्रहों में सौमिक विध्यन्त होवे। (ताच्छब्द्यात्) वाजिन और सुरा में सोमशब्द का प्रयोग होने से।

व्याख्या—वाजिन में और सौत्रामणि में जो ग्रह है उनमें सोमपूर्वत्व होवे, सौमिक विध्यन्त होवे। किस हेतु से? उस शब्द का प्रयोग होने से। सोम शब्द का प्रयोग होने से। वहां

---

१. अनुपलब्धमूलम्। द्र०—वाजिभ्यो वाजिनं जुहोति। शत० २।४।४।२२॥

२. अनुपलब्धमूलम्।

तीति। तस्य कः परिहारः? उच्यते—औत्पत्तिकमेतदृचो नामधेयमित्युक्तम्। अत उत्पत्तिनामधेयत्वाद् योऽयं जगत्यवयवे चतुर्विंशत्यक्षरे पदसंचये प्रयोगः, स भक्त्या[1] विज्ञेयः। न ह्येकस्य शब्दस्यानेकार्थता सत्यां गतौ न्याय्या[2]। कया पुनर्भक्त्या? परिमाणसामान्यात्। यत्परिमाणं द्वयोर्गायत्र्योस्तदेकस्या जगत्याः। अत एतदुक्तम्—**ये हि द्वे गायत्र्यौ, सैका जगती** इति। तथा—यौ द्वौ कौरवौ स एको बाहीक इति। एतच्च गायत्रीद्वयप्रशंसार्थं वचनम्। कथम्? इदं श्रूयते—**द्वाभ्यां गायत्रीभ्यां वैश्यस्य**[3] इति। तद्वेतदयुक्तमिवोच्यते। जगत्या वैश्यस्य कार्यम्। **जागतो हि वैश्यः**[4]। तदेतद्द्वाभ्यां गायत्रीभ्यां क्रियते। जगत्यैव तत्कृतं भवति—**ये हि द्वे गायत्र्यौ सैका जगती** इति। तस्मादहेतुरयं संख्यार्थत्वे गायत्रीशब्दस्य ॥२२॥

---

गायत्र्यौ सैका जगती, उसका क्या परिहार है? [परिहार] कहते हैं—[गायत्री] यह ऋचा का नामधेय औत्पत्तिक (नित्य[5]) है। अतः उत्पत्ति नामधेय होने से जो यह [गायत्री शब्द] जगती के अवयवभूत चौबीस अक्षरों के पद समुदाय में प्रयोग है वह भक्ति से जानना चाहिये। एक शब्द की अनेकार्थता न्याय्य नहीं है। किस भक्ति से [प्रयुक्त] है? परिमाण सामान्य से। जो अक्षर परिमाण दो गायत्रियों का होता है वही एक जगती का है। इसी से यह कहा है—ये हि द्वे गायत्र्यौ सैका जगती। तथा—जो दो कौरव है वह एक बाहीक है। यह यौ द्वौ आदि वचन दो गायत्री की प्रशंसार्थ है। कैसे? यह सुना जाता है—द्वाभ्यां गायत्रीभ्यां वैश्यस्य (=दो गायत्री से वैश्य का [अग्निचयन में अग्नि का आधान करे])। यह अयुक्त के समान कहा जाता है। जगती ऋचा से [वैश्य का आधान] करना चाहिये। क्योंकि जागतो हि वैश्यः (=वैश्य जागत है=जगती से सम्बद्ध है)। यह (=जागतत्व) दो गायत्रियों से किया जाता है। जगती से ही वह किया हुआ होता है—ये हि द्वे गायत्र्यौ सैका जगती वचन से। इसलिये यह हेतु नहीं है गायत्री शब्द के संख्यार्थत्व में ॥२२॥

विवरण—**यौ द्वौ कौरवौ स एको बाहीकः**—इसका ठीक तात्पर्य हमारी समझ में नहीं आया। हमारे विचारानुसार इसका तात्पर्य यह है कि कौरव कुल की अर्थात् सोम (=चन्द्र) वंश की चक्रवर्ती सुहोत्र पर्यन्त राजधानी प्रतिष्ठानपुर (प्रयाग) थी। सुहोत्र के पुत्र हस्ती ने गङ्गा के किनारे हस्तिनापुर बसाया था।[6] तब से चान्द्रवंश की राजधानी हस्तिनापुर हुई।

---

१. 'भाक्तः' इति पाठान्तरम्।

२. मी० भाष्ये १।३।३ इत्येवमनेकत्र उक्तम्—'अन्याय्यश्चानेकार्थत्वम्' इति वचनमत्रानुसन्धेयम्। ३. मै० सं० ३।२।२॥

४. अनुपलब्धमूलम्। द्र०—जागतो वै वैश्यः। ऐ० ब्रा० १।२८॥

५. द्र०—औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः (मी० १।१।६) में कहा है—औत्पत्तिकमिति नित्यं ब्रूमः। ६. पं० भगवद्दत्त कृत भारतवर्ष का बृहद् इतिहास भाग २, पृष्ठ ९६।

## वचनमिति चेत् ॥२३॥

शक्यं तावत् तत्रैतद्वक्तुं, यत्रानुवादो गायत्रीशब्दः। यत्र तु विधिस्तत्र कथम्? यथा—तिस्रोऽनुष्टुभः चतस्रो गायत्रीः करोति[1] इति। कः पुनर्विधौ विशेषः? विधौ शब्दार्थेन व्यवहारो भवति। तिस्रोऽनुष्टुभश्चतस्रो गायत्र्यो न शक्याः कर्तुम्। शक्यास्तु चतस्रश्चतुर्विंशतयः। तस्मात्तत्र संख्यायां गायत्रीशब्द इति ॥२३॥

अथ ब्रूमः—

---

प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः (मनु० १।२१) के अनुसार प्रयाग प्राग् देश के अन्तर्गत है। बाह्लीक नाम सतलज से लेकर सिन्ध नदी पर्यन्त भाग का है (महाभारत कर्ण० ४४।७)। तदनुसार इसका अर्थ लौकिक किंवदन्ती दो पुरबइये और एक पञ्जाबी के रूप में समझा जा सकता है। शारीरिक बल आदि की दृष्टि से प्रायः पञ्जाबी दो पुरबइये के बराबर आज भी देखा जाता है ॥२२॥

## वचनमिति चेत् ॥२३॥

सूत्रार्थः—लक्षणा से (वचनम्) विधि कैसे होगी (इति चेत्) ऐसा कहो तो।

व्याख्या—यह वहां कहा जा सकता है जहां गायत्री शब्द अनुवाद हो। जहां तो विधि है वहां कैसे होगा? जैसे तिस्रोऽनुष्टुभः चतस्रो गायत्रीः करोति (=तीन अनुष्टुभों [३२×३=९६] को चार गायत्रियां [२४×४=९६] बनाता है। विधि में क्या विशेषता है? विधि में शब्दार्थ से व्यवहार होता है। तीन अनुष्टुप् चार गायत्रियां नहीं बनाई जा सकतीं। चार चौबीस बनाये जा सकते हैं। इससे वहां संख्या में गायत्री शब्द है ॥२३॥

विवरण—यत्र तु विधिस्तत्र कथम्—इसका जो विधिपरक वचन उद्धृत किया है वह हमें नहीं मिला। तै० सं० ५।४।१२।१ में तिस्रोऽनुष्टुभश्चतस्रो गायत्रियः वचन मिलता है परन्तु वह विधिपरक नहीं है। विधौ शब्दार्थेन व्यवहारः—'शब्दार्थेन=अभिधावृत्त्या=मुख्यार्थेन।' विधि में लक्षणा नहीं होती, यह भाष्यकार ने मी० १।२।२९ के भाष्य में इस प्रकार कहा है—विधौ हि न परः शब्दार्थः प्रतीयते। न विधौ परः शब्दः इस रूप में यह न्याय मीमांसकों के अतिरिक्त शास्त्रकारों ने स्वीकार किया है। द्र०—मीमांसा कोष भाग ४, पृष्ठ २२९४ ॥२३॥

व्याख्या—इस विषय में कहते हैं—

---

१. अनुपलब्धमूलम्। द्र०—तिस्रोऽनुष्टुभश्च तिस्रो गायत्रियः। तै० सं० ५।४।१२।१॥

## यावदुक्तम् ॥२४॥

इहैवैकत्र संख्यार्थो नान्यत्र। क्वचिद् दर्शनात्। आह। यद्येवं न संख्यावचनः। कथमिह संख्यार्थो जात इति? उच्यते। लक्षणयाऽपि विधानं भवति। तथा लोके—अमी पिष्टपिण्डाः सिंहाः क्रियन्तामिति। वेदेऽपि—पृष्ठैरुपतिष्ठते[1] इति। न[2] च तत्र सिंहशब्दः प्रतिकृतिवचनो दृष्ट इत्यन्यत्रापि प्रतिकृतिवचनो विज्ञायते। पृष्ठशब्दो वा पृष्ठसाधनमन्त्रवचनः[3]। न च लक्षणया प्रयोगे शब्दार्थः परिच्छिद्यते। यत्कारणं, स्वार्थ एव वर्तमानोऽर्थान्तरं लक्षयति। स्वार्थं जहन्नेव लक्षयेत्। तस्मादयमप्यहेतुः ॥२४॥

---

### यावदुक्तम् ॥२४॥

सूत्रार्थः—(यावदुक्तम्) अभिधा लक्षणा आदि जितनी वृत्तियां हैं उनसे विधान किया जाता है।

विशेष—सुबोधिनी वृत्ति में यही सूत्र पाठ है और अर्थ भी उसी के अनुसार दर्शाया है। कुतूहलवृत्ति में वचनमिति चेत् पूर्वं सूत्रपाठ के अनन्तर यावदर्थमिहैवैकत्र संख्यार्थो नान्यत्र क्वचिद् दर्शनात् सूत्रपाठ मुद्रित है। यह पाठ भाष्य में देखा जाता है।

व्याख्या—यहां एक स्थान पर संख्यार्थ है, अन्यत्र नहीं है। क्वचिद् दर्शन होने से। (आक्षेप) यदि इस प्रकार [गायत्री शब्द] संख्या को कहनेवाला नहीं है तो कैसे यहां संख्यार्थवाला हो गया? (समाधान) लक्षणा से भी विधान होता है। जैसे लोक में—ये आटे के पिण्ड सिंह बनाए जायें। अर्थात् इन आटे के पिण्डों को सिंहाकृति दो। वेद में भी—पृष्ठैरुपतिष्ठते (=पृष्ठों से उपस्थान करता है)। वहां ('पिष्टपिण्डाः सिंहाः क्रियन्ताम्' में) सिंह शब्द प्रतिकृतिवाचक देखा जाता है। इससे अन्यत्र ('वने सिंहाः प्रचरन्ति' में) भी प्रकृति वचन नहीं जाना जाता है, और पृष्ठ शब्द ('पृष्ठैः स्तुवते' में) पृष्ठ साधन मन्त्र वाचक है [तो वह अन्यत्र 'पृष्ठैः स्तुवते' में भी पृष्ठ साधन मन्त्र का वाचक नहीं होता है]। और लक्षणा से प्रयोग में शब्दार्थ का परिच्छेद (=परित्याग) नहीं होता है। इसका कारण है—स्वार्थ में ही वर्तमान होता हुआ अर्थान्तर को लक्षित करता है। स्वार्थ का त्याग करके [अन्य को] लक्षित नहीं करेगा। इससे यह भी हेतु नहीं है ॥२४॥

विवरण—न च तत्र सिंहशब्दः—'न च' का सम्बन्ध उत्तर वाक्य के साथ है न च अन्यत्रापि। व्याख्या में जो भाषार्थ किया है वह इसी के अनुसार है। पृष्ठशब्दो वा पृष्ठसाधन-

---

१. तै० सं० ५।५।८।१॥

२. 'न च' उत्तरान्वयी—'दृष्ट इति न च अन्यत्रापि' इत्येवं योजना कर्तव्या।

३. अत्र मी० ७।३। अधि० १४। ३६ भाष्यं द्रष्टव्यम्।

## अपूर्वे च विकल्पः स्याद् यदि संख्याविधानम्॥२५॥

अपूर्वे च दर्शपूर्णमासकर्मणि विकल्पः स्यात्, यदि संख्यायां गायत्रीशब्दः। तत्र हि श्रूयते—**गायत्र्या परिदध्याद्**[1] इति। एवं श्रुते, [2]आजुहोतायाश्चतुर्विंशत्यक्षरस्य पदसंचयस्य च विकल्पः स्यात्। विकल्पे पक्ष आजुहोताया बाधः। स चायुक्तः सत्यां गतौ। तस्मादपि नैतत् संख्याविधानम् ॥२५॥

---

मन्त्रवचनः—'पृष्ठैरुपतिष्ठते' में पृष्ठ स्तोत्र साधन मन्त्र को कहता है इसलिये 'पृष्ठैः स्तुवते' में भी पृष्ठ स्तोत्र साधन मन्त्र का वाचक नहीं होगा। मीमांसा ७।३। अधि० १७ का ३५वां सूत्र पूर्वपक्ष का है। ३६वें सूत्र के भाष्य में पृष्ठ शब्द की पृष्ठसाधनभूत मन्त्रवचनों का विस्तार से वर्णन किया है। परन्तु वहां उपतिष्ठन्ते में उपान्मन्त्रकरणे (अष्टा० १।३।२५) से मन्त्रकरण में विहित आत्मनेपद का आश्रय लिया है और यहां लक्षणा का यह भेद है। स्वार्थं जहन्नैव लक्षयेत्—यह नियम अजहत् स्वार्था लक्षणा के विषय में है। जहत्स्वार्था लक्षणा में स्वार्थ को छोड़कर ही अर्थान्तर को लक्षित करता है। द्र०—साहित्यदर्पण, परि० २, तथा महाभाष्य १।१।१६; २।१।१॥ ॥२४॥

## अपूर्वे च विकल्पः स्याद् यदि संख्याभिधानम् ॥२५॥

**सूत्रार्थः**—(अपूर्वे) अपूर्व दर्शपूर्णमास कर्म के गायत्र्या परिदध्यात् में (विकल्पः) विकल्प (च) भी (स्यात्) प्राप्त होवे (यदि) यदि गायत्री शब्द (संख्याभिधानम्) संख्या का अभिधायक होवे।

**व्याख्या**—अपूर्व दर्शपूर्णमास कर्म में विकल्प होवे, यदि संख्या में गायत्री शब्द होवे अर्थात् गायत्री शब्द २४ संख्या का वाचक होवे। वहां सुना जाता है—गायत्र्या परिदध्यात् (=गायत्री से सामिधेनियों की समाप्ति करे)। ऐसा सुनने पर आजुहोत[दुवस्यत] इस चतुर्विंशत्यक्षर पदसमुदाय का विकल्प होवे। विकल्प पक्ष में आजुहोत[2] ऋचा का बाध होवे। वह अयुक्त है ज्ञान होने पर। इससे भी यह [गायत्र्या परिदध्यात्] में गायत्री से संख्या का विधान नहीं है ॥२५॥

---

१. गायत्रिया परिदध्यात्। तै० सं० २।५।१०॥

२. तै० ब्राह्मणे (३।५।२) 'आजुहोत दुवस्यत' सामिधेनी पठिता। ऋग्वेदे (५।२८।६) 'आजुहोता दुवस्यत' इति पाठः। तत्र छान्दसं दीर्घत्वम्।

३. तै० ब्रा० ३।५।२ में 'आजुहोत दुवस्यत' पाठ है। ऋग्वेद ५।२८।६ में 'आजुहोता दुवस्यत' पाठ है। यहां छान्दस दीर्घत्व है। भाष्य में 'अजुहोतायाः' पाठ में 'आजुहोत' प्रतीक में ऋक्त्व के कारण स्त्रीलिङ्गविषयक यप् जानना चाहिये। पञ्चदश सामिधेनियों में 'आजुहोत दुवस्यत' अन्तिम है।

अत्रोच्यते—

## ऋग्गुणत्वान्नेति चेत् ॥२६॥

न प्रकृतौ विकल्पो भविष्यति। कुतः? ऋग्गुणत्वात्। ऋग्गुणो हि तत्र प्रयोगोऽङ्गीकृतः। ऋचस्तस्य सामिधेन्य आम्नाताः। यदि, अनृचा परिदधीत, ऋग्गुणत्वं बाध्येत। तस्मात्तत्राऽऽजुहोतयैव परिधास्यति। तथा सति गायत्र्या परिहितं भविष्यति। ऋग्गुणत्वं चोपसंगृहीतम्[1] ॥२६॥

## तथा पूर्ववति स्यात् ॥२७॥

---

विवरण—गायत्र्या परिदध्यात्—गायत्रीछन्दस्क ऋचा से सामिधेनियों की परिसमाप्ति करे। वह गायत्रीछन्दस्क आजुहोत दुवस्यत मन्त्र तै० ब्रा० ३।५।२ में निर्दिष्ट है। यदि गायत्री शब्द २४ संख्या का वाची होवे तो साक्षात् विधान सामर्थ्य से आजुहोत दुवस्यत मन्त्र प्राप्त होवे और २४ संख्या वाचक गायत्री शब्द को मानने पर किसी भी ऋचा के २४ अक्षर समुदाय प्राप्त होगा। इस प्रकार विकल्प होने पर पक्ष में आजुहोत ऋचा की बाधा प्राप्त होगी। परन्तु आजुहोत गायत्री ऋचा के नित्यवत् ज्ञान होने पर पक्ष में बाधा अनुचित है ॥२५॥

व्याख्या—इस (=विकल्प के) विषय में कहते हैं—

## ऋग्गुणत्वान्नेति चेत् ॥२६॥

सूत्रार्थः—दर्शपूर्णमास में सामिधेनियों में ऋचाएं ही पठित हैं। अतः (ऋग्गुणत्वात्) दर्शपूर्णमास के ऋक् गुणवाला होने से गायत्री शब्द से आजुहोत ऋक् ही ली जायेगी, किसी अन्य ऋचा के २४ अक्षर नहीं लिये जायेंगे। अतः विकल्प प्राप्त नहीं होगा ऐसा होवे तो।

व्याख्या—प्रकृति में विकल्प नहीं होगा। किस हेतु से? ऋग्गुणत्व से। ऋक् गुण वाला ही वहां (=प्रकृति में) प्रयोग स्वीकार किया है। वहां ऋचाएं सामिधेनी संज्ञक पठित हैं। यदि अनृक् (=किन्हीं २४ अक्षरों के समुदाय) से परिहित (=समाप्ति) होवे तो [सामिधेनियों का] ऋग्गुणत्व बाधित होवे। इसलिये वहां आजुहोत ऋचा से ही समाप्ति होगी। ऐसा होने पर 'गायत्री से समाप्ति' उपपन्न होगी और ऋग्गुणत्व भी संगृहीत होगा ॥२६॥

## तथा पूर्ववति स्यात् ॥२७॥

सूत्रार्थः—(तथा) दर्शपूर्णमास के समान (पूर्ववति) बृहस्पति सव के 'गायत्रमेतत् तदहर्भवति' में भी बृहस्पति सव की प्रकृतिभूत अग्निष्टोम के ऋग्गुणवाला होने से वहां भी गायत्री

---

१. 'उपगृहीतं'—पाठान्तरम्।

पूर्ववत्यपि बृहस्पतिसवे तथा स्यात्, यथाऽपूर्वे । अत्रापि ऋग्गुणकः प्रयोगोऽङ्गीकृतश्चोदकेन । तत्रापि ऋक्षूपादीयमानासु गायत्रं चैवाहः कृतं भवति । ऋग्गुणकत्वं च न बाधितम् । तस्मान्नाक्षरावलोपः ॥२७॥

## गुणावेशश्च सर्वत्र ॥२८॥

तुशब्दस्य स्थाने चशब्दः । दृष्टश्च तुशब्दस्यार्थे चशब्दः । यथा, किंचेह भवतीति । गुणस्य चतुर्विंशतिसंख्यायाः सर्वत्राऽऽवेशः कृत्स्नायामाजुहोतायां, नाव-

---

ऋचाओं का ही ग्रहण (स्यात्) होवे । अर्थात् २४ संख्या अर्थ मानकर पूर्वपक्षी ने जो ऋगक्षर लोप कहा है वह न होवे ।

व्याख्या—पूर्ववान् (=पूर्व उक्त) बृहस्पति सव में भी उसी प्रकार (=दर्शपूर्णमास के समान) होवे, जैसा अपूर्व में (=जिसकी कोई पूर्व प्रकृति नहीं है उस दर्शपूर्णमास में ऋग्गुणत्व से गायत्री का २४ संख्या अर्थ नहीं है) । यहां (=बृहस्पति सव में) भी ऋग्गुणवाला ही प्रयोग चोदकवचन से स्वीकृत (=स्वीकार किया गया) है । वहां (='गायत्रमेतदहर्भवति' में) भी ऋचाओं के उपादीयमान (=गृहीत) होने से गायत्र ही वह दिन किया जाता है । और ऋग्गुणत्व भी बाधित नहीं होता । इससे [त्रिष्टुप् जगती के] अक्षरों का लोप नहीं होगा [दाशतयी से गायत्रीछन्दस्क ऋचाओं का आगम होगा] ॥२७॥

## गुणावेशश्च सर्वत्र ॥२८॥

सूत्रार्थः—भाष्यकार ने इस सूत्र का दो प्रकार से व्याख्यान किया है । प्रथम व्याख्यान में सूत्रस्थ 'च' शब्द को 'तु' के स्थान पर माना है । हम नीचे यथा भाष्य दोनों अर्थ दे रहे हैं—

१—(गुणावेशः) २४ संख्या का आवेश=निवेश (तु) तो (सर्वत्र) कृत्स्न 'आजुहोत' ऋक् में होता है उसके किसी अवयव में नहीं होता है । अतः 'आजुहोत' के ग्रहण में गायत्री शब्द से ऋक् और २४ संख्या दोनों गृहीत होती हैं ।

२—यदि (गुणावेशः) गायत्रीशब्द गायत्रीगत २४ अक्षर संख्या को कहता है तो वह २४ संख्या रूप गुण (सर्वत्र) सभी २४ संख्या से संख्येय द्रव्यों का (च) भी गायत्री शब्द वाचक प्राप्त होता है ।

व्याख्या—'तु' शब्द के स्थान में 'च' शब्द है । 'तु' शब्द के अर्थ में 'च' शब्द [लोक में] देखा गया है—किन्तु यहां यह होता है । २४ संख्या रूपी गुण की सर्वत्र कृत्स्न 'आजुहोत' ऋक् में आवेश (=समावेश) प्राप्त होता है अवयव में नहीं । अतः उस (=आजुहोत) का

यवे। अतस्तस्यामुपादीयमानायामृग्गुणत्वं चोपगृहीतं भवति, संख्या च। बृहस्पति-सवे पुनर्या ऋचश्चोदकेनाङ्गीकृताः, तासामवयवे चतुर्विंशतिसंख्या निविष्टा। तस्मिन्नुपादीयमान ऋग्गुणत्वमनुपात्तं भवति। प्रकृतिगायत्रीषु तूपात्तं भवति। तस्मान्न संख्याभिधाने गायत्रीशब्दे प्रकृतिगायत्रीणामागमः प्राप्नोति।

अपर आह। इदं तावदयं संख्यावादी प्रष्टव्यः। कस्मादक्षरगतायामेव संख्यायां भवानवस्थितो, न पुनरन्यसंख्येयगतायामपि, ग्रहगतायां चमसगतायां वा। यावताऽविशेषेण श्रुतं, गायत्रमेतदहर्भवतीति। एवं सति सर्वत्र गुणावेशः संख्यावेशः[1] प्राप्नोति ॥२८॥

## निष्पन्नग्रहणान्नेति चेत् ॥२९॥

स चेद् ब्रूयात्, यत्रायं निष्पन्नो गायत्रीशब्दः, प्रसिद्ध इत्यर्थः। तस्य ग्रहणं

---

ग्रहण करने पर ऋग्गुणत्व और संख्या दोनों उपगृहीत होते हैं, परन्तु बृहस्पति सव में जो (त्रिष्टुप् और जगती) ऋचाएं चोदक वचन से प्राप्त होती हैं उनके अवयव में २४ संख्या निविष्ट होती है (=रहती है)। उस (=२४ संख्या) के उपादान करने पर ऋग्गुणत्व गृहीत नहीं होता [क्योंकि त्रिष्टुप् (३६ अक्षर) और जगती (४८ अक्षर) के २४ अक्षरों में ऋक्त्वधर्म नहीं है।] प्रकृतिगत गायत्रियों में तो (=ऋग्गुणत्व और संख्या दोनों) गृहीत होते हैं। अतः संख्या को कहनेवाले गायत्री शब्द [के ग्रहण करने] में प्रकृतिभूत गायत्रियों का आगम प्राप्त नहीं होता है।

दूसरे आचार्य कहते हैं—पहले इस संख्यावादी से यह पूछो कि किस कारण [गायत्री शब्द की] अक्षरगत २४ संख्या अर्थ में ही अवस्थित है अर्थात् अक्षरगत २४ संख्या अर्थ तक ही क्यों सीमित है? अन्य संख्येय ग्रहगत वा चमसगत २४ संख्या में भी [गायत्री शब्द को] क्यों नहीं स्वीकार करते? जबकि यह (=गायत्री शब्द) सामान्यरूप से श्रुत है—गायत्रमेतदहर्भवति। ऐसा स्वीकार करने पर सर्वत्र गुणावेश=संख्या का आवेश प्राप्त होता है ॥२८॥

### निष्पन्नग्रहणान्नेति चेत् ॥२९॥

**सूत्रार्थः**—(निष्पन्नग्रहणात्) जहां यह गायत्री शब्द निष्पन्न=प्रसिद्ध है उसके ग्रहण के ही न्याय्य होने से (इति चेत्) ऐसा कहो तो।

**व्याख्या**—यदि वह (=गायत्री शब्द का अर्थ २४ संख्या मानने वाला) कहे—जहां (=जिस अर्थ में) यह (=गायत्री शब्द) निष्पन्न है अर्थात् प्रसिद्ध है। उसका ग्रहण न्याय्य

---

१. 'संख्यावेश' इति क्वचिन्नास्ति।

न्याय्यम्। अयं चाक्षरगतायामेव संख्यायां प्रसिद्धो न सर्वत्र। तस्मान्न सर्वसंख्येयगतो गृह्यत इति ॥२९॥

स वक्तव्यः—

## तथेहापि स्यात् ॥३०॥

यथाऽक्षरगतायामेव संख्यायां दृष्टो नान्यत्र, एवमृक्ष्वेव दृष्टो नान्यस्मिंश्चतुर्विंशत्यक्षरे गद्ये वा। यथा चाक्षरेष्वेव दृष्ट इति नानक्षरे विज्ञायते। एवमृक्षु दृष्ट इति नानृक्षु विज्ञातुं न्याय्यः ॥३०॥

अत्राऽऽह। यद्यप्ययमृक्षु[1] गायत्रीशब्दः, एवमप्यक्षरावलोप एव कार्यः। किं कारणम्? प्रकृत्युपबन्धनात्। चोदकेनात्र प्राकृत्यस्त्रिष्टुब्जगत्यः प्रापिताः। ता इमा नोज्झिता भविष्यन्ति। गायत्रीशब्दश्च संख्यासामान्याच्छक्नोति तदवयवान्

---

है। यह (=गायत्री शब्द) अक्षरगत २४ संख्या में ही प्रसिद्ध है, सर्वत्र (=सब संख्येयों में) प्रसिद्ध नहीं है। इससे सब संख्येय गत [२४ संख्या अर्थ] गृहीत नहीं होता है ॥२९॥

व्याख्या—उससे कहना चाहिये—

## तथा इहापि स्यात् ॥३०॥

सूत्रार्थः—(तथा) जैसे गायत्री शब्द चतुर्विंशति अक्षरों के समुदाय में देखा गया, अन्यत्र=अन्य अर्थ में प्रयुक्त नहीं होता उसी प्रकार (इह) यहां (अपि) भी (स्यात्) होवे। अर्थात् ऋचाओं में देखा गया गायत्री शब्द अन्य अर्थ २४ संख्या से भिन्न अक्षर समुदाय में अथवा गद्य में प्रयुक्त न होवे।

व्याख्या—जैसे [गायत्री शब्द] अक्षरगत २४ संख्या में ही दृष्ट अन्यत्र (=अन्य अर्थ में) प्रयुक्त नहीं होता, उसी प्रकार ऋचाओं में देखा गया [गायत्री शब्द] अन्य २४ संख्यावाले अक्षर समुदाय में वा गद्य में प्रयुक्त न होवे। जैसे अक्षरों में देखा गया अन्य अक्षर भिन्न में नहीं जाना जाता (=प्रयुक्त नहीं होता) इसी प्रकार ऋचाओं में देखा गया ऋक् भिन्न में [प्रयुक्त] जानना भी न्याय्य नहीं है ॥३०॥

व्याख्या—(आक्षेप) यद्यपि ऋचाओं में गायत्री शब्द है तो भी ['गायत्रमेतदहर्भवति' में प्रकृति से प्राप्त त्रिष्टुप् और जगती में] अक्षरों का लोप ही करना चाहिये। क्या कारण है? प्रकृति का उपबन्ध होने से। चोदक वचन ने यहां प्रकृतिगत त्रिष्टुप् और जगती ऋचाएं प्राप्त कराई हैं। वे त्रिष्टुप् और जगतियां उज्झित (=त्यक्त) नहीं होंगीं। गायत्री शब्द भी [२४] संख्या सामान्य से उसके अवयवों को कह सकता है। इस प्रकार दोनों प्राकृत

---

१. 'यद्यप्यृक्षु' पाठान्तरम्।

वक्तुम् । एवमुभौ विधी अनुगृहीतौ भविष्यतः—प्राकृतो वैकृतश्चेति ।

अत्र उत्तरं पठति ।

**यदि वाऽविशये नियमः प्रकृत्युपबन्धाच्छब्दान्तरेष्वपि प्रसिद्धः स्यात् ॥३१॥**

यद्यविशये—असंशयेऽपि, गायत्रीषु विहितासु प्रकृत्युपबन्धनादगायत्र्यां गायत्रीशब्दः कल्प्यते, शरेष्वपि—**शरमयं बर्हिर्भवति**[1] इति कुशेषु शरशब्दः कल्पयितव्यः । कौशमेव बर्हिः कार्यम् । वक्तव्यो वा विशेषः ॥३१॥

---

और वैकृत विधियां अनुगृहीत होंगी ।

इस [आक्षेप] के अनन्तर [सूत्रकार] पढ़ते हैं—

विवरण—उपर्युक्त आक्षेप सूत्र से बहिर्भूत है । अतः भाष्यकार ने कहा है कि इस आक्षेप को ध्यान में रखकर सूत्रकार समाधान करते हैं ।

**यदि वाऽविशये नियमः प्रकृत्युपबन्धाच्छब्दान्तरेष्वपि प्रसिद्धः स्यात् ॥३१॥**

सूत्रार्थः—(वा) 'वा' शब्द पूर्व सूत्र से बहिर्भूत आक्षेप की निवृत्ति के लिये है । (यदि) यदि (अविशये) विना संशय के भी विहित गायत्रियों में (प्रकृत्युपबन्धात्) प्रकृति के अनुग्रह से अगायत्रियों में गायत्री शब्दार्थरूप (नियमः) नियम स्वीकार किया जाये तो (शब्दान्तरेषु) शब्दान्तरों के विषय में (अपि) भी प्रकृत्युपबन्ध (प्रसिद्धः) प्रसिद्ध अर्थवाले बर्हि की कल्पना होवे ।

इसका भाव यह है कि ऋक् में प्रसिद्ध गायत्री शब्द के संशय के विना भी प्रकृति के अनुग्रह के लिये उससे प्राप्त त्रिष्टुप् और जगतियों में भी अक्षर लोप से गायत्री की कल्पना की तो अभिचार कर्म में उक्त शरमयं बर्हिर्भवति (=शरों का विकारभूत बर्हि=बर्हिस्थानीय होता है) में भी प्रकृति के अनुग्रह के लिये शरों के स्थान पर कुशारूप बर्हि से ही वेदि का आच्छादन करना होगा ।

व्याख्या—यदि विना संशय के भी गायत्रियों के विहित होने पर भी प्रकृति के अनुग्रह से अगायत्रियों (=त्रिष्टुप् जगतियों) में भी गायत्री शब्द की कल्पना करते हैं तो शरों में भी शरमयं बर्हिर्भवति (=शरों के विकार बर्हिस्थानीय होते हैं) में कुशाओं में शरशब्द की कल्पना करनी चाहिये । कुशाओं को ही बर्हि बनाना चाहिये अर्थात् प्रकृति के अनुग्रह के लिये शरों को छोड़कर कुशाओं से ही वेदि का आस्तरण करना चाहिये । अथवा इसमें विशेष कहना चाहिये ॥३१॥

विवरण—शरमयं बर्हिर्भवति यह विधि अभिचार कर्म में विहित है । शर नाम सरकण्डे

---

१. तै० संहितायां २।१।५।७ इत्यत्र 'शरमयं बर्हिः' अभिचारकर्मणि पठ्यते ।

दृष्टः प्रयोग इति चेत् ॥३२॥

अयं विशेषो दृष्टः । चतुर्विंशतिसंख्यायामक्षरगतायां गायत्रीशब्दस्य प्रयोगः—ये द्वे गायत्र्यौ सैका जगती इति । तेन शक्यते कल्पयितुम् ॥३२॥

तथा शरेष्वपि ॥३३॥

शरशब्दस्यापि कुशेषु प्रयोगो दृश्यते—शरवणमेवेदं कुशवनमिति ॥३३॥

अत्रोच्यते—

भक्त्येति चेत् ॥३४॥

स तत्र शरशब्दो भाक्तः प्रयुज्यते । दीर्घत्वात् पृथुपत्रत्वात् सादृश्यवादोऽसौ,

---

का है, जिसका बाणों में उपयोग होता है । इस अभिचार कर्म की प्रकृति दर्शपौर्णमास में बर्हि (=कुशाओं) से वेदि का आस्तरण होता है अतः प्रकृति प्राप्त बर्हि के अनुग्रह के लिये शर शब्द की बर्हि अर्थ में कल्पना करनी होगी ॥३१॥

दृष्टः प्रयोग इति चेत् ॥३२॥

सूत्रार्थः—अक्षरगत २४ संख्या में गायत्री शब्द का (प्रयोगः) प्रयोग (दृष्टः) देखा गया है—ये द्वे गायत्र्यौ सैका जगती=जो चौबीस-चौबीस अक्षरों की दो गायत्रियां है वह ४८ अक्षर की एक जगती (इति चेत्) ऐसा कहो तो ।

व्याख्या—यह विशेष देखा गया है—अक्षरगत २४ संख्या में गायत्री शब्द का प्रयोग है—ये द्वे गायत्र्यौ सैका जगती । इससे [अक्षरगत २४ संख्या में गायत्री शब्द के प्रयोग की] कल्पना की जा सकती है ॥३२॥

तथा शरेष्वपि ॥३३॥

सूत्रार्थः—(तथा) उसी प्रकार (शरेषु) शरों में (अपि) भी जानना चाहिये । कुशाओं में शर शब्द का प्रयोग होता है ।

व्याख्या—शर शब्द का भी कुशों में प्रयोग देखा जाता है—शरों का वन ही यह कुशवन है अर्थात् यह कुशवन शरवण ही है ॥३३॥

व्याख्या—इस विषय में कहते हैं—

भक्त्या इति चेत् ॥३४॥

सूत्रार्थः—शर शब्द का कुशों में प्रयोग (भक्त्या) गौणी वृत्ति से होता है (इति चेत्) ऐसा कहो तो ।

व्याख्या—वहां (=कुशवन में शरवण प्रयोग में) वह शर शब्द भाक्त (=गौणी वृत्ति से) प्रयुक्त होता है । दीर्घत्व एवं स्थूल पत्रत्व के सादृश्य से यह शरवणमेवेदं कुशवनम्

शरवणमेवेदं कुशवनमिति। स्वार्थे वर्तमानः सादृश्यं गमयति। स्वार्थं जहत्कथं गमयेत्। तस्माच्छरेष्वेव तत्र शरशब्दस्य प्रयोगो न कुशेष्विति ॥३४॥

## तथेतरस्मिन् ॥३५॥

तथेतरस्मिन्नपि, ये द्वे गायत्र्यौ सैका जगती इति भाक्त एव गायत्रीशब्द इत्युक्तम्। सोऽपि स्वार्थ एव वर्तमानस्तत्सदृशं गमयतीति, ऋक्ष्वेव प्रयुक्तो न संख्यायाम्। तस्मान्न संख्यायां गायत्रीशब्दः। अतो नाक्षरावलोपः कर्तव्यः ॥३५॥

## अर्थस्य चासमाप्तत्वान्न तासामेकदेशे स्यात् ॥३६॥

अपि च त्रिष्टुब्जगतीनामेकदेशे वाक्यमपरिसमाप्तं भवति। न चापरि-

---

कहा जाता है। स्व अर्थ (=शरत्व) में वर्तमान सादृश्य को जताता है। स्वार्थ (=शरत्व) को छोड़कर सादृश्य को कैसे जनायेगा। इससे शरों में ही वहां शर शब्द का प्रयोग है न कि कुशों में ॥३४॥

### तथेतरस्मिन् ॥३५॥

सूत्रार्थः—(तथा) उसी प्रकार (इतरस्मिन्) ये द्वे गायत्र्यौ सैका जगती में भी गायत्री शब्द का भाक्त प्रयोग है।

व्याख्या—इसी प्रकार इतर (=गायत्री के प्रयोग) में भी होगा। ये द्वे गायत्र्यौ सैका जगती में गायत्री शब्द भाक्त ही है यह कह चुके। यह (=गायत्री शब्द) भी स्वार्थ में ही वर्तमान होकर तत् सदृश अर्थ (=२४ अक्षर संख्या) को बोधित करता है, इससे[गायत्री शब्द] ऋचाओं में ही प्रयुक्त होता है, २४ संख्या में प्रयुक्त नहीं होता। इसलिये २४ संख्या में गायत्री शब्द नहीं है। इससे [त्रिष्टुप् जगती ऋचाओं के] अक्षरों का लोप नहीं करना चाहिये। अर्थात् गायत्रमेतदहर्भवति में प्रकृति से चोदक वचन द्वारा प्राप्त त्रिष्टुप् और जगतियों के क्रमशः १२ और २४ अक्षरों का लोप करके उन्हें गायत्री नहीं बना सकते। वाशतयी से गायत्रियों का आगम ही करना चाहिये ॥३५॥

### अर्थस्य चासमाप्तत्वान्न तासामेकदेशे स्यात् ॥३६॥

सूत्रार्थः—त्रिष्टुप् और जगतियों में अक्षर लोप करके गायत्री बनाकर प्रयोग करने पर (अर्थस्य) अर्थ के (असमाप्तत्वात्) पूर्ण न होने से (च) भी (तासाम्) उनके (एकदेशे) एकदेश में गायत्री शब्द (न) नहीं (स्यात्) होवे।

व्याख्या—और भी—त्रिष्टुप् और जगतियों के एक देश में वाक्य परिसमाप्त (=पूर्ण) नहीं होता है। अपरिसमाप्त वाक्यार्थ से कोई भी अर्थ नहीं कहा जाता है। अर्थ के अभिधान

समाप्तेन वाक्येनार्थः कश्चिदभिधीयते। अर्थाभिधानार्थश्च मन्त्रप्रयोगः। तत्र मन्त्रप्रयोग एवानर्थकः स्यात्। तस्मान्न तासां त्रिष्टुब्जगतीनामेकदेशे गायत्रीशब्दः स्यात्। तस्मादुत्पत्तिगायत्रीणामेव दाशतयीभ्य आगमः कर्तव्य इति ॥३६॥

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्येऽष्टमस्याध्यायस्य तृतीयः पादः ॥

———

(=कथन) के लिये ही कर्मों में मन्त्र का प्रयोग होता है। ऐसा होने पर मन्त्र प्रयोग ही अनर्थक हो जावे। इसलिये उन त्रिष्टुप् और जगतियों के एकदेश में गायत्री शब्द न होवे। इस कारण उत्पत्यवस्था में ही जो गायत्रियां हैं उनका ही दाशतयी (=ऋग्वेद) से आगम करना चाहिये ॥३६॥

विवरण—तच्चोदकेषु मन्त्राख्या (मी० २।१।३२) लक्षण द्वारा कर्मों में मन्त्रों का प्रयोग तत्तत् क्रियमाण कर्म को कहने के लिये ही होता है। यही बात एतद्वै यज्ञस्य समृद्धं यद् रूपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाऽभिवदति (गोपथ २।२।६) में भी कही है। इसी का यहां अर्थाभिधानार्थं च मन्त्रप्रयोगः द्वारा भाष्यकार ने निर्देश किया है। इतना ही नहीं—अर्थरहित का प्रयोग कर्मों में नहीं होता है। यह भी तत्र मन्त्रप्रयोग एवानर्थकः स्यात् से कहा है। इससे प्रथम भाग के आरम्भ में लिखे गये श्रौत-यज्ञ-मीमांसा निबन्ध के काल्पनिक विनियोग प्रकरण में हमने जो लिखा है उसकी पुष्टि होती है। द्रष्टव्य—प्र० संस्क० पृष्ठ ११२-११५, द्वि० संस्क० पृष्ठ १२१-१२८) ॥३६॥

———

# अष्टमाध्याये चतुर्थः पादः

## [दर्विहोमशब्दस्य कर्मनामधेयत्वाधिकरणम् ॥१॥]

यदेकया जुहुयात्,दर्विहोमं कुर्याद्[1] इति श्रूयते। अस्मिन् दर्विहोमशब्दे भवति संशयः—किं गुणविधिरुत कर्मनामधेयमिति ? किं प्राप्तम् ?

### दर्विहोमो यज्ञाभिधानं होमसंयोगात् ॥१॥ (उ०)

दर्विहोमो यज्ञाभिधानं, कर्मनामधेयमित्यर्थः। कुतः ? होमसंयोगात्। होमशब्दोऽत्र श्रूयते। तत्प्रधानश्चायं समासः। दर्विशब्द उपसर्जनं, होमश्च कर्म। अथवा जुहुयादिति कर्मोच्यते। तेन समुच्चितो, यदेकया जुहुयाद् इति। तस्मात्

---

व्याख्या—यदेकया जुहुयात् दर्विहोमं कुर्यात् (= एक ऋचा से होम करे तो दर्विहोम करे)। इस दर्विहोम शब्द में सन्देह होता है—क्या यह गुणविधि है अथवा कर्मनामधेय है ? क्या प्राप्त होता है ?

विवरण—आहिताग्नि को यदि प्रवास करना पड़े तो वह वास्तोष्पते प्रतिजानीहि (तै० सं० ३।४।१०।१) और वास्तोष्पते शामया (तै० सं० ३।४।१०।१) से होम करे। यह होम शकट में दो बैलों में से एक बैल जोतकर करे। एक बैल के जोतने से 'प्रयास्यन्' स्थिति यथावत् उपपन्न होती है (द्र०—तै० सं० ३।४।१० सायणीय भाष्य)। यदि वास्तोष्पति देवता वाली एक ऋचा से होम करे तो दर्विहोम करे। दर्विहोम में दर्वि = कड़छी से होम किया जाता है। किं गुणविधिः—उक्त होम में दर्विरूप गुण का विधान है अथवा यह कर्म का नाम है।

### दर्विहोमो यज्ञाभिधानं होमसंयोगात् ॥१॥

सूत्रार्थः—(दर्विहोमः) दर्विहोम शब्द (यज्ञाभिधानम्) यज्ञ को कहनेवाला है, (होमसंयोगात्) होम के संयोग से।

व्याख्या—दर्विहोम शब्द यज्ञ को कहनेवाला है अर्थात् कर्म का नामधेय है। किस हेतु से ? होम के संयोग से। होम शब्द यहां सुना जाता है। उस (=होम) की प्रधानता वाला यह समास है। दर्वि उपसर्जन (=अप्रधान) है। होम कर्म है। अथवा जुहुयात् से कर्म कहा जाता है। उससे समुच्चित (=सम्बद्ध) यदेकया जुहुयात्। इसलिये यह कर्मनामधेय

---

१. तै० सं० ३।४।१०।४॥

कर्मनामधेयम् । स्थितं तावत्, ततोऽर्थान्तरं प्रक्रियते ॥१॥

---

[दर्विहोमशब्दस्य स्मार्तानां वैदिकानां च कर्मणां नामधेयताधिकरणम् ॥२॥]

यदा कर्मनामधेयं, तदा चिन्त्यते—किं लौकिकानां स्मार्तानां कर्मणामष्टकादीनां नामधेयं दर्विहोमशब्दः, उत सर्वेषामेव लौकिकानां वैदिकानां चेति ? किं प्राप्तम् ?

स लौकिकानां स्यात् कर्तुस्तदाख्यत्वात् ॥२॥ (पू०)

स लौकिकानां स्यात् । स खलु दर्विहोमशब्दो लौकिकानां कर्मणां नामधेयं स्यात् । कुतः ? कर्तुस्तदाख्यत्वात् । तेषां कर्ता, तेन दर्विहोमशब्देन समाख्यायते ।

---

है । अधिकरण यहां स्थित हो गया=रुक गया । अनन्तर अर्थान्तर आरम्भ करते हैं ॥१॥

विवरण—तत्प्रधानश्चायं समासः—दर्विहोम का विग्रह है—दर्व्या होमः=कड़छी से आहुति । यह तृतीया तत्पुरुष समास है । तत्पुरुष समास में उत्तरपद प्रधान होता है—उत्तरपदप्रधानस्तत्पुरुषः । होम के प्रधान होने से साधनभूत दर्वि उपसर्जन=अप्रधान है । अथवा जुहुयादिति कर्मोच्यते—पूर्व दर्विहोम शब्द के उत्तरपद होम से कर्म का विधान मानकर व्याख्या की है । यहां यदेकया जुहुयात् में 'जुहुयात्' से होमरूपी जो कर्म कहा गया है, उस होमरूपी कर्म का दर्विहोम नामधेय है क्योंकि यदेकया जुहुयात् और दर्विहोमं कुर्यात् दोनों परस्पर सम्बद्ध हैं ॥१॥

---

व्याख्या—जब [दर्विहोम शब्द] कर्म का नाम है, तब विचार किया जाता है—क्या लौकिक स्मार्त कर्म अष्टका आदि का नाम दर्विहोम है अथवा लौकिक और वैदिक दोनों का ? क्या प्राप्त होता है ?

स लौकिकानां स्यात् कर्तुस्तदाख्यत्वात् ॥२॥

सूत्रार्थः—(सः) वह दर्विहोम शब्द (लौकिकानाम्) लौकिक कर्मों का (स्यात्) होवे, (कर्तुः) [उन लौकिक कर्मों के] कर्त्ता की (तदाख्यत्वात्) उस (=दार्विहोमिक) नामवाला होने से ।

व्याख्या—वह (=दर्विहोम नाम) लौकिक कर्मों का होवे । वह दर्विहोम शब्द निश्चित रूप से लौकिक कर्मों का नामधेय होवे । किस हेतु से ? कर्त्ता के उस आख्या (=नाम) वाला होने से । उनका कर्त्ता दर्विहोम शब्द से कहा जाता है—शिनियों का दार्विहोमिक

शिनीनां दार्विहोमिको ब्राह्मणः, अम्बष्ठानां दार्विहोमिको ब्राह्मण इति। यश्च यत्करोति स तेनाऽऽख्यायते। यथा—लावकः पावक इति। यदि चाष्टकादीनां नामधेयमेतत्, ततस्तेषां कर्मणां कर्ता दार्विहोमिकसमाख्यामर्हतीति। तस्माल्लौकिकानां नामधेयम् ॥२॥

## सर्वेषां वा दर्शनाद्वास्तुहोमे ॥३॥ (उ०)

सर्वेषां लौकिकानां वैदिकानां च नामधेयमेतत्, न लौकिकानामेव। कस्मात्? दर्शनाद् वास्तुहोमे। वास्तुहोमे हि वैदिके दर्विहोमत्वं दर्शयति—**यदेकया जुहुयाद् दर्विहोमं कुर्यात्। पुरोनुवाक्यामनूच्य याज्यया जुहोति सदेवतत्वाय**[1] इति।

ननु विपरीतमेतद् दर्शनम्—**यदेकया जुहुयाद् दर्विहोमं कुर्यात्।** अदर्विहोमं

---

ब्राह्मण है, अम्बष्ठों का दार्विहोमिक ब्राह्मण है। जो जिस कर्म को करता है, उस [कर्म] से वह कहा जाता है। जैसे—लावक पाचक। यदि अष्टकादि [लौकिक कर्मों] का यह नामधेय है, तो उन कर्मों के करनेवाला दार्विहोमिक नाम के योग्य है। इससे लौकिक कर्मों का नामधेय है ॥२॥

## सर्वेषां वा दर्शनाद् वास्तुहोमे ॥३॥

**सूत्रार्थः**—(वा) 'वा' शब्द पूर्व उक्त पक्ष के निराकरण के लिये है। (सर्वेषाम्) सब लौकिक और वैदिक कर्मों का दर्विहोम नाम है। (वास्तुहोमे) वास्तोष्पति होम में (दर्शनात्) दिखाई पड़ने से।

**विवरण**—वास्तुहोमे—यहां 'वास्तोष्पति होम' के लिये पदैकदेश न्याय से वास्तुहोम शब्द प्रयुक्त है। पदेषु पदैकदेशान् (महाभाष्य १।१।४५) यह पदैकदेश न्याय कहाता है।

**व्याख्या**—सब लौकिक और वैदिक कर्मों का यह नामधेय है, केवल लौकिकों का ही नहीं। किस हेतु से? वास्तुहोम में दिखाई पड़ने से। वैदिक वास्तुहोम (=वास्तोष्पति होम) में दर्विहोमत्व को श्रुति दर्शाती है - यदेकया जुहुयाद् दर्विहोमं कुर्यात्। पुरोनुवाक्यामनूच्य याज्यया जुहोति सदेवतत्वाय (=जो एक ऋचा से होम करे वह दर्विहोम करे पुरोनुवाक्या को पढ़कर याज्या से होम करता है वह सदेवतत्व=देवसम्मतत्व=देवयोग्यत्व के लिये होता है)।

**विवरण**—पुरोऽनुवाक्यामनूच्य याज्यया जुहोति—'वास्तोष्पते प्रतिजानीहि' इस पुरोनुवाक्या को पढ़कर 'वास्तोष्पते शग्मया' याज्या से होम करता है। सदेवतत्वाय—भट्टभास्कर तै० सं० ३।४।१० में व्याख्या करता है—सदेवतत्वाय देवसंमितत्वाय देवयोग्यत्वायेत्यर्थः।

व्याख्या—(आक्षेप) यह दर्शन विपरीत है। जो एक से होम करे वह दर्विहोम

---

१. तै० सं० ३।४।१०।४॥

सन्तमित्यापद्यते। यदि दर्विहोम एवासौ, तत एकया द्वाभ्यां च हूयमानो दर्विहोम एव भवति। तत्रैतद् दर्शनं नोपपद्यते–**यदेकया जुहुयाद् दर्विहोमं कुर्याद्** इति। अत्रोच्यते। यदि लौकिकानामेव नामधेयं न वैदिकानाम्। तत एकयाऽपि हूयमानोऽसौ नैव दर्विहोमो भवति, अलौकिकत्वात्, तत्रैतद् वचनं नोपपद्यते–**यदेकया जुहुयाद् दर्विहोमं कुर्याद्** इति। तस्माज्ज्ञापकमेवेदं वैदिकानां दर्विहोमत्वे। एवमपि ज्ञापकमुक्तम्। कुतः प्राप्तिः? उच्यते—होमशब्दस्य सामान्याभिधायित्वात् प्राप्तिः। तस्माल्लौकिकवैदिकानां नामधेयमेतत् ॥३॥

---

**[दर्विहोमशब्दस्य होमनामधेयत्वाधिकरणम् ॥३॥]**

लौकिकानां वैदिकानां च नामधेयं दर्विहोमशब्द इति स्थितम्। इदानीं चिन्त्यते। किं यजतिचोदनानां जुहोतिचोदनानां च सर्वेषां नामधेयमुत जुहोतिचोदनानामेवेति। अविशेषात् सर्वेषामिति प्राप्ते, उच्यते—

**जुहोतिचोदनानां वा तत्संयोगात् ॥४॥ (उ०)**

---

करे। अर्दविहोम होते हुए को, यह प्राप्त होता है। यदि दर्विहोम ही है यह, इससे एक या दो ऋचा हूयमान दर्विहोम ही होता है। वहां यह दर्शन उपपन्न नहीं होता—यदेकया जुहुयाद् दर्विहोमं कुर्यात्। (समाधान) यदि [दर्विहोम] लौकिक कर्मों का ही नामधेय है वैदिकों का नहीं है, तो वह एक ऋचा से हूयमान भी दर्विहोम नहीं होता है अलौकिक होने से। उस स्थिति में यह वचन उपपन्न नहीं होता—यदेकया जुहुयाद् दर्विहोमं कुर्यात्। इससे यह ज्ञापक ही है वैदिक कर्मों के दर्विहोमत्व में। (आक्षेप) इस प्रकार भी ज्ञापक कहा है, प्राप्ति कहां से होगी? (समाधान) होमशब्द के सामान्य के अभिधायित्व होने से प्राप्ति है। इससे लौकिक वैदिक उभयविध कर्मों का दर्विहोम नाम है ॥३॥

---

व्याख्या—लौकिक और वैदिक कर्मों का दर्विहोम नामधेय है, [यहां प्रथम अधिकरण] स्थित हो गया (=रुक गया)। अब यह विचार किया जाता है कि क्या 'यजति' से कही गई विधियों में और 'जुहोति' से कही गई सबका दर्विहोम नामधेय है अथवा 'जुहोति' से कही गई विधियों का ही। विशेष न जाना जाने से सब चोदनाओं का दर्विहोम नाम है, ऐसा प्राप्त होने पर कहते हैं—

**जुहोतिचोदनानां वा तत्संयोगात् ॥४॥**

**सूत्रार्थः**—(वा) 'वा' शब्द पूर्व उक्त पक्ष को निवृत्त करता है। (जुहोतिचोदनानाम्)

जुहोतीनां नामधेयं न यजतीनाम्। कुतः ? तत्संयोगात्। होमशब्दसंयोगात्। अयं होमशब्दो जुहोतेर्वाचको न यजतेः। यजतौ लक्षणया स्यात्। तस्माज्जुहोति-नामधेयम् ॥४॥

———

[दर्विहोमशब्दस्य गुणविधित्वनिराकरणाधिकरणम् ॥४॥]

स्थितादुत्तरमुच्यते—

द्रव्योपदेशाद्वा गुणाभिधानं स्यात् ॥५॥ (पू०)

यदुक्तं कर्मनामधेयं दर्विहोम इति। तन्न। किं तर्हि ? गुणाभिधानं स्यात्। गुणविधिरित्यर्थः। कुतः ? द्रव्योपदेशात्। द्रव्योपदेशोऽवगम्यते—दर्व्या होमो दर्वि-

---

दर्विहोम शब्द 'जुहोति' से कही गई विधियों का ही नाम है (तत्संयोगात्) उस = होम शब्द के साथ संयोग होने से।

व्याख्या—जुहोतियों का ही नाम है यजतियों का नहीं। किस हेतु से ? उसके साथ संयोग होने से। होम शब्द के संयोग से। यह होम शब्द 'जुहोति' का ही वाचक है, न कि 'यजति' का। 'यजति' का वाचक मानने में लक्षणा से प्रयुक्त होगा। इस कारण 'जुहोति' चोदना का [दर्विहोम शब्द] नाम है॥४॥

विवरण—जुहोतीतां नामधेयम्, न यजतीनाम्—इसका तात्पर्य यह है कि दर्विहोम शब्द जुहोति' से कही गई विधियों का ही नाम है, 'यजति' से कही गई विधियों का नाम नहीं है ॥४॥

———

व्याख्या—स्थित (=रुके) हुए अधिकरण से आगे कहते हैं—

द्रव्योपदेशाद् वा गुणाभिधानं स्यात् ॥५॥

सूत्रार्थः—(वा) 'वा' शब्द पूर्व उक्त 'दर्विहोम शब्द कर्म का नाम है' की निवृत्ति करता है। (द्रव्योपदेशात्) दर्विरूप द्रव्य के उपदेश से (गुणाभिधानम्) 'दर्वि' रूप गुण का कथन (स्यात्) होवे।

व्याख्या—जो यह कहा कि दर्विहोम कर्म का नामधेय है, वह नहीं है। तो क्या है ? गुण का कथन होवे। अर्थात् यह गुणविधि है। किस हेतु से ? द्रव्य के उपदेश से। द्रव्य का उपदेश (=विधान) जाना जाता है—दर्वि से होम=दर्विहोम। इस प्रकार ये दर्वि और होम

होम इति। एवमेतौ दर्विहोमशब्दौ यथाप्रसिद्धिकल्पितौ भविष्यतः। तदस्माद् गुणविधिः ।।५।।

**न लौकिकानामाचारग्रहणत्वाच्छब्दवतां चान्यार्थविधानात् ।।६।। (उ०)**

नायं गुणविधिर्युज्यते। किं कारणम् ? लौकिकानां तावदाचारगृहीता दर्विः —**न्यञ्चिबिलया मूलदण्डया दर्व्या जुहोति**[1] इति। सा न विधातव्या। श्रौतानामप्यन्यानि होमार्थानि पात्राण्याम्नातानि। **स्रुवेण जुहोति,**[2] **चमसेन जुहोति**[3] इति। तैः सह दर्वेर्विकल्पः स्यात्। स चान्याय्यः। यत्कारणं, स्रुवादीनां[4] विधायकः शब्दोऽस्ति, स्रुवेण जुहोतीति। न तु दर्वेः। तत्र ह्यानुमानिको विधिशब्दः ।।६।।

---

शब्द प्रसिद्धि के अनुसार स्वीकृत होंगे। इससे यह गुणविधि है ।।५।।

**न लौकिकानामाचारग्रहणत्वाच्छब्दवतां चान्यार्थविधानात् ।।६।।**

सूत्रार्थः—(न) यह गुणविधि नहीं है। (लौकिकानाम्) लौकिक अर्थात् स्मार्त कर्म करने हारों के (आचारग्रहणत्वात्) आचार=व्यवहार से दर्वि का ग्रहण होने से (च) और (शब्दवताम्) शब्द से विहित कर्मों के (अन्यार्थविधानात्) स्रुवादि अन्य पात्रों के विधान से।

विवरण—लौकिक=स्मार्त कर्मों का प्रामाण्य कर्तृसामान्य=वैदिक और स्मार्त दोनों कर्मों का समानरूप से करने से स्मृत्युक्त आचार=व्यवहार आदि का प्रामाण्य होता है अर्थात् उनके कर्मों का प्रामाण्य 'कर्तृसामान्य' अनुमान से होता है, यह पूर्व (मी० १।३।२)में कह चुके हैं। आचार=व्यवहार गृहीत कर्मों की अपेक्षा श्रौत कर्म शब्दवान्=साक्षात् शब्द से विहित होने के कारण स्वतः प्रमाण माने जाते हैं।

व्याख्या—यह गुणविधि है ऐसा कथन युक्त नहीं है। क्या कारण है ? लौकिक (=स्मार्त) कर्मों के करने हारों के आचार से (=व्यवहार) से गृहीत है दर्वि। नीचे बिलवाली मूल में दण्डवाली दर्वि से होम करता है। उसका [स्मार्त कर्म में] विधान करना उचित नहीं है। श्रौत कर्मों के अन्य होम के लिये पात्र कहे गये हैं—स्रुवेण जुहोति (स्रुव से होम करता है) चमसेन जुहोति (=चमस से होम करता है)। उन [श्रुतिविहित] पात्रों के साथ दर्वि का विकल्प होवे, यह भी अन्याय्य है। उसमें यह कारण है—स्रुवादि का विधान करनेवाला शब्द है—स्रुवेण जुहोति। दर्वि का विधान करनेवाला शब्द नहीं है। वहां विधायक शब्द आनुमानिक है ।।६।।

विवरण—स चान्याय्यः—स्रुवादियों का श्रुति से प्रत्यक्ष विधान है और दर्वि का स्मार्त कर्मों के करने हारों के आचार से आनुमानिक विधान है। अतः प्रत्यक्ष विहित स्रुवादि

---

१. अनुपलब्धमूलम्।
२. अनुपलब्धमूलम्। द्र०—'स्रुवेण चतस्रो जुहोति दीक्षितत्वाय।' तै० सं० ६।१।२।१।
३. आप० श्रौत ८।३।८।। ४. 'स्रुचादीनाम्' इत्यपपाठः क्वचित्, पूर्वत्राश्रवणात्।

## दर्शनाच्चान्यपात्रस्य ॥७॥

अन्यच्च पात्रं दर्विहोमे दृश्यते—**भूतेभ्यस्त्वेत्यपूर्वां स्रुवमुद्गृह्णाति**[1] इति। तस्मान्न गुणविधिः ॥७॥

अथोच्यते—अग्निहविषोः कार्ये दर्विर्भविष्यति। दर्वौ होमो दर्विहोमो, दर्वेर्वा होमो दर्विहोम इति। तत्र ब्रूमः—

## तथाऽग्निहविषोः ॥८॥

---

के साथ आनुमानिक दर्विविधान का विकल्प अन्याय्य है। तत्र ह्यानुमानिको विधिः—स्मार्त कर्मों और श्रौत कर्मों के समान कर्त्ता होने से, स्मार्त विधियां जो प्रत्यक्ष विहित नहीं हैं, का अनुमान किया जाता है(द्र०—मी० १।३।२)। इससे दर्वि की विधि आनुमानिक है। ६॥

### दर्शनाच्चान्यपात्रस्य ॥७॥

सूत्रार्थः—(अन्यपात्रस्य) दर्वि के स्थान पर अन्य पात्र के (दर्शनात्) दर्शन से (च) भी दर्विहोम गुणविधि नहीं है।

व्याख्या—दर्विहोम में अन्य पात्र भी देखा जाता है—भूतेभ्यस्त्वेत्यपूर्वां स्रुवमुद्गृह्णाति (='भूतेभ्यस्त्वा' इस मन्त्र से स्रुव को ऊपर उठाता है)। इससे गुणविधि नहीं है ॥७॥

विवरण—स्रुवमुद्गृह्णाति—इसके स्थान में तै० सं० ६।२।८।२ में 'स्रुचमुद्गृह्णाति' पाठ है। कुतूहलवृत्तिकार ने लिखा है—भूतेभ्यस्त्वा से उत्तरवेदि के व्याधारण रूप दर्विहोम में अन्य (स्रुच्) पात्र के दर्शन से दर्विरूप गुणविधि नहीं है। इस व्याख्या के अनुसार तथा तै० सं० ६।२।८।२ में 'स्रुवं' के स्थान में 'स्रुचं' पाठ होने से भाष्य में भी स्रुचमुद्गृह्णाति पाठ ही युक्त प्रतीत होता है ॥७॥

व्याख्या—यदि यह कहते हो कि अग्नि और हवि के कार्य में दर्वि होगी अर्थात् दर्वि की विधि होगी। दर्वि में होम दर्विहोम [इस अर्थ के द्वारा अग्नि के स्थान में दर्विपात्र में होम प्राप्त होता है], अथवा दर्वि का होम दर्विहोम [इस अर्थ में होम साधनीभूत आज्यादि हवि के स्थान में दर्वि का ही अग्नि में प्रक्षेप होगा]। इस विषय में कहते हैं—

### तथाऽग्निहविषोः ॥८॥

सूत्रार्थः—(तथा) जैसे स्रुव आदि के विशेष विधान में दर्विरूप गुणविधि नहीं होती उसी प्रकार (अग्निहविषोः) अग्नि और हवि के स्थान में भी दर्विरूप गुणविधि नहीं होती है।

विशेष—कुतूहलवृत्तिकार ने यहां पूर्व सूत्र से 'न' पद की अनुवृत्ति मानी है।

---

१. अनुपलब्धमूलम्। द्र०—'भूतेभ्यस्त्वेति स्रुचमुद्गृह्णाति। तै० सं० ६।२।८।२॥

तथाऽग्निहविषोरपि। यथा, पात्रकार्ये दर्विर्न युज्यते, तथाऽग्निहविषोः कार्येऽपि। तत्राप्याहवनीय आधारत्वेन विहितः—**यदाहवनीये जुहोति**[1] इति। अन्यच्च प्रदेयत्वेन पुरोडाशादि। तस्मादग्निहविषोरपि कार्ये न दर्वेर्निवेशः ॥८॥

## उक्तश्चार्थसम्बन्धः ॥९॥

उक्तं चास्माभिरग्नेः कार्येऽन्यद्द्रव्यसमर्थम्। दहनपचनप्रकाशनकर्म, अग्नेः। न चैतत् कार्यमन्यद्द्रव्यं शक्नोति कर्तुमिति। तस्मान्नाग्निकार्ये दर्वेरुपदेशः। अतो न गुणविधिः। कर्मनामधेयमेव दर्विहोमशब्द इति ॥९॥

---

व्याख्या—उसी प्रकार अग्नि और हवि के कार्य में भी दर्वि नहीं होगी। जैसे पात्र के कार्य में दर्वि का योग नहीं होता है उसी प्रकार अग्नि और हवि के कार्य में भी दर्वि का योग नहीं होगा। वहां (=दर्विहोम में) भी आहवनीय अग्नि आधाररूप से विहित है—यदाहवनीये जुहोति (=जो आहवनीय में होम करता है)। और अन्य प्रदेय रूप से पुरोडाशादि विहित है। इससे अग्नि और हवि के कार्य में भी दर्वि का प्रवेश नहीं होगा ॥८॥

## उक्तश्चार्थसम्बन्धः ॥९॥

**सूत्रार्थः**—(अर्थसम्बन्धः) अग्नि के प्रयोजन का सम्बन्ध (च) भी (उक्तः) श्रुति ने कह दिया है।

**विवरण**—अग्नि कार्य सम्बन्ध, यथा—**गार्हपत्ये हवींषि श्रपयति** (=गार्हपत्य में हवियों को पकाता है) **दक्षिणाग्नावन्वाहार्यं पचति** (=दक्षिणाग्नि में अन्वाहार्य को पकाता है)। अन्वाहार्य=चार ऋत्विजों के भोजन में पर्याप्त दक्षिणाग्नि में पकाया गया चावल अन्वाहार्य कहाता है। अनु=यज्ञ के अनन्तर भोजन के लिये हार्य=दिया जानेवाला ओदन।

व्याख्या—हमने कह दिया है अग्नि के कार्य में अन्य द्रव्य असमर्थ है। जलाना पकाना प्रकाश कर्म अग्नि के हैं। इन कार्यों को अन्य द्रव्य नहीं कर सकता। इससे भी अग्नि के कार्य में दर्वि का उपदेश (=गुणरूप विधान) नहीं हो सकता। इसलिये गुणविधि नहीं है। दर्विहोम कर्म का नाम ही है ॥९॥

---

१. द्र०—यदाहवनीये जुह्वति। तै० ब्रा० १।१।१०।५॥

## [दर्विहोमानामपूर्वताधिकरणम् ॥५॥]

दर्विहोमशब्दः कर्मनामधेयमित्युक्तम्। तत्र चिन्त्यते—किमपूर्वा दर्विहोमा उत कुतश्चिद् धर्मग्राहिण इति? किं प्राप्तम्? नापूर्वा इति। कुतः? इतिकर्तव्यताविधेः। अविहितेतिकर्तव्यताकं कर्म विहितेतिकर्तव्यताकाद्धर्मान् गृह्णातीत्युक्तम्। अविहितेतिकर्तव्यताकाश्चामी। तस्मात् पूर्ववन्त इति। यदेतदेवं, तदेतदापतति किंपूर्वा इति? अत्रोच्यते—

### तस्मिन् सोमः प्रवर्तेताव्यक्तत्वात् ॥१०॥ (पू०)

तस्मिन् खलु दर्विहोमे सोमः प्रवर्तेत। सौमिको विध्यन्तः स्यात्। कुतः? अव्यक्तत्वात्। अव्यक्तचोदनः[1] सोमः। अमी अपि चाव्यक्तचोदनाः—भिन्ने जुहोति[2] इति। अतश्चोदनासामान्यात् सौमिको विध्यन्त इति ॥१०॥

---

व्याख्या—दर्विहोम शब्द कर्म का नाम है, यह कह चुके। उस [नामधेय पक्ष] में विचार किया जाता है—क्या दर्विहोम अपूर्व हैं अथवा कहीं से धर्म को ग्रहण करनेवाले हैं? क्या प्राप्त होता है? अपूर्व नहीं हैं। किस हेतु से? इतिकर्तव्यता की विधि होने से। जिसके इतिकर्तव्यता रूप कर्म विहित नहीं है वह जिसकी कर्तव्यता रूप धर्म विहित हैं उनसे धर्मों को ग्रहण करता है, यह कह चुके हैं। ये दर्विहोम अविहित इतिकर्तव्यतावाले हैं। इससे ये पूर्ववान् हैं अर्थात् जिनकी इतिकर्तव्यता कही है उन पूर्व कर्तव्यतावाले हैं। जब यह इस प्रकार है, तब यह विचार उत्पन्न होता है—पूर्ववाले हैं अर्थात् किससे धर्मों को ग्रहण करनेवाले हैं। इस विषय में कहते हैं—

### तस्मिन् सोमः प्रवर्तेताव्यक्तत्वात् ॥१०॥

सूत्रार्थः—(तस्मिन्) उस=दर्विहोम में (सोमः) सौमिक विध्यन्त (प्रवर्तेत) प्रवृत्त होवे (अव्यक्तत्वात्) अव्यक्त चोदनावाला होने से अर्थात् स्व अङ्गत्वरूप से अविहित देवतावाला होने से [दर्विहोम और सोम दोनों का स्वाङ्गरूप से देवता का विधान नहीं है]।

व्याख्या—उस दर्विहोम में सोम प्रवृत्त होवे सौमिक विध्यन्त होवे। किस हेतु से? अव्यक्त होने से। अव्यक्त चोदनावाला सोम है। ये दर्विहोम भी अव्यक्त चोदनावाले हैं—भिन्ने जुहोति (=कपाल आदि के भेदन होने=टूटने पर होम करता है)। अतः चोदना सामान्य से [दर्विहोम में] सौमिक विध्यन्त होता है ॥१०॥

---

१. अव्यक्तचोदन इति अव्यक्तत्वं च स्वाङ्गत्वेनाविहितदेवतात्वम्। सोमवायाङ्गत्वेन विहितदेवताया अभावात् सोमयागोऽव्यक्त इति कथ्यते।

२. अनुपलब्धमूलम्। द्र०—आप० श्रौत ६।१३।८॥

## न वा स्वाहाकारेण संयोगाद् वषट्कारस्य च निर्देशात् तन्त्रे तेन विप्रतिषेधात् ॥११॥ (उ०)

वाशब्दः पक्षं व्यावर्तयति। नात्र सौमिको विध्यन्तो न्याय्यः। किं कारणम्? स्वाहाकारेण संयोगात्। स्वाहाकारेण संयुक्ता दर्विहोमाः। **पृथिव्यै स्वाहा, अन्तरिक्षाय स्वाहा**[1] इति। किमतः? वषट्कारस्य निर्देशात् तन्त्रे तेन च विप्रतिषेधः।

---

विवरण—सोमः प्रवर्तेत—यहां भवार्थक तद्धित के न होने पर भी ताद्धित अर्थ 'सौमिक' गृहीत होता है। निरुक्तकार यास्क ने २।५ में 'गो' शब्द के निर्वचन प्रसङ्ग में 'अथाप्यस्या ताद्धितेन कृत्स्नवन्निगमा भवन्ति (=इस 'गो' शब्द में तद्धित प्रत्यय बोधित ताद्धित अर्थ से कृत्स्नवत् जैसे तद्धित प्रत्ययान्त से अर्थ हो उसके समान विना तद्धित प्रत्यय के भी कहा जाता है) लिखकर 'गो' का गव्य=पयः अर्थ में, चर्म, श्लेष्मा, स्नायु और श्लेष्मा अर्थों में प्रयुक्त 'गो' शब्दवाले मन्त्र उद्धृत हैं। अव्यक्तचोदनः सोमः—याग का स्वरूप देवता द्रव्य और त्याग तीन से सम्बद्ध होता है—द्रव्यं देवता त्यागः (कात्या० श्रौत १।२।२)। जिस चोदना=विधि में द्रव्य वा देवता का निर्देश न होवे वह अव्यक्त चोदना कहाती है। सोमेन यजेत में द्रव्य का निर्देश है परन्तु देवता का निर्देश न होने से सोम अव्यक्त चोदनावाला कहाता है। इसी प्रकार कपाल के टूटने पर उसी का गार्हपत्य में होम होता है (द्र०—आप० ६।१३।८ रुद्रदत्त वृत्ति)। यहां भी देवता का निर्देश नहीं है ॥१०॥

## न वा स्वाहाकारेण संयोगाद् वषट्कारस्य च निर्देशात् तन्त्रे तेन विप्रतिषेधात् ॥११॥

सूत्रार्थः—(वा) 'वा' शब्द पूर्व उक्त पक्ष की निवृत्ति के लिये है। (स्वाहाकारेण संयोगात्) दर्विहोम का स्वाहाकार के साथ संयोग होने से (च) और (तन्त्रे) सौमिक तन्त्र में (वषट्कारस्य) वषट्कार का (निर्देशात्) निर्देश होने से (तेन) वषट्कार के साथ (विप्रतिषेधात्) विप्रतिषेध=विरोध होने से (न) सौमिक विध्यन्त नहीं है।

विशेष—विप्रतिषेध=विरोध समान विषय में होता है। स्वाहाकार और वषट्कार दोनों ही हवि के प्रदान के लिये प्रयुक्त होते हैं।

व्याख्या—'वा' शब्द पक्ष का व्यावर्तन (=निवर्तन) करता है। यहां सौमिक विध्यन्त न्याय्य नहीं है। क्या कारण है? स्वाहाकार के साथ संयोग होने से। दर्विहोम स्वाहाकार से संयुक्त हैं—पृथिव्यै स्वाहा, अन्तरिक्षाय स्वाहा। इससे क्या होता है? वषट्कार का निर्देश होने से तन्त्र में उसके साथ विप्रतिषेध (=विरोध) होता है। सौमिक तन्त्र में वषट्-

---

१. तै० सं० १।८।१३।३; ७।१।१५।१॥

तन्त्रे च सौमिके वषट्कारो निर्दिष्टः। तेनास्य विप्रतिषेधः। उभयोः प्रदानार्थत्वात्[1]। यदि सौमिको विध्यन्तः, ततो वषट्कारेण भवितव्यम्। तत्रैतत् स्वाहाकाराम्नानमनर्थकं स्यात्। अथ विकल्पः क्रियते, तथाऽप्युभयोः पक्षे बाधः। अथ त्वपूर्वा दर्विहोमाः, नैष विरोधो भविष्यति। तस्मादपूर्वाः ॥११॥

## शब्दान्तरत्वात् ॥१२॥

शब्दान्तरं च यजतिशब्दाज्जुहोतिशब्दः। यजतिचोदनश्च सोमः। दर्विहोमाः पुनर्जुहोतिचोदनाः। चोदनासामान्येन च धर्मप्राप्तिरिष्यते। तस्मादप्ययुक्ता सौमिकी धर्मप्राप्तिः। नन्वव्यक्तत्वाच्चोदनासामान्यमुक्तम्। अत्रोच्यते। सामान्येऽव्यक्तत्वे, यजतिशब्दो विशेषलिङ्गम्। तेन यजिमतीष्वव्यक्तासु धर्मनियमः। यथा,

---

कार का निर्देश है। दोनों (=स्वाहाकार और वषट्कार) के प्रदान अर्थवाला होने से [अथवा – प्रदान के लिये प्रयोग होने से]। यदि सौमिक विध्यन्त होवे तो उससे [प्रदान के लिये] वषट्कार होना चाहिये। वहां (=दर्विहोम के मन्त्रों में) स्वाहाकार का पाठ अनर्थक होवे। यदि विकल्प किया जाये तो भी दोनों की पक्ष में बाधा होवे। अर्थात् स्वाहाकार का प्रयोग होने पर वषट्कार का प्रयोग न होवे और वषट्कार का प्रयोग होने पर स्वाहाकार का प्रयोग न होवे। और यदि दर्विहोम अपूर्व (=पूर्व विहित किसी विध्यन्त की अपेक्षा न करने वाले) होवें तो विरोध नहीं होगा। इससे दर्विहोम अपूर्व है ॥११॥

### शब्दान्तरत्वात् ॥१२॥

सूत्रार्थः—(शब्दान्तरत्वात्) यजति और जुहोति शब्द के भिन्न भिन्न होने से दर्विहोम में सौमिक विध्यन्त नहीं होगा।

व्याख्या—'यजति' शब्द से जुहोति' शब्द भिन्न है। सोम 'यजति' चोदनावाला है और दर्विहोम 'जुहोति' चोदनावाले हैं। चोदना-सामान्य से धर्म प्राप्त इष्ट होती है। इससे भी सौमिकी धर्मप्राप्ति अयुक्त है। (आक्षेप) अव्यक्तत्वरूप चोदना सामान्य कहा है [उसका समाधान क्या होगा?]। (समाधान) इस विषय में कहते हैं—सामान्य अव्यक्तत्व होने पर 'यजति' शब्द विशेष लिङ्ग है। इससे यजिमती (='यजति' चोदनावाली) अव्यक्त चोदनाओं में धर्म का नियम होता है। जैसे औषधरूप समान गुणत्व होने पर देवता के एकत्वरूप विशेष

---

१. द्र०—स्वाहाकारेण वषट्कारेण वा देवेभ्यो हविः प्रदीयते। मी० ८।४।१६ सूत्रभाष्ये; वषट्कारेण वा स्वाहाकारेण वा देवेभ्योऽन्तं प्रदीयते। मी० १०।८।२० सूत्रभाष्य उद्धृतः।

समान औषधगुणत्वे देवतैकत्वेन विशेषलिङ्गेन सौर्यकर्मण्याग्नेयविध्यन्त[1] इति ।१२।

## लिङ्गदर्शनाच्च ॥१३॥

लिङ्गदर्शनाच्चैतद् विज्ञायते, नात्र सौमिको विध्यन्त इति । औदुम्बरीहोमे हि स्वाहाकारं विधायाऽऽज्यविधिपरे वाक्ये दर्शयति—**घृतेन द्यावापृथिवी आपृणेथामित्यन्तरा कर्णौ[2] जुहोति[3]। आ मूलादवस्रावयति। भूमिगते स्वाहा करोति[4]** इति । यद्यत्र सौमिको विध्यन्तः स्याद् वषट्कारस्ततो भवेत्, न स्वाहाकारः ॥१३॥

---

लिङ्ग से सौर्य कर्म में आग्नेय याग का विध्यन्त होता है [द्रष्टव्य—मी० ८।१। अधि० १६, ऐकार्थ्याद्वा नियम्येत सूत्र २८] ॥१२॥

### लिङ्गदर्शनाच्च ॥१३॥

सूत्रार्थः—(लिङ्गदर्शनात्) लिङ्गदर्शन से (च) भी यह विदित होता है कि दर्विहोमों में सौमिक विध्यन्त नहीं होता है। [लिङ्गदर्शनश्रुति भाष्य में देखें।]

व्याख्या—लिङ्गदर्शन से यह जाना जाता है कि यहां सौमिक विध्यन्त नहीं होता है। औदुम्बरी के होम में स्वाहाकार का विधान करके अन्य विधिपरक वाक्य में दर्शाता है—घृतेन द्यावापृथिवी आपृणेथामित्यन्तरा कर्णौ जुहोति आमूलादवस्रावयति। भूमिगते स्वाहा करोति (='घृत से द्यावापृथिवी को तृप्त करता हूं' इस मन्त्र से औदुम्बरी के कानों के मध्य होम करता है। मूलपर्यन्त घृत का अवस्रावण करता है=चुआता है। घृत के भूमि को प्राप्त होने पर स्वाहा कहता है)। यदि यहां सौमिक विध्यन्त होवे तो स्वाहाकार न होवे ॥१३॥

विवरण—सोमयाग के सदोमण्डप में उदुम्बर=गूलर की शाखा गाड़ी जाती है। सामगान के समय औदुम्बरी पीठ से स्पर्श करते हुए सामगान किया जाता है—औदुम्बरीं स्पृष्ट्वोद्गायेत (मी० १।३।२ के भाष्य में उद्धृत)। इस औदुम्बरी शाखा को गाड़ने के पश्चात् घृतेन द्यावापृथिवी मन्त्र से कानों और शाखा के मध्य भाग में घृताहुति दी जाती है। घृत धारारूप में छोड़ना होता है जिससे मूल तक घृत पहुंच जावे। अन्तरा कर्णौ—वस्तुतः यहां भाष्य में

---

१. द्र०—ऐकार्थ्याद्वा नियम्येत। मी० ८।१।२८॥

२. 'कर्णा' इति काशिमुद्रितेऽपपाठः।

३. मीमांसाभाष्ये १०।८।२१ 'आपृणेथामिति औदुम्बर्या विशाखे जुहोति' इति पाठान्तरेणोद्धृतः।

४. द्र०—आप० श्रौत ११।१०।४॥ सत्या० श्रौत ७।७।१८-११, लाट्या० श्रौत १।७।७-९॥

## उत्तरार्थस्तु स्वाहाकारो यथा साप्तदश्यं तत्राविप्रतिषिद्धा पुनः प्रवृत्तिलिङ्गदर्शनात् पशुवत् ॥१४॥ (पू०)

---

